
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

॥ इदं पुस्तकं यग्रवेन भास्कर प्रारंभः ॥
॥ हस्ताक्षर धोंडभट्ट सेंडगे ॥

Accession No:- ~~8484~~ M901
Title:- संवर कल्प प्रकाश
Author:- भास्कर [illegible]
~~Date~~: शके 1698
सन 1776. पत्र:- 162

(1)

॥श्रीगणेशायनमः॥निसंगोकुळकेलिकौतुकजुषामुल्लासनावासभूः॥
सौभाग्यंसुमतोजनस्यविनतास्तुस्फुरद्दाहकः॥गीर्वाणरितमोविदा
रणपटुर्ब्रह्मांडमुद्भासयन्मग्नानंदविनोदशानचतुरःपायादपायाद्धरिः॥
शपायासुर्फेरिसंपङ्जलधिमनुदिनंपूरयंतःसुराणामानम्रानंतहृद
रकमुकुटमिलद्धीरतारासहाराः॥आरोग्यंभास्करादिःसवगतविषया
धौतकालांधकाराभास्वत्याद्यग्रधाराश्रितनखरमिषादिद्दवोद्योतमा
नाः॥मार्क्षोणीमंडलखंडमंडनमणिर्बुदेलखंडंजगज्जापद्रूमेनिधान
मिवदृमंप्रागब्रह्मणानिर्ममे॥अन्येषुप्रवदंतितत्रवपदंखंडेषुनूत्ना
र्थकंयन्नाहर्दृष्टखंडतोक्षितितलेसर्गादिविज्ञावुधाः॥नानाग्राममल्ला
मसज्जनपदैर्यन्मंडलंमंडितंकामंकामधुगेवयत्रवसुधादुग्धेवसून्नित्यं॥
विद्यानूसांगपद्क्रमानथसहाधीतेचवर्णत्रयीम्यज्यंपत्रसुरेंद्रमौलिमिलितं

पादारविंदं हरेः॥४॥ संफलतः सुकृतभरैः किमु प्रजानां नेत्रेतान नरपतिं ध्रुवं वंद
नीयः॥ येन श्रीहरिचरणारविंदमाकं सेनो क्रोमधुकरसाहवर्यैवमो॥५॥ तस्मा
द्वीरस्तस्य फलमहिमा भूपाल भूषामणिरेई न्यध्वांत विदारणो वितरणप्रोद्दा
मधामांशुमान् सानंदं जननेत्रचकोरनयनैः पानात्कलानां निधिर्भूर्द्दैवैर
वलोकितो विधिरिव श्रीवीरसिंहो नृपः॥६॥ जानिमो यस्य नाम्नैव लउद्दनल
शिखाक्रूरो विषादह्यमाना सर्वा विश्वंभरेयं जलनिधिवसना दग्धवासास्त
हानी॥ तत्खोमहीरसिंहामलकरकमलप्रोल्लसद्दानजाते नैस्याद्वेतुंगभं
गावलिकलितवपुर्वारिधिर्वारिपूरैः॥७॥ धीरश्रीवीरसिंहाद्विपुनिवयवमू
र्वर्वणाच्चेद्यकालः श्रोणीदेवादिपालो निजसहजनकुलालंश्रीप्रहरादिसिं
हः॥८॥ श्रीविश्वंभरपादपद्ममकरंदास्वादनोल्लासितस्वांतः कोपिकृतोलए
वरचित्तो दुर्दैवतो हेषिणां श्रेयानाजनि सत्यधर्मनिरतः पांडोस्तनूजोयय
थापप्रसन्नन यः सुजानरहरिः प्रादुर्बभूव क्षितौ॥९॥ मेनाकारिजनोप

3

कारितविनस्फूर्जत्सुजानां बुधैः॥ आसारैर्विविधैः सुरालयवरैश्चामंडि
तं मंडलं॥ आसीत्हृत्यसपत्नसर्वनृपतीन्संमान्यमान्यानपि श्रीमानेषसुजा
नसिंहनृपतिः आसीत्स्वराज्यप्रधात्म्या॥ २॥ तस्मिन्वैकुंठपीठविधिसमवनम्रास
ह्निमानैः प्रयाते हृतीपयीकाः प्रहृष्टप्रभुमुकुटमणौ नंदनश्चंडकीर्त्तिः॥ दिल्लिं
णाद्रेण प्रविनततनमहिमा कोलराज्येपिमिक्तो भूपानां भागपसीमा विलस
तिसुकृतं तिरिं एप इमणपादिवर्मा॥ ३॥ जाते प्रभाविंदुमणौ तु तस्मिन्विकास
मापाज्जुनिकर्मचंद्रः संकोवितं यद्यपिनीचलोके यथाब्जहृद्दं तरणौर्न
मोषिताः भद्दिल्लिंद्रप्रियहस्तसंकोस्तजमणाः॥ सर्वेष्टविंतामणिर्धर्मैकिप्र
तिबिंबदर्पणमणिं वृंदेलचूडामणिः॥ दैन्यध्वांतविदारणे दिनमणिश्चास
हंनामुक्तामणिः॥ श्रीमानिंदुमणिः प्रभुर्विजयते भूपालभूषामणिः॥ ४॥ आ
नस्मात्प्रभोरिंदुमणेरुदारा ह्रांभीर्यवारांनिधितो बभूव॥ देन्याधकारोघ
मकिंचनानां निर्मलयन् श्रीजससंतचंद्रः॥ ५॥ दुर्हक्कोककुलानि न्नोकमग

२

मनुद्वारे विंयोगाद्यो सोल्लासान्न भवन्त्र जा कुमुदिनीं छ्वानि सर्वाण्यपि
मानंदाः कनकामे तेन सकला विद्रुता कोराङ्मे सपद्म रिधपः अश्रुत्ति मगनं
जस्वतत्वं ड्रोदये ॥१५॥ नाथ्ये ऽखिलानां मुदितेकलानां विमुक्तदोषे जसवंतचं
द्रे ॥ अलं मयस्तून कलः कलंकि न्हिये चंसिंधो किमु मज्जतीउ ॥१६॥ सोयं सौ
दर्यसारः समजनि विधिनामार एव द्वितीयः कोमारस्यावताराश्चि जगतिप्र
दितस्सर्वे लोके कुमारगासंघाते सुंदरीणा सततनमिह्यतः कुत्सितो मारं
वस्तेनाहो स्वित्कुमारः सकलजनमनोहारि जसवंतसिंहः ॥१७॥ वंचडिडी
रपिंडोद्धत विमलयशाश्चंद्रमाश्चंद्रिकाप्तिः येस्य त्रस्ताउभांडं सततनमूप्ति
नवः प्रयत्ता हरेणा दुहंहुं तंउलुंड प्रमथनपटु नाख्यो न पंचास्य नमो सा
पजेसवंतनृ वर्मा जयपतिवसुमतीमंउला खंउलश्रीः ॥१८॥ वीरश्रा वारे जेम रुग्नि
रक्ति विषये जातः स्वयंभूः पुरा वित्तो यो नैर वाहनोथ तरणिः सूनुर्जसत्रे ता
पोरयेः ॥ एकस्मिन्नखिलं निपातुमकरोज्जसवंतसिंहं विधिर्येनत्रामपदाव
ली मरवयत्तन्नाम छ्रवो क्षरेः ॥१९॥ जाने याने तदीये सकलसुरपतिः श्रापस
क्रंदनाख्यां कालोपदक्षिणेशः समभवदपितो भीतितः कालवर्णः ॥ किंचायं

जीवनानां पत्तिरपि सहसा चिंतयापीतवर्णा॥ श्रीदः स्वर्णप्रदानाद्धिव
सति दिव्रं ते पुनिः शंकमेकं॥२०॥ तदीयप्रयाणकोद्भूतध्वनिप्रचंडगर्जना
कुधारसेणेनु सर्वदारुणध्वजस्य केनवानाम्युरस्करोति जिकीकांद्विषन्मतं
गजावली जियत्सितु परिभ्रमन्नतापचंडकेसरी॥२१॥ शक्राण्यखर्वगर्व
विरीभ्रष्टतां प्राणमारुतानि नीविराजिते॥ किंच कीर्त्तिप्रतिदुग्धसारीका
तत्क्षेपाणिकाभुजगनापि का॥२२॥ यत्रैकेकुंठकलामगमयय सुरषोत्तमस्य देव
स्यतस्य रमणीयसरोजदृष्टेः द्वारेरिकासुरगणैर्विजयोगणः॥ किं सर्वसम
र्थरिपुसार्थमथ क्षणेन॥२३॥ अथ श्रास्तमही[illegible] मंडलपंडितानां मुदारविद्यागुण
मंडितानां॥ आधारभूमि जसवंतदेवो भट्टसुराणामिव स्वलसानु॥२४॥ श्रीदा
मोदरभट्टकैरधिगतपरमार्थसार्थसंपत्तेः॥ धन्यस्यावनिपानामादेशा
दुमियजसवंतस्य॥२५॥ जसवंतभास्कराख्यं भास्करनामी निबंधमातनु
ते संतोषाय कवीनामालोच्य ग्रंथसंघातं॥२६॥ युग्मं कालनिर्णयमुदार
सागरं स्वस्य वीक्ष्य जडतां च मानसा॥ खेरमत्र खलु किं वृथा कथाभारदा
स्तितवपारदात्म संस्वे॥२७॥ सुमतिनास्ति नमेक वितानवानिजजनेः॥

३

सुकृतेन न कृतं मया मपि निबंध निबंधन चातुरी सज्जनतु कस्य लं ते व गुरोः
कृपा।२। एवं स संतोष मतो हृत्तकुमतयः शुद्धमतयः कृपापारावाराः मतन
तु विना भास्करकृते ।३। असाध्वी साध्वी वा वच नरत्वना स्योधितुमियं विना
वन्हि हेम्नो न भवति हि शुद्धिः क्वचिदपि पारथम्हि मह्नी कृपान्तुल्या स्वैरि
विरचलैर्यदि।। तान्दृतेयं कृतिस्तस्मादस्माकं हा निरस्ति कैं ।१०।। तत्र तावन्मा
सो निर्णीयते।। तत्र मंस्पते परिमीयत उ विन्युतस्यापरिच्छेदकत्रिंशत्तिथ्या
त्मककाल विशेष वक्ति यथोक्तं मंस्पते परिमीयते स्वकला वृद्धिहानितः
मास एतेस्मिन्तामासास्त्रिंशत्तिथिसमन्विता इति।। अस्य प्रयोगस्तु कुण्डपा
यीनामयने मासमग्निहोत्रं जुहोतीत्यादि।। स च तुर्धा सौरसावनचांद्र
नाक्षत्रभेदात्।। एषामुपयोगो ज्योतिर्गर्गेः।। सौरो मासो विवाहादौ यज्ञा
दौ सावनः स्मृतः।। आब्दिके पितृकार्ये च चांद्रो मासः प्रशस्यते।। मेषादि
सूर्यसंक्रांतेस्तत्तत्संक्रांत्यवधिः सौरः।। त्रिंशद्दिनात्मा सावनः।। पक्षद्वयेन चांद्रः
अयमपि द्विधा।। अमान्तः पूर्णिमान्तश्च।। अनयोश्चानुष्ठाने वचनविशेषाद्धि
ष्टाचाराच्च व्यवस्था यत्तु त्रिकांडमंडनः फलपक्षादिकं मासं नांगीकुर्वंतिके

वनामेवांछंतिन तेषामपीष्टो विंध्यस्य दक्षिणत इति। तत्तु केवलं व्यवहार
स्यानुवादकं। न तत्तु शास्त्रस्य व्यवस्थापकं। अन्यथा विंध्याद्दक्षिणदेशा
गतैरप्यथ युक्तं कृष्णपक्षे तु श्राद्धं कार्यं दिने दिने इति स्मरणान्महालयश्रा
द्धं कार्त्तिककृष्णपक्ष एव कर्त्तव्यं स्यादिति सर्वोपप्लवप्रसंगः। यत्तु विंध्या
दुत्तरतः शुक्लादिरेव मुख्यः। कृष्णादिर्गौण इति। तत्र श्रुतिस्मृतिव्यवहा
रस्योभयत्रापि तुल्यत्वेन कृष्णादेर्गौणत्वे प्रमाणाभावात्। तथा चाथर्व
णि कश्रुतौ कृष्णादिर्मास उक्तः। मासो वै प्रजापतिस्तस्य कृष्णपक्ष एव र
यिः शुक्लः प्राण इति। स्मृतावपि जयंती प्रकरणे। मासि भाद्रपदेष्टम्यां
कृष्णपक्षेर्द्धरात्रके। भवेत्प्रजापतिर्क्षं जयंती नाम सा स्मृतेति जयंत्या भा
द्रपदांतर्गतत्वोक्तेः स्पष्ट एव कृष्णादिर्मास उक्तः। भविष्योत्तरेपि। पौर्णमासीम
हाराज सोमस्य दयिता तिथिः। पूर्णो मासो भवेद्यस्मात्पौर्णमासी ततः स्मृतेति
ब्राह्मेपि। चैत्रे मासि जगद्ब्रह्मा ससर्ज प्रथमेहनि। शुक्लपक्षे समग्रे तु तदा सूर्यो
दये सतीत्यत्र शुक्लपक्षपदोपादानमहिम्ना मासस्य कृष्णादित्वं स्फुटमभिमतं
तस्मात्समप्राधान्यं तयोरिति माधवनिबंधे स्पष्टं। अस्तु सिद्धांते तु वर्णविरो

४

षाढ्य वस्थोक्ता। अमावास्यापरिच्छिन्नो मासस्याद्वा लग्नस्य तु संक्रां
ति पौर्णमासाभ्यां तथैव नक्षत्रपर्वेन्दुयोरिति। अनेन हि ह्रीचितिरष्टिकामा
य निधनं कुर्यादित्यादिना सोमरे हीषाढीनामिव श्राद्धानादिकार्त्तिककर्म
विशेषे यत्र मासः प्राप्तस्तत्रामावास्यान्ततादेर्नियममात्रं क्रियते॥ नाक्षत्र
मासस्य तूपयोगो विष्णुधर्मे नक्षत्रसत्राण्ययनानि चंद्रे मासे न कुर्यादुग
णस्यके नेति चंद्र संबद्ध नक्षत्रावच्छिन्नो भगणस्यको मासः। सौरो मासो वि
वाहादाविस्त्रादिपराद्यन्तः॥ विवाहव्रतयज्ञेषु सौरं मानं प्रशस्यते ति। अ
भ्यंगोक्तेः॥ यज्ञादौ सावनः स्मृत इत्यत्रादिपराच्छनूपासनादि। सावने
नैव कर्त्तव्या इत्युक्तरणं चाप्युपासने तिज्योतिर्गर्गे णोक्तत्वात्॥ एवं च यज्ञे सौ
रसावने यो श्रीहिमिर्यजेत ययवैर्यजेतेति वद्धिकल्पः। निरपेक्षसाधनत्वेस
से कार्थत्वात्॥ एवमन्यत्रापि यथासंभवमुह्यं। इति चतुर्विधमौ निरूपणं॥
अथ चांद्रमासस्य चैत्रादि फाल्गुनांता द्वादश संज्ञास्ताः चित्रादिनक्षत्रप्रयुक्ताः॥
यथा चित्रानक्षत्रयुक्ता पौर्णमासि यस्मिन्मासे स चैत्रो मास इत्यादि तदाह
भगवान् पाणिनिः। सास्मिन्पौर्णमासीति। इति चैत्रादिनामुपयोगस्त्वग्रे स्फु
टी भविष्यति॥ अथ मलमासः॥ अयं च कालाधिक्यान्मलत्वेन व्यवह्रियते। यथो

कंगस्यपरिशिष्टे॥ मलं वदंति कालस्य मासं कालविदोऽधिकमिति स द्वैधा
अधिमासक्षयमासभेदात्॥ तत्राद्यमाह॥ गुरुः॥ एकराशिस्थिते सूर्ये यदा दर्शद्व
यं भवेत्॥ हव्यकव्यक्रियाहंता स ज्ञेयोऽधिमासक इति॥ अस्यागमनकाल उक्तो
सिद्धांते॥ द्वात्रिंशद्भिर्गतैर्मासैर्दिनैः षोडशभिस्तथा॥ घटिकानां चतुष्केण पतति
ह्यधिमासक इति॥ इदं च वचनं ज्योतिःशास्त्रप्रसिद्धमध्यममानाभिप्रायं न
तु श्रौतस्मार्त्तकार्यानुष्ठानोपयुक्तं॥ पि तु स्फुटमानमस्मिंश्च कालकरणस्योक्तौ॥
मलमासः स विज्ञेयो मासे त्रिंशत्तमे भवेदिति॥ तच्छ्रौतस्मार्त्तोपयुक्तं॥ परं त्वेके
न त्रिंशत्स्वपतीनां मासानां मलमासत्वसंभवात् त्रिंशत्तमपदं तत्रस्थं तेषा
मुपलक्षणमित्यवधेयं॥ पौषादिरिक्तानां सर्वेषामेव मासानामधिमा
सत्वसंभव उक्तो॥ विष्णुधर्मोत्तरे॥ अष्टानां फाल्गुनादीनां प्रायो माघस्य च
क्वचित्॥ नपुंसकत्वं भवतीत्येष शास्त्रविनिश्चय इति नपुंसकत्वं॥ अधि
मासत्वं॥ असंक्रांतो यदा मासः कदाचित्तिथिर्द्धितः॥ कालांतरात्समाया
ति स नपुंसक इष्यत इति ज्योतिःशास्त्रानुसारात्॥ द्वितीयमाह॥ सत्यव्रतः
राशिद्वयं यत्र मासे संक्रमेत दिवाकरः॥ नाधिमासो भवेदेव मलमासः केवल
मिति॥ ज्यो॰ नि॰ सिद्धांतेषूक्तं॥ असंक्रांतिमासोऽधिमासः स्फुटः स्याद्द्विसंक्रांतिमा

५

10

सः क्षयाख्यः कदाचित्क्षयः कार्त्तिकादित्रये नान्यतः स्यात्र द्वावर्षम
ध्येधिमासद्वयंचेति॥ कार्त्तिकमार्गशीर्षपौषाख्य एव मासत्रये क्षयमासो
भवति न तु माघादिनवसु तदा तस्मिन्नेव वर्षेऽन्यदप्यधिमासद्वयं भव
तीति तद्दिगिष्टा॥ क्षयमासः कदाचिदेवायाति न तु पूर्वोक्ताधिमासवत्पुन
पुनरित्यर्थः॥ अस्यागमनकालः सिद्धान्तशिरोमण्युक्तः॥ गतोऽब्ध्यद्रि
नंदैर्मिते शककाले तिथिशैर्भविष्यत्यथांगाक्षसूर्यैः॥ गजाद्यग्निभूमि
स्तथा॥ प्रायशोऽयं कुवेदेंदुवर्षैः क्वचिद्गोकुभिश्चेति॥ अस्यार्थः चतुःसप्त
त्यधिकनवशता ९७४ वर्षपरिमिते शाके कश्चिद्भूतः कश्चित्तु पंचदशाधि
कशतयुक्तसहस्रा १११५ वर्षपरिमिते भविष्यति कश्चित्तु षट्पंचाश
दधिकशतद्वयोपेतसहस्रा १२५६ वर्षपरिमिते क्वचिदष्टसप्तत्य
धिकशतत्रयोपेतसहस्रा १३७८ वर्षपरिमिते कश्चित्तु एकचत्वारिंश
दधिकशता १४१ वर्षपरिमिते कश्चित्तु एकोनविंशति १९ वर्षपरिमितेषु
ति॥ अस्यैव क्षयमासस्य ज्योतिर्विदामंहस्पतिनाम्ना व्यवहारः इति मल
२ स्वरूप मासैर्निरूपितं॥ अथ मलमासस्वरूपं॥ हेमाद्रौ पाद्मे॥ अधिमासे तु सं
मासे गुरुसर्पिगुलानि च॥ त्रयः स्त्रियोऽरदरूपानि दातव्यानि दिने दिने॥

सान्यानि गुडमिश्राणि ॥ अधिमासे त्वपोत्तमः ॥ अधिमासे तु संप्राप्ते
त्रयस्त्रिंशत्ति देवताः ॥ ३ ॥ द्विजायापूपदानेन ह्यच्छिद्रानफलं लभेत् ॥ त्र
त्रयस्त्रिंशद्देवतास्तु का एव श्रूयतां च बृहदारण्यके पंचमपाठके न
नवमब्राह्मणे याज्ञवल्क्यं प्रतिपाज्ञवल्क्येनोक्तं ॥ त्रयस्त्रिंशत्त्वेव देवता ॥ इति
कतमे त्रयस्त्रिंशदित्यष्टौ वसव एकादश रुद्रा द्वादशादित्यास्त एकत्रिंशा
दिंद्रश्चैव प्रजापतिश्च त्रयस्त्रिंशाविति त्रयस्त्रिंशद्रूपान्नं कांस्यपात्रे नि
धाय च ॥ सघृतं सहिरण्यं च ब्राह्मणाय निवेदयेत् ॥ तत्र मंत्रः ॥ विष्णुरूपी
सहस्रांशुः सर्वपापप्रणाशनः ॥ अपूपान्नप्रदानेन मम पापं व्यपोहतु
नारायण जगद्बीज भास्कर प्रतिरूपभृत् ॥ तेनानेन तु पुत्राश्च संपदं चाभि
वर्द्धय ॥ यस्य हस्ते गदाचक्रे गरुडो यस्य वाहनं ॥ शंखः करतले यस्य स मे वि
ष्णुः प्रसीदतु ॥ कलाकाष्ठादिरूपेण निमेषघटिकादिना ॥ यो वंचयति भूतानि
तस्मै कालात्मने नमः ॥ कुरुक्षेत्रमयो देशः कालः पर्व द्विजो हरिः ॥ पृथ्वीस
ममिदं दानं गृहाण पुरुषोत्तम ॥ मलानां तु विशुध्यर्थं पापप्रशमनाय च
पुत्रपौत्राभिवृध्यर्थं तव दास्यामि भास्कर ॥ मंत्रेणानेन यो दद्यात्त्रयस्त्रिंश
दपूपकान् ॥ प्राप्नोति विपुलां लक्ष्मीं पुत्रपौत्रादिसंपदः ॥ इति मलमा

सकृत्स्ना॥ अथ तत्र देवार्को लोसंकीर्त्य विपुललक्ष्मीपुत्रपौत्रादिसंपत्सुखी
दानफलप्राप्त्येसकलमलविशुद्धिद्वारा त्रयस्त्रिंशद्देवताप्रीतये त्रयस्त्रिंश
दपूपानसहिरण्यान् सघृतान् कांस्यपात्रविनिःष्टान् ब्राह्मणायसंप्रददे इति
संकल्प्य ब्राह्मणं संपूज्य तस्मै मापूपपात्रं पूर्वोक्तमंत्रैर्दद्यादिति तत्र योगः
अथ मलमासे विशेषः रुद्र मिहिरः मेषादिमिथुनांतेषु यदास्त्रो द्वयं भवेत्
अद्भांतरे तदावर्षं मिथुनार्के हरिः स्वपेत् कर्कटादित्रिके चापि यदास्याद् द्वि
यं भवेत् अद्भांतरे तदावर्षं कर्कटार्के हरिः स्वपेदिति॥ अथ मलमास
कर्त्तव्यानि काटकगृह्ये॥ मलेनन्यगतिं कुर्यान्नित्यां नैमित्तिकीं क्रियामिति
नित्यां संध्यावंदनादिकां॥ तथा गृह्यपरिशिष्टे॥ अवषट्कारहोमाश्च पर्व
चाग्रयणं तथा॥ मलमासेनु कर्त्तव्यं काम्या इष्टी विवर्जयेदिति॥ अवषट्कार
होमाअग्निहोत्रोपासनवैश्वदेवादयः पर्वदर्शपौर्णमासौ॥ पार्वणस्थाली
पाकश्च एतेषामकरणे प्रत्यवायश्रुतेर्नित्यत्वादनन्यगतिकत्वाच्च
मलमासेपि कर्त्तव्यता॥ नैमित्तिकी॥ ग्रहणस्नानादिकां॥ तदाह यमः
चंद्रसूर्यग्रहे स्नानं श्राद्धदानजपादिकं॥ कार्याणि मलमासेपि नित्यं नैमि
त्तिकं तथेति॥ तथा स्मृत्यंतरे॥ श्राद्धं जातकनामानि यच्च संस्कारसंयुतं मलि

(14)

स्तुचेपि कर्त्तव्याः काम्यादृष्टि अवर्जमेवेति॥ श्राद्धं जातकर्मादिसंबंधि च
ह्विश्राद्धं॥ जातकर्मणि मधुघृतं मिल्यादिस्य संतर संवादात्॥ संस्काराः ग
र्भाधानादयः॥ चौलान्तं वर्त्तिनः प्रयुक्ते दीपिकायां॥ गर्भाधाने मुखं च वौ
लविधितः प्राशित्यादि मलेप्यान्वरेदिस्य न्यः॥ सत्रताश्चातुर्मास्यव्रतादयः
यमः॥ गर्भे वार्धुषिके प्रत्येश्राद्धकर्मणि मासिके॥ सपिंडीकरणे नित्ये नाधि
स्नामं विवर्जयेत्॥ तीर्थस्नानं जपो होमो पवत्री हितिलादिभिः॥ भालकर्मा
त्यकर्माणि नवश्राद्धं तथैव च॥ मघात्रयोदशी श्राद्धं श्राद्धान्यपि च षोड
श इति॥ मासिके श्राद्धकर्म नित्याश्रमावास्या श्राद्धारभ्य दर्शेष्य हरहः
श्राद्धं हानं च प्रतिवासरं॥ गोभूतिलहिरण्यानां मासेपि स्यान्मलिम्लुचे
इति॥ मात्स्योनेकशः काम्यं नैव कर्त्तव्यमिति वक्ष्यमाणत्वाच्च॥ नित्यो॥ नित्यदाने
होमोत्रोपासनहोमः॥ अंत्यकर्माणि दहनादीनि नवश्राद्धं॥ प्रथमादि दिव
सगतं निधनादि स्थानीयं प्रेतश्राद्धं॥ षोडशश्राद्धानि॥ एकादशाहादि दिवस
गतानि॥ मरीचिः॥ रोगे चालभ्ययोगे च सीमंते पुंसवेपि च॥ प्रदद्यादिति समुद्दिष्टं
सर्वत्रापि न दुष्यतीति॥ अलभ्ययोगः पद्मकादिः॥ कौधुमिः॥ अपूर्वं मंत्र
घटं दद्यादन्नं वापि सुसंवित्तौ॥ संवत्सरे विवृद्धेपि प्रतिमासं च मासि

कर्मिणि॥ गर्भस्थि॥ एकोद्दिष्टं तु यच्छ्राद्धं तन्नैमित्तिकमुच्यते॥ तत्कार्यं पू
र्वमासे च कालाधिक्ये च धर्मतत्त्वे ति॥ मरीचिः॥ प्रतिमासं मृताहे च श्राद्ध
च प्रतिवत्सरं॥ मन्वादौ च युगादौ च मासयोरुभयोरपीति॥ अत्र प्रमुद्दम
सम्मृतस्य संवत्सरश्राद्धं प्रथमाब्दिकमेव ग्राह्यं॥ आब्दिकं प्रथमं यस्या
त्तु र्विनमलिम्लुचे ति तिसम्बन्धरोत्तुसारात्॥ द्वितीयाब्दिकं तु न॥ वर्षे
वर्षे तु यच्छ्राद्धं मातापित्रोर्मृतेऽहनि॥ मलमासे न कर्तव्यं व्याघ्रस्य वचनं
यथेति॥ सत्यव्रतोक्तेः॥ मलमासे मृतानां तु यत्पुनः स एव मसलमासस्तु वा
तत्रापि श्राद्धं कुर्यात्॥ मलमासमृतानां तु श्राद्धं यत्प्रतिवत्सरं॥ मलमासे
पि कर्तव्यं नान्येषां तु कथंचनेति॥ पैठीनसिस्मरणात्॥ तथा वायवीये॥ ग
यायां सर्वकालेषु पिण्डं दद्याद्विचक्षणः॥ अधिमासे जन्मदिने अस्ते च गु
रुशुक्रयोः॥ न त्यक्तव्यं गयाश्राद्धं सिंहस्थे च बृहस्पतौ॥ इति मलमासे क
र्तव्यानि॥ अथ निषिद्धानि॥ काठकगृह्ये॥ सोमयागादिकर्माणि नित्यान्य
पि मलिम्लुचे॥ षष्ठीयाग्न्याधानचातुर्मास्यादिकामपि॥ महालयाष्ट
काश्राद्धोपाकर्माद्यपि कर्म यत्॥ स्पष्टमासविशेषाख्याविहितं वर्जयेन्म
लि रता॥ यत्तु नित्यनैमित्तिके कुर्यात्॥ प्रयतः सन्मलिम्लुचे इत्यादिमलि

वचने निरस्तान्यपि कर्तव्यानीत्युक्तं तदनन्यगतिककर्मविषयं। सोमयागा
दीनि तु सगतिकानि वसंतादौ विहितानां तेषां पुरुषमासे नुष्ठानसंभवात्
एवं वैश्वानरं द्वादशकपालं पुरोडाशं निर्वपेत् पुत्रे जाते इत्यादिश्रुतिवि
हितानां नैमित्तिकानामपि जातेष्ट्यादीनां सगतिकत्वेन मलमासे निषेध इ
ति ज्ञेयं। ननु पुत्रजननानंतरं यद्यधिकं भवति तर्हि चेत् किं ततः न हि मल
मासाभावे पुत्रजननाव्यवहितकाले सानुष्ठीयते सुचिनाशरूपांगाभावे गुणप्रा
र्थमानुलोभ्योत्तरं तस्यानुष्ठानमिति चतुर्थे सिद्धांतितत्वात् न त्वेवमाग्रय
णेष्टेः पर्व चाग्रयणं तथेति॥ गृह्यपरिशिष्टे कथं कर्तव्यता नेति चेत् शृ
णु अतिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीति च द्विहि
तप्रतिषिद्धत्वे न वैकल्पिकत्वं तस्यापरं तु तत्र विकल्पे प्यव्यवस्थाबो
ध्या दुर्भिक्षेण पुरातनधान्यालाभे जीवनानिर्वाहवशाद्दस्यासनो
स्यान्नवान्नभक्षणाधिकारार्थमावश्यकत्वान्मलमासे थाग्रयणस्य क
र्तव्यतोक्तिः निषेधस्त्वनापद्विषय इति॥ यत्तु कालादर्शे कारणे महाल
यपुगादिष्विष्ट्यादिरित्यर्थे न महालयस्य मलमासे कर्तव्यत्वमुक्तं तद्विसं
महालयाष्टकाष्टकेत्यादि पूर्वोदाहृतकाटकगृह्यविरोधात् हेमाद्र्यादि तथा

१ श्रा

सोममग्न्याधेयंमहालयंराज्याभिषेकंकाम्यंचनकुर्याज्ज्ञानुलंघितइति

न्यगुवचोविरोधात्॥परपिकालादर्शग्रंथमाचक्षाणोमाधवाचार्यैर

क्तंमहालयपदेनतीर्थविशेषोमघात्रयोदशीवाविवक्षणीयेति॥तदे

पिग्रंथछायांनपुष्याति॥महालयेतिनाम्नःसमुदायस्यापरपक्षस्याद्दृएव

प्रसिद्धत्वेनावयववृत्त्यातीर्थादिपरतायाअसामंजस्यात्॥अन्यथा

रथकाराधिकरणविरोधः॥७॥अथलक्षणयातीर्थादिपरत्वमितिचेत्

हिलक्षणावदोषाःयदुक्तंमीमांसाभाष्ये॥स्वाधीनेशब्दप्रयोगेकिमिस

ह वाचकंप्रयोक्ष्यामइति॥अथोपाकर्मादिइत्सादिपरादुत्सर्जनं॥उपाकर्म

तथोत्सर्गकाम्यमुत्सवमः॥काः॥मासवृद्धोपराकार्याइत्सादिहरीतोक्तेः॥छं

दोगानांतुनायंनिबंधः॥तेषांसिंहार्कएवोपाकर्मादिविधानात्॥अतएव

ष्यश्रृंगाः॥दक्षिणाहाराहुमुनोत्कर्षश्चतुष्पुपियुगादिषु॥उपाकर्मसदावर्षाहृ

तदिष्टंवृषादितइतिकेचिन्नत्॥श्रावण्यांश्रावणंकर्मयथाविधिसमाचरेत्॥

उपाकर्मतुकर्तव्यंकर्कटस्थेदिवाकरइतिनिगमोक्तेः॥सामगभिन्नानाममि

कर्कएवोपाकर्मविधानेनोत्कर्षानापत्तेः॥तस्मात्सर्वेषामुत्कर्षमाहकात्या

यनः॥उत्कर्षःकालवृद्धौस्यादुपाकर्मादिकर्मणीति॥ज्योतिःपराशरोपि॥उ

17

पाकर्म तथोत्सर्गप्रसवाहोत्सवाष्टकाः ॥ मासवृद्धौ पराः कार्या वृद्ध्यादिरिति
त्तेः ॥ वर्जयित्वा तु पैतृकमिति ॥ उत्कर्षनिषेधात्तु निर्मूलः ॥ प्रत्युपाकर्म महालयवर्षा
पथोत्कर्षस्तथा रत्नाकरास्त्र कर्षोनास्तीत्येवं व्यारभ्यत्यन्याः ॥ नस्तन स्तु श्रा
वण्यां श्रावणकर्मेत्यादि निगमोक्तः ॥ कर्कस्थे सूर्ये उपाकर्मविधिर्देऽत्र विरुद्धे
सामगानस्यैव युक्तः ॥ पदार्थ प्रयोगपारिजाते बृहस्पतिः ॥ नर्मदोत्तरभागे नु क
र्तव्यं सिंहयुक्ते कार्कि कर्कटे संस्थिते भानावुपाकुर्यात्तु दक्षिण इति ॥ हेमाद्र्या
दृश्योप्येवमेवापिप्रायंति ॥ काम्यकर्म निषेधति ॥ जाबालिः ॥ तिथिनक्षत्रवारो
क्तं काम्यं नैव कर्तव्यं च नेति ॥ अत्र पंच काम्यकर्म निषेध आरंभसमाप्तिविषयः
असंक्रान्तिनामले मासा न तेषु ॥ समंतलः ॥ अनानाचैव यज्ञानो मारंभश्च समा
पनमिति स्मृत्यन्तरानुसारात् ॥ आवर्तकं तु काम्यं रक्षोघ्नीष्ट्यादि आरंभ
णीयाः ॥ एतेनेष्ट्यादि सर्वं काम्यं च मलमासे विसर्जयेदित्यादि निषेधात् अपिवा
रब्धानाप्यनुप्रवृत्तं मलमासे प्राक् काम्यकर्म समापितं ॥ आगते मलमासे पि
तत्समाप्तिर्नसंभाव्य इति काटकगृह्यं ॥ तत्सावनमासप्रवृत्ते कृच्छ्रादिविषयं
अत एव कालादर्शे ॥ आरंभं दर्शपूर्णेष्ट्योरग्निहोत्रस्य चादिनं ॥ प्रतिष्ठानं
च कर्म या मलमासे विवर्जयेदिति ॥ तथा व्यूह मनुः ॥ वेदव्रतवृषोत्सर्गचूडा
करणमेखलाः ॥ मांगल्यमभिषेकं च मलमासे विवर्जयमिति ॥ कुथुमिः ॥ २४

वाप्यथवा पूर्त्तं तन्न कुर्यान्मलिम्लुचे इति॥ स्मृत्यंतरे॥ वापीकूपतडागादि
प्रतिष्ठा यज्ञकर्म च॥ न कुर्यान्मलमासे च महादानव्रतानि चेति॥ महादानानि
तुलापुरुषादीनि॥ ज्योतिःपुराणे॥ असंक्रांते प्रकुर्यात्तत्र दहनमदनं वा कृतं न
नमेव वा॥ सुजनमध्यजसंस्यान्नोपवासः कृतो भवेत्॥ न यात्रा न विवाहः कृतं न
चवास्तुनिवेशनं॥ न प्रतिष्ठां च देवानां प्रासादग्राममध्यहं॥ नहि रण्पनवासां
सिकारयेदिति निश्चयः इति॥ दिवोदासीये॥ यात्रोत्सवं च देवादि त्रापर्थं दिग्यमे
च मलमासे न कुर्वीत व्यासस्य वचनं यथेति॥ ज्योतिःपराशरः॥ रविणालंघितो
मासश्चांद्रः ख्यातो मलिम्लुचः॥ तत्र यद्विहितं कर्म उत्तरे मासि कारयेदिति॥ ए
षएव च क्षयमासेपि निर्णयः॥ रविसंक्रमहीने यो वर्ज्यावर्ज्यविधिः स्मृतः॥ स ए
व वृद्धिसंक्रांते मलमासे पुरीरितः इति॥ काठकगृह्ये॥ क्षयमासमतौ तिथयः पू
र्वोत्तराद्धाभ्यां पूर्वोत्तरयोर्मासयोर्व्यवस्था॥ तिथ्यर्द्धे प्रथमा पूर्वो द्वितीयेर्द्धे तदु
त्तरः॥ मासा इति बुधैश्चिंत्यो क्षयमासस्य मध्यगाविति स्मृतेः॥ मलमास निषिद्ध
मन्यत्राप्यतिदिशति॥ बृहस्पतिः॥ बाले वा यदि वा वृद्धे शुक्रे वास्तंगते गुरौ॥ म
लमासइवैतानि वर्जयेद्देवदर्शनमिति॥ इति मलमासनिर्णयः॥ अथ पक्षः॥ स
च पक्ष्यते परिगृह्यत इति व्युत्पत्त्या पंचदशाहोरात्रात्मकः कालविशेषः तिथि
समूहो द्विधा कृष्णशुक्लभेदात्॥ तदुपयोगो रत्नमालायां॥ उभौ निरुक्तौ खलु शुक्ल

कस्मोशुभाशुभे कर्मणीतो मन्त्राम्लाविति। माधवीयेपि दैवे मुख्यः शुक्लपक्षः

कृत्स्नः पित्र्ये विशिष्यत इति। इति पक्षनिर्णयः। अथ तिथिनिर्णये च कुमारो

तिथिवेधो निर्णीयते। पैठिनसिः। पक्षद्वयेपि तिथयः तिथिं पूर्वां न चोत्तरां

त्रिभिर्मुहूर्तैर्विध्यंति सामान्योयं विधिः स्मृत इति। अहोरात्रे वापि च रस्त्रीणा

गोमुहूर्त्तः। तथा विधोक्तिमुहूर्त्तैः सूर्योदयादूर्ध्वं पूर्वतिथ्यास्सूर्यास्तात्प्राक्

उत्तरतिथ्याश्च वेधः सामान्यरूपः। पस्कमरुन्नरत्नाकरे द्विमुहूर्त्तोपि प्राप्तवेध

उक्तः। उदिते दैवतं भानौ पित्र्यं चास्तमिते रवौ। द्विमुहूर्त्तं त्रिरन्हश्च सा ति

थिर्हव्यकव्ययोरिति। विष्णुधर्मे निरात्सोयमनुक्तः। माधवोपि व्रतोपवासनि

ममे घटिकं कापि या भवेत्। उदये सा तिथिः सत्र विपरीता तु पैतृके। तदुक्तस्यादि

वचननियमः सोपि दैवेष्वानराधिकरणन्यायेनावयवस्तुत्यावयविनं त्रि

मुहूर्त्तवेधमेव स्तौतीति केचिद्वाकुर्वता भिस्यात्। एवमपि हि बहूनां वचनानां

मानर्थक्यं भवति। न चैवं यदृष्टाकपालो भवति। गायत्र्यैवैनं ब्रह्मवर्चसेन पु

नातित्यादीनामपि तदापत्तिः। तेषामनुसन्ति वाक्यानि। षड्द्वादशादमाभपालस्य गु

णावलम्बत्वेनाभिधायां गंवाजिनस्येव निवेशसंभवात् उपक्रमोपसंहारात गति

त्वेन विध्यंतरशेषत्वाभावाच्चागत्यावयविस्तावकत्वमंगीकृतं व्रतोपवास

नियमे इत्यादिवाक्यानां त्वस्ति गतिः। तथा हि। एकादश्यां दशमी संबंधो यत्र

घटिकामात्रमपि सूर्योदये स्यात्तदा तत्रैकादश्युपवासनिषेधकत्वं तेषा
मुच्यते। एतेन घटिकार्द्धं त्रिभागं वा स्वल्पं वा दूषयेत् तिथिः पंचगव्यघटंष्
र्णसुरायाबिंदुके यथेति। त्रिंशन्मतवचोपि व्याख्यातं। यद्वा। यत्त्रयोदश्यां
तिथिर्गृहीता षष्ट्योदयस्था सदा पूज्या हरिनक्तव्रते तिथिरिति हरिनक्तादौ
तद्विषयं। सायंवेधस्तु त्रिमुहूर्त एव यां प्राप्यास्तमुपैत्यर्कः सा चेत्स्यात्त्रिमु
हूर्तगा। धर्मकृत्येषु सर्वेषु संपूर्णां तां विदुर्बुधा इति। निर्णयरहस्यात्तु तिथि
विशेषे निषेधप्रयोजको वेधः। यथा कामी चतुर्दशी पंचमी च तथा चद्रामी
तिथिः। पूर्वां तिथिं दूषयंति त्रिभिरेव मुहूर्तकैरिति वेधविज्ञापकं स्कांदे। ना
गाष्टादशनाडीभिर्दिक् पंचदशभिस्तथा। भूतोष्टादशनाडीभिर्दूषयत्युत्तरां
तिथिमिति। नागपंचमी दिक् दशमी। भूतश्चतुर्दशी। उत्तापस्फोटकं इति
वेधः। अथ सामान्यतः सर्वतिथिनिर्णयः। तत्र तावत्तिथिशब्दार्थ उक्तः। तन्यं
ति कलया यस्मात्तस्मात्तास्तिथयः स्मृता इति ताश्च षोडशात्र दुर्ते स्कांदे अमा
दिपौर्णमास्यंता या एव शशिनः कलाः। तिथयस्ताः समाख्याताः षोडशैव वरानने
इति। ताश्च द्विविधा पूर्णाः खंडाश्च आद्या उक्ताः स्कांदे। प्रतिपत्प्रभृतयः स
र्वा उदयादोदयाद्रवेः संपूर्णा इति विख्याता हरिवासरवर्जिता इति। औदयात्

ऽप्रास्तु याउतिमर्यादायामाह॰ हरिवासर एकादशी नदीनराखंडाशतत्रपूर्णा
सुसंदेहाभावादहोरात्रदृष्यवर्तिन्य एव निर्णयाभावात्सामपिकर्मांगतया विधानात्
तथा च गार्ग्यः॥ विधिः पूज्यतिथौ तत्र निषेधा कालमात्रकइति तथा योपस्य विहितः
कालस्तत्कालव्यापिनी तिथिरिति स्कांदे॥ मन्वादौ च युगादौ च ग्रहणे चंद्रसूर्ययोः
व्यतीपाते वैधृतौ च तत्कालव्यापिनी क्रिया॥ अभ्यंगे चौरधिस्नाने दंतधावनमै
थुने॥ जाते च मरणे चैव तत्कालव्यापिनी तिथिरिति नारदः। पारणे मरणे नृणां
तिथिस्तात्कालिकी स्मृतेति॥ अथ प्रतिपन्निर्णीयते। शुक्लप्रतिपत्पूर्वविद्धा ग्राह्या
पडुक्ते निगमे। युग्माग्नियुगभूतानां षण्मुन्योर्वसुरंध्रयोः। रुद्रेण द्वादशी युक्ता
चतुर्दश्यां च पूर्णिमा॥ प्रतिपद्यप्यमावास्या तिथ्योर्युग्मं महाफलं॥ एतद्व्यस्तं महा
दोषं हंति पुण्यं पुराकृतमिति॥ युग्मं द्वितीया॥ अग्निस्तृतीया॥ युगं चतुर्थी॥ षट् ष
ष्ठी मुनिः सप्तमी॥ वसुरष्टमी॥ रंध्रं नवमी॥ रुद्र एकादशी॥ अत्र पूर्वोत्तरविद्धत्व
पूर्वविद्धत्वे अमावास्याविद्धाया एव प्रतिपदो ग्राह्यत्वमुक्तं। पैठीनसिः॥
प्रतिपन्नवमी चैव कर्त्तव्या संमुखी तिथिरिति॥ संमुखत्वं तु स्कांदे उक्तं॥ संमुखी
नाम सायाह्नव्यापिनी दृश्यते यदा॥ प्रतिपत्संमुखी कार्या या भवेदापराह्णिकी ति
कृष्णप्रतिपत्तु परविद्धा तस्या विमुखत्वेन संमुखी कार्यैस्य स्माप्रदृते॥ अत एवाप
रत्वं वा प्रतिपत्सद्वितीया स्याद्वितीया प्रतिपद्युतेति॥ हेमाद्रिमाधवादयोप्येवं॥

२१

अथ प्रतिपत्कृत्यं । वह्निपुराणे । प्रतिपद्यग्निपूजा स्यादिति । तद्विधानं रेणु-
दान मप्युक्तं । प्रतिपत्सु द्विजान्संपूज्य पूजयित्वा प्रजापतिं । सौवर्णमरविंदं च
कारयित्वाष्टपत्रकं ॥ कृत्वा चौदुंबरे कांस्ये पात्रे सुगंधघृतपूरिते । पुष्पैर्धूपैः
पूजयित्वा विप्राय प्रतिपादयेत् । औदुंबरं ताम्रमयं । एतच्च द्वितीयाविद्धायां
कार्यं ॥ योर्वा त्विह कास्तु तिथ्योर्दैवे कार्ये फलप्रदा इति । याज्ञवल्क्योक्तेः । एतेन
पूर्वविद्धायामेव प्रतिपदि कार्यमिति । निर्णयामृतोक्तमनादेयं । कर्मकालव्या-
प्तिवचनात् युग्मवाक्यस्य निर्बलत्वात् ॥ अथ प्रतिपद्विवर्ज्यं । यथा मरीचसंग्रहे
तैलं दंतं तिलं मिश्रौरं कूष्मांडाध्ययनांगनाः । दंतकाष्ठं पूर्वगतिं मांसं वा प्रतिथौ
त्यजेत् ॥ अथ द्वितीया । सापरा युग्माग्निरिति युग्मवाक्यात् । यत्तु हेमाद्रौ द्विती-
यां प्रतिपद्युक्तां आपस्तंबवचसः कृष्णपक्षविषयत्वं युग्माग्नित्यस्य शुक्लपक्षवि-
षयत्वं चाभिप्रेत्य कृष्णा पूर्वा शुक्ला परेत्याह । तन्न । एकादश्यष्टमी षष्ठी द्वितीया च
चतुर्दशी । त्रयोदशी अमावास्या उपोष्याः स्युः परान्विता इति । सामान्यतो विष्णुध-
र्मोत्तरे परविद्धाया विधाने नोक्तव्यवस्थाया अयुक्तत्वात् । आपस्तंबवचसः
का गतिरिति चेन्न । उच्यते । श्रावणादिमासासितद्वितीयाविहितशून्यशयनादि-
तविषयत्वात् । कृष्णाष्टमी कृष्णलक्ष्म्यास्सा विद्धीव रपेत्क्षकी । कामत्रयोदशी रंभातृ-
तीया पोष्याः सर्वसंयुता इति वचनांतरसंवादेन तत्र पूर्वविद्धा एवोविंसाता अनंतभ-

स्याधवारेपोपि सर्वा द्वितीया परा मता ॥ अथ द्वितीयाकृत्यं ब्रह्मपुराणे ।
द्वितीयायां चैवेधसं दद्यादिति भुजे ससनुषंगः । अन्यत्तत्रैव तु द्वितीया तु श्रियः स्मृता तिथी
पूजोक्ता ॥ अथ वर्ज्यसंग्रहः । द्विजानां मंगलस्नानं स्नानं वामलकैः समं द्विती
यायां तथा स्त्रीरत्यां ज्यं च बृहती फलं । अथ तृतीया सा तु रंभातिरिक्ता परा
रंभाख्यां वर्ज्ययित्वैकां तृतीया द्विजसत्तम । अन्येषु सर्वकार्येषु गणयुक्ता प्र
शस्यत इति । अत्रैव वर्त्तनारंभातृतीयां ज्येष्ठशुक्लतृतीयायां विहितां तत्र तु पूर्वैव
गौरीव्रते तु मुहूर्त्तमात्रापि परैव । उक्तं माधवीये मुहूर्त्तमात्रसत्वेपि दिने गौ
रीव्रतं परे । शुद्धाधिकायामप्येवं गणयोगप्रशंसनादिति । अथ तृतीयाकृत्यं
वह्निपुराणे । गौर्याः स्तत्पूर्ववासर इति । चतुर्थी पूर्वदिने गौर्याः पूजेत्यर्थः । अ
थ वर्ज्यं तृतीयायां स्वजेत्तैलं लवणं मांसमेव च । स्नानमामलकैश्चापि न कु
र्यात मतिमान्नरः ॥ अथ चतुर्थी सापि परा । युगभूतानामिति युग्मवाक्यात् ॥
एकादशी तथा षष्ठी अमावास्या चतुर्थिका । उपोष्याः परसंयुक्ताः पराः पूर्वेण
संयुता इति बृहद्वसिष्ठोक्तेश्च ॥ अथ चतुर्थीकृत्यं वह्निपुराणे । चतुर्थ्यां गण
नाथस्येति । मत्स्यपुराणे विधानविशेषः । चतुर्थ्यां नक्तभुक् कृत्वा यावद्वर्षांते हे
मवारणं । व्रतं वैनायकं नाम शिवलोकफलप्रदमिति । काशीखंडे तु दुंढिपा
त्रोक्ता कुमार्यास्त्रीति चतुर्थीकल्पानां विघ्नश्रितुः सेरा । आहलम्भः स्त्वेदु हेम्नाहे

१२

25

या वेदशिणामुरेति। भौमवासरयोगेऽत्रैव स्नानं त्वियमतिप्रशस्ता। तथा बाह
स्पत्यः। अमावास्या तु सोमेन सप्तमी भानुना तथा। चतुर्थी भूमिपुत्रेण सोम
पुत्रेण चाष्टमी॥ चतस्रस्तिथयस्त्वेतास्सूर्यग्रहणसन्निभाः॥ स्नानं दानं तथा
श्राद्धं सर्वं तत्राक्षयं भवेदिति। अथ चतुर्थी। चतुर्थीश्वर तेला ईत गणेश चतु
लकं साज्यमिसंतु वंगः। अथ पंचमी॥ सा तु पूर्वा युगग्म्यलानामिति युग्मवाक्या
हेमाद्रिमते तु। कृष्णपक्ष एव पूर्वा शुक्ले तु परेति। तरस्तु। चतुर्थीसंयुता कार्या
पंचमी परया न तु। दैवे कर्मणि पित्र्ये च शुक्लपक्षे तथासिते इति। हारीतेन पक्षद्व
येपि पूर्वाया एव विधानात्॥ यत्तु पंचमी तु प्राक्कर्त्तव्या षष्ठ्या युक्ता तु नारदेनापि
लं बवचनं तं नागपूजाविषयं। तत्र [illegible] स्कन्दे श्रावणे पंचमी शुक्ला संप्रो
क्ता नागपंचमी। तां परित्यज्य पंचम्यश्चतुर्थीसहिता हिता इति। अथ पंचमीकृत्यं
वह्निपुराणे। शेषादीनां फणीन्द्राणां पंचम्यां पूजनं भवेदिति। अथ व्रतोत्तेला
भ्यंगो गगनावर्ज्याः सुधिभिः पंचमीतिथौ॥ अथ षष्ठी। सा तु परा षण्मुन्यारिति यु
ग्मवाक्यात्। नागविद्धा तु कर्त्तव्या षष्ठी तु न कदाचनेति। सप्तमीसंयुता कार्या षष्ठी
धर्मार्थचिंतकैरिति। स्कान्दे च। तत्र वेधः षण्मुहूर्तो नागो द्वादशनाडिभिरित्यु
क्तेः। आषाढशुक्लषष्ठ्यां विहितस्कन्दव्रतमात्रे तु पूर्वेति वक्ष्यामः॥ अथ षष्ठीकृत्यं
वह्निपुराणे। षष्ठ्यां पूजा गुहस्य चेति। रविवारयोगे चंपालोलार्कयात्रोक्ता काश्यां

त्रीखंडे॥ कृतानि यानि पापानि नरैः संवत्सरैरपि॥ नश्यंति क्षणतस्तानि ष
ष्ठ्यर्के लोलदर्शनादिति॥ अथवर्ज्यानि तैलकाष्ठतरुच्छेदमभ्यंगं मांसमंगनं
क्षौरमामलकैः स्नानं षष्ठीतिथ्यां नरस्त्यजेत्॥ अथ सप्तमी॥ सा तु पूर्वा वाप
रमुत्यो क्षिति॥ युग्मवाक्यात्॥ पूर्वविद्धा द्विजश्रेष्ठ कर्तव्या सप्तमी तिथिरिति
ब्रह्मभविष्यत्पुराणाभ्यां च॥ सप्तमी नाष्टमीयुक्ते तिब्र ह्लैवेवर्त्ताच्च॥ अथ स
प्तमी कृत्यं॥ वह्निपुराणे॥ सप्तम्यां भास्करस्य चेति॥ पूजेत्यनुषंगः॥ रविवारयो
गे त्वस्यां स्नानदानादेर्महत्फलमिति॥ चतुर्थीनिर्णये निरूपणापि॥ अथ वर्ज्यं
स्नानमामलकैर्निंबमसूरकळमंजनं॥ ताम्रपात्रान्नं नीलीवस्त्रं
च तिलतर्पणं॥ तैलस्पर्शं च सप्तम्यां तिलपिष्टं च संत्यजेत्॥ अथाष्टमी॥ सा
कृष्णपक्षे पूर्वा शुक्लपक्षे परा॥ कृष्णपक्षेष्टमी चैव कृष्णपक्षे चतुर्दशी॥ पू
र्वविद्धा प्रकर्तव्या परविद्धा न कुत्रचित्॥ शुक्लपक्षेष्टमी चैव शुक्लपक्षे च
तुर्दशी॥ पूर्वविद्धा न कर्तव्या कर्तव्या परसंयुते॥ इति निगमवचनात्॥ एवं हि
वसुरंध्रयोरिति युग्मवाक्यं शुक्लपक्षविषयतया संकोचनीयं॥ अथाष्टमी
कृत्यं॥ वह्निपुराणे॥ अष्टम्यां च चतुर्दश्यां पूजा प्रोक्ता त्रियस्यवेति॥ पाद्मे
तु॥ अर्द्धनारीश्वरपूजोक्ता॥ अष्टमी नवमीविद्धा नवमी चाष्टमीयुता॥ अर्द्धे

अर्धनारीश्वरप्राया तु उमामाहेश्वरी तिथिः॥ अष्टमीनवमीयुग्मे महोत्साहेम
होत्सव॥ त्रिवर्गस्या॥ त्रिवर्षेत्र पक्षयोरष्टमीरपीति। भोजराजीये तु उक्तं
अष्टम्यां पूज्य नेरष्टोन वम्यां तु कि रुच्यते॥ हर्यगे तु मासे पूजायां तु महत्सु के
मिति॥ अत्र कृत्स्ने पूर्वाष्टमीति। सामान्यनिर्णयबाधः स्पष्टः। स्कान्दे तु॥
दुर्गां भैरवयोर्यात्रोक्ता॥ अष्टम्यां च चतुर्दश्यां रविभौमवारे विशेषतः॥ सं
पूज्य सततं कारुण्यं दुर्गां दुर्गार्तिनाशिनीं॥ अष्टम्यां च चतुर्दश्यां पारविप्रमि
जवा सेरामात्रां च भैरवी कृत्वा सर्वपापैः प्रमुच्यते इति। बुधयोगे तु स्यात्
नदानादे महाफलमुक्तं प्राक्। प्रतिमासं यत कृष्णपक्षाष्टम्यां जन्माष्टमीव्र
तमुक्तं। वह्निपुराणे॥ प्रतिमासं च वै तेषु जामष्टम्यां यः करिष्यति। मम वै वाधि
तान्कामान् स संप्राप्त नसंशयः॥ अनेन विधिना यस्तु प्रतिमासं नरेश्वरः॥
करोति वत्सरे पूर्णे यावद्रागमनेहरे॥ दद्याच्छय्यां ससंपूर्णां गां पिरले व
लं फलामिति॥ अनेनेति माइकृष्णाष्टमीव्रतविधिनेत्यर्थः॥ अथ वर्ज्यं॥
शिरस्त्री मांस तैलानि रंतं काष्ठं दिनान्नं॥ अथ तिथिविशेषे एवाष्टम्यां
वर्जयेत्सुधीः॥ शिरः नारिकेलं॥ अथ नवमी सा तु पूर्वा वा वसुरंध्रयोरिति युग
वाक्यात्॥ न कुर्यान्नवमीं तात दशम्यां तु कदाचनेति स्कान्दाच्च॥ अत्र कस्यचि
त् विष्णुपुराणे॥ हरस्य सा नवम्यां चेति॥ पूजेत्यर्थः॥ स्मृत्यन्तरे तु॥ मातृणां नवमी प्रो
क्ता तिनवम्यां मातृपूजोक्ता॥ अथ वर्ज्य॥ श्लो॰ रमामलकस्नानेऽतं काष्ठं तथा

छिद्रं ॥ तैलाभ्यंगमलांबू च नवम्यां वर्जयेन्नरः ॥ अथ दशमी सा तु कृष्णा
पूर्वा शुक्लापरा । कृष्णे पूर्वोत्तरा शुक्ले दशम्येवं व्यवस्थितेति ॥ माधवाचार्यै
र्व्यवस्थापितत्वात् ॥ यत्तु हेमाऽल्लाउनाथादयः ॥ संपूर्णा दशमी कार्या पू
र्वया परयाथवेति ॥ स्मृतेरैच्छिको विकल्प इति ॥ तन्न शुक्ले पक्षे तिथिर्ग्राह्या
यस्यामभ्युदितो रविः ॥ कृष्णपक्षे तिथिर्ग्राह्या यस्यामस्तमितो रविरिति वच
सा व्यवस्थासंभवे विकल्पस्यायुक्तत्वात् ॥ नन्वेवं व्रीहियवयोरिवेह विकल्पो
स्त्विति चेन्न । अष्टदोषग्रस्तत्वात् ॥ यदाहुः प्रामप्रामाण्यस्य त्यागोऽप्रामप्रामा
ण्यसंग्रहो । त्यक्तस्वीकारः सहितस्वीकृतस्यागगर्भितौ ॥ पक्षे पक्षे चतुःश्रनु
ष्ठेवामष्टौ पक्षांतरे सति ॥ एवमष्टविधो दोषो विकल्पाश्रयणे भवेत्
इति ॥ तर्हि दृष्टांतेपि विकल्पो न स्यादिति चेन्न ॥ आगत्या तस्य तत्राश्रयणात् ॥
तदुक्तं मीमांसावार्त्तिके एवमेषोष्टदोषोपि यद्व्रीहियववाक्ययोः विकल्प आ
श्रितस्तत्र गतिरन्या न विद्यत इति ॥ उपवासे तु पूर्वैवा दशम्येकादशी विद्धा नो
पोष्या कथंचनेति [illegible] वरं स्यात् ॥ यत्तु दशमी तु प्रकर्तव्या सदुर्गा द्विजसत्त
मेति ॥ स्कांदात् ॥ तत्कृष्णपक्षविषयमुपवासविषयं वा ॥ सममपमपूर्वं माधवनि
बंधाद्यावध्येवमेवोक्तं ॥ केचित्तु नवमीयुक्ता दशमी मुख्या ॥ दशमी तु प्रक

र्त्तव्या स दुर्गा द्विजसत्तमे स्यात् परत्वं बोक्के रिस्या हु॥ तत्र परया अपयुक्तत्वेन
पूर्वाया एव मुख्यत्वे वीजाभावात्॥ परयुक्ता नवमी युक्ताया आलाभे परे ति
तरपि न॥ तत्र वचनं विनापि परया निःसंदिग्धत्वेन परवचनं वैयर्थ्यापा
तादित्यलं॥ अथ दशमी कस्यां॥ वन्हिपुराणे॥ दशम्यामंतकस्यायीति॥ पूजा
स्यसंतरे तु दशमी वासुके स्यते ति वासुकि पूजोक्ता॥ अथ वर्ज्या तैल स्मृत
गातिथौ रपरस्यैलं दशमीदिने॥ स्नानमामलकैश्चापि वर्ज्ययेन्मतिमान्नरः॥ अ
थैकादशी सा द्विधा॥ शुद्धा दशमीविद्धा च॥ शुद्धायाश्चत्वारो भेदाः एकादशी
मात्राधिक्यं द्वादशी मात्राधिक्यमुभयाधिक्यमनुभयाधिक्यं चेति एवं दशमी
विद्धाया अपि चत्वारः इत्यष्टौ भेदाः॥ तत्र तावच्छुद्धानां निर्णयः॥ शुद्धाया
माद्यभेदे एकादशी मात्राधिक्यरूपो वेधस्य विषयो नास्त्येव पूर्वतिथेः परमद्य
द्वैरनंतादिने तातः क्षयस्य ज्योतिःशास्त्रप्रसिद्धत्वात्॥ तदुत्तरभेदद्वये तु परा॥ अ
त्र क्रमेण संपूर्णैकादशी त्याज्या परतो द्वादशी यदि॥ उपोष्या द्वादशी शुद्धा दशमा
मेव पारणमिति॥ हेमाद्रिमतं वचः संपूर्णैकादशी यत्र प्रभाते पुनरेव सा॥ तत्रोपो
ष्या द्वितीया तु परतो द्वादशी यदि ति॥ भृगुवचनं च मानं॥ अत्र द्वादशी मात्राधिक्य
एकादशी यद्वा तु सा परतो द्वादशी भवेत्॥ उपोष्या द्वादशी तत्रेत्यादि व्यासवचनं
विद्धायां स्मार्त्तैकादशी निर्णये वक्ष्यमाणे माधवाचार्यप्रभृतिभिः शुद्धएका

(29)

दशम्यां कथमुपवासस्त्विति चिंत्यं॥ शुद्धैकादश्यां तु मेति चिन्त्यं षण्णस्यामामंजस्यात्
अनुभयाधिक्ये तु नास्ति सन्देहः विद्धा तु चतुर्विधापि निषिद्धा द्वादशीमीत्रोष संपुटो
पादिस्यादरुणोदयः नैवोपोष्यं वैष्णवेन न हि नैकादशीव्रतं निस्यादि स्मरणात्। अ
रुणोदयस्वरूपं तु हेमाद्रिणोक्तं। निर्णीयाने तु यामोदयो द्वेवावा दिनवादनेसारवे
स्वतानध्यपने चारुणोदय उच्यते इति। अत्र यामार्द्धं मुहूर्तद्वयलक्षणं वैष्णव
लक्षणं तु स्कांदे। परमापरमापन्नो हर्षवासमुपस्थिते नैकादशी स जेयस्तय
स्य दीक्षास्ति वैष्णवी। विस्यपिता रविसाचारः स हि वैष्णव उच्यते इति। अथ
ले तु स्वस्य दीक्षाद्यभावेपि निजकुले संप्रदायमात्रेणैव वैष्णवत्वं नरीत
त्वे चांगीकृत्योपवासे स्त्रिष्टा निर्णयेति। अथ चारुणोदयवेधउपवासमात्र
स्य निषेधकः स्त्रि दिक्पंचरत्नायामीरिति। स उपवासातिरिक्तविषयः प्रउक्ते नि
गमे। सर्वप्रकारवेधोयमुपवासस्य दूषकः सार्द्धसप्तमुहूर्तस्तु योगोयं बाधते न
प्रमितिः। यदि तु ज्योतिर्विदां मिथो विवादेन वेधसंदेहस्तदापि परे वापोष्या
विवादेषु च सर्वेषु शुद्धा द्वादश्यां समुपोषणं। पारणं तु त्रयोदश्यामाज्ञेयं मामकी मुने
इति पाद्मात्। इति वैष्णवानामेकादशीनिर्णयः। अथ केषांचिद्दिष्टस्मार्तानां वेधसं
प्रदायविशेषो लिख्यते। तत्र नारदीये। द्विपंचाशत्घटिका दशमी दृश्यते यदि
छायैव तु तदा ज्ञेया नंदा सा द्विर्यदा भवेत्। त्रिपंचाशद्घटा पूर्णा ग्रस्ता एव चतुर्गी
पते। चतुःपंचाशन्नानाकाया संपूर्णा वेधउच्यते। पंचाधिकेति वधः षड्ठे लोके॥ प्रउ

पः समं पंचाशन्महानष्टाधिके भवेन्नूनं बाधिका महाघोरा संपूर्णा राक्षसी स्मृता ॥
एवमादिवचनैर्दशमीवेधे परिरक्षसंयुता ॥ न चापरकालपर्यंतमुपोष्या चकरादक
वनेति ॥ अथ लक्षतरस्मात्तानां निर्णीयते ॥ शुद्धायामाद्यभेदे सकामस्य पूर्वा नि
ष्कामस्य तूत्तरा प्रथमेहनि संपूर्णा व्याप्याहोरात्रं संयुता ॥ द्वादश्यां च तथा तान
रेदृश्यते पुनरेव सा ॥ पूर्वा कार्या गृहस्थैर्हि यतिभिश्चोत्तरा विभो ॥ इति स्कांद
वचोगतयतिगृहस्थपरयोः पूर्वामुपवसेत्कामी निष्कामस्तूत्तरां वसेदिति
मार्कंडेयवचनैकवाक्यत्वेन निष्कामकामपरत्वात् ॥ विष्णुप्रीतिकामस्य तु ति
थिद्वयेप्युपवासः ॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ॥ तुष्यते द्वादशीं तस्मिन्
नुपवासफलार्थं भवेत् ॥ उपोष्ये तत्र विष्णुप्रीणनतत्परैरिति वासिष्ठात् ॥ द्वि
तीयत्र प्रभाते पुनरेव सा एकादशी तत्र यतिर्घोरे परमं पदमिति ॥ नारदीयात् ॥ तृ
तीयभेदे तु परा ॥ संपूर्णैकादशी यत्र प्रभाते पुनरेव सा ॥ तत्रोपोष्या सदा पुण्याप
रतो द्वादशी यदीति ॥ गारुडात् ॥ अंतिमपक्षे तु नास्ति संदेहः ॥ विद्धायामाद्यभेदे परा
श्री सर्वेषां सर्वार्थेरन्नामी विद्धाया निषिद्धत्वात् ॥ द्वादशीमिश्रिता कार्या सर्वत्रै
कादशी तिथिः ॥ द्वादश्यां च त्रयोदश्यां लभ्यते यदि वा न वेति ॥ स्मात ॥ एकादशी द्वा
दशी चैव रात्रिशेषे त्रयोदशी तत्र क्रतुशतं पुण्यं त्रयोदश्यां तु पारणमिति ॥ कौर्माच्चे
एवमुक्त्वादिकामनाविषयं यदुक्तं हेमाद्रिनिबंधे सुमंतुना ॥ एकादशीं कल्पय

37

क्ता द्वादशी लुप्येत यदा। एकादश्यां तदोपोष्या द्वितीया मोक्षकांक्षिभिरिति भवि
ष्यत्पुराणे च। एकादशी कलायुक्ता द्वादशी क्षीयते यदा। उपोष्या च महापुण्या सर्व
पापहरा तिथिरिति। मुख्याद्विकामनया। अभावे तु पूर्वैव। मदुक्ते पाद्मे विद्धा
प्येकादशी ग्राह्या परतो द्वादशी न चेत्। विद्धापि विद्धा विद्धापि परतो द्वादशी न
चेत्। अविद्धापि तथा विद्धा परतो द्वादशी यदीति स्पष्टं चैतद्धेमाद्रिकालनिर्ण
यदीपिकाविवरणादौ। न तु कालतत्वविवेचनोक्तरीत्या सर्वथा परमिति। सु
व्यक्तं चैतन्माधवाचार्यादीनामपि श्रुद्धावद्धिणः। पूर्वोपते समेऽपरस्यैव सं
मता। द्वितीयतृतीयभेदयोरपि परा। अत्रैकादशी वृद्धा लुप्ता परतो द्वादशी भवेत्॥
उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिमिति। व्यासवचनमेकादशी द्विगुणामु
क्तां वर्द्धमाने विवर्जयेत्॥ सुपमार्गस्थिते सोमे कुर्वित द्वादशीमुनामिति। भविष्यपु
राणं च क्रमेण मानं। अत्रेति भेदेषु वेधसत्वेपि सैवोपोष्या। एकादशी भवेत्क्वापि
द्वादश्यां वृषितातिथिः। वृद्धिपक्षे भवेदोषः क्षयपक्षे तु पुण्यदेति। विस्तरस्त्वन्यान्
वेधभेदे हृषीस्वर्षोदये वा। उपवासस्यैव प्राग्वन्निर्णयः। उपवासव्यतिरिक्ते पं
चदश्यादौ वेधस्वरूपमेव। श्रुतिस्मार्त्तानामेकादशीनिर्णयः। अथाधिकारिनि
र्णयः। कात्यायनः। अष्टवर्षाधिको मर्त्यो ह्यशीतिन्यूनवत्सरः। एकादश्यामुपवसेत्पक्षयो
रुभयोरपि। अष्टवर्षाधिक ऊर्ध्वपत्नीतोपलक्षणं। उपनयनोत्तरमेव नियमात्प्र
वृत्तीति पृष्टसिद्धांतिनस्तात्। सागुपनयनात्कामचारवादभक्षणेष्वानि नतुष्टद्वस्याधानो

पनयनयोरभावान्नात्राधिकारः। वचनात्तु भवति तथा च स्कांदे। ब्रह्मचारी गृ
हस्थश्च वानप्रस्थो यतिस्तथा। ब्राह्मणः क्षत्रियो वैश्यः शूद्रो मर्त्यमतिस्तथा।
अभर्तृकान्या च भर्तृका वै देहि कारणः। एकादश्यां न भुंजीरन्पक्षयोरुभयोरपि। इति
भर्तृमत्याः स्त्रिया भर्त्राज्ञयैवाधिकारः। भार्या पत्युर्मतेनैव व्रतादीनाचरेत्सदे
ति कात्यायनोक्तेः। अनाहिताग्निर्गृहस्थः कृष्णे नाश्नीत नाप्युपोषणमिति मनुना
स्वातंत्र्येणोपवासादिनिषेधा[illegible]त्र सौरपुराणे वैष्णवो वाथ शैवो वा सौरो[illegible]
न समाचरेदिति। गृहस्थस्य तु चातुर्मास्यांतर्गतायामेव कृष्णैकादश्यामधिकारः
शयनी बोधिनी मध्ये या कृष्णैकादशी भवेत्सैवोपोष्या गृहस्थेन नान्या कृष्णा
कदाचनेति पाद्मात्। चातुर्मास्यांतर्गतायामपि तस्यामपुत्रस्यैवाधिकारः। संक्रां
त्यामुपवासं च कृष्णैकादशिवासरे। चंद्रसूर्यग्रहे चैव न कुर्यात्पुत्रवानिति
च नारदोक्तेः। अपरं कृष्णैकादश्यां नित्योपवासनिषेधो वैष्णवातिरिक्तविषयः
यथा शुक्ला तथा कृष्णा यथा कृष्णा तथेतरा। तुल्ये ते मन्यते यस्तु स वै वैष्णव उ
च्यत इति भविष्योक्तेः। नित्यं भक्तिसमायुक्तैर्नरैर्विष्णुपरायणैः। पक्षे पक्षे च क
र्तव्यमेकादश्यामुपोषणं। सपुत्रश्च सभार्यश्च स्वजनो भक्तिसंयुतः। एकादश्या
मुपवसेत्पक्षयोरुभयोरपीति। नारदोक्तेश्च। तथा पुत्रवद्गृहीणः एकादशी
क्षयदिने उपवासे नाधिकारः। एकादश्यां दिनक्षये उपवासं करोति यः तस्य

पुत्रवान्गृही विना त्वपितृमघायां पिंडनोपयेत्॥ पितामहोक्तेः॥ लयस्वरूपं तूक्तं पाद्मे
हे लिख्यं तावेकवारे यस्मिन् तस्यान्दिनक्षयं तु तिथिः॥ अपंच निषेधो निराहारस्यैव
न तु लंघनस्य पुत्रिणां॥ उपवासनिषेधे तु भक्ष्यं किंचित्प्रकल्पयेत् न दूष्येत् उपवासे
न उपवासफलं लभेत्॥ भक्ष्यमपि हितं बोध्यं॥ तथा तत्रैव नक्तं हविष्यमन्नं
त्वमनोदनं वा फलं तिलाः क्षीरमथांबु चाज्यं यत्पंचगव्यं यदि वापि वायुः प्रशस्त
मुत्रोत्तरं मुत्तरं स्यादिति॥ एवं कसेक दर्शमपि गृहिणां बोध्यं॥ तथा द्वाद
श्यां यदिने मुपवासे पुत्रवद्गृहिणो नाधिकार इत्युक्तं कौर्मे॥ एकादश्यां द्वाद
श्यां च रात्रौ पर्वत्रयोदश्यां उपवासं न कुर्वीत पुत्रपौत्रसमन्वित इति किंतु
तत्र नक्तमेव कर्तव्यं॥ एकादशी कृष्णा यत्र द्वादशी च भूयं गता॥ तत्र नक्तं प्रकुर्वी
त नोपवासं गृहाश्रमी इति स्कांदात्॥ अत्र सर्वत्र पुत्रशब्देनापसमात्रं गृह्यते
आत्मजः तनयः सूनुः सुतः पुत्रः स्त्रियां त्वमी॥ आहुर्दुहितरं सर्वेऽपत्यमभिधा
नात्॥ पुमान् पुत्रजायंत इति प्रकृतौ॥ पुत्रस्य ग्रहणं तु विवक्षितत्वात्॥ आर्त्तो
नित्योप्यत्राधिकारः॥ मृतके च नरः स्नात्वा प्रणम्य मनसा हरिं॥ एकादश्यां न
भुंजीत व्रतमेवं न लुप्यते॥ मृतकेपि न भुंजीत एकादश्यां सदा नरः इति वाराहे
के॥ रजस्वलायाः अपि तथा॥ प्रसंप्राप्ते पि रजसि नस्याज्यं द्वादशीव्रतमिति

अष्टांगवञ्चनात्तु गोतुरस्मात्प्रतिनां नित्यनैमित्तिककर्मसु नाधिकार इत्युक्तं ॥
तत्र मूलमपि कालिकापुराणमुदाहरंति अजातूर्ध्वं प्रतजे जाते नित्यकर्मन
चाचरेत्। नैमित्तिकं च तत्र धः स्त्रवङ्क्तो न चाचरेदिति। तत्रेदं प्रतिभाति प
स्य महासत्तेरक्तस्त्राव प्राचूर्यं सप्रतिमादि पूजा स्वयं नाचरेत्। किंत्वन्येन का
रयेदित्येतदर्थः स्त्रवत्क्तो न चाचरेदिति। तत्रेदं प्रतिभाति। पस्य महासत्तेरक्त
स्त्राव प्राचूर्यं सप्रतिमादि पूजां स्वयं नाचरेत्। किं त्वन्येन कारयेदित्येतदर्थ
मिदं न त्वमक्षत स्यापवासादि नित्यनैमित्तिककर्मानुष्ठाणयोग्यतायां यन्न
कार्यं रिवकर्मणो निवर्त्तकमिति। यत्तु देवीपूजा प्रकरणानूतन्मात्र विषय
मिति शक्यते पिकर्माचारिणां रक्षिणानां मान्वारं समर्थपांचक्रुं तन्त्रो। मि
सकर्मादिपरस्य श्रूस्यासंध्यावंदनादि सकलकर्मार्थपरत्वे सति प्रकरणेन तु
चतुर्थप्रमाणेन देवी पूजा मात्र परताग्राह्या। अयुक्तत्वात्। तथा हि। श्रोतिष्टो
मं प्रकृत्य श्रूतं तिस्र एव सान्नस्योपसदो द्वादशाहीनस्येत्यत्र द्वादशोपसत्
षष्ठी द्वादशाहविकाराहीनांगमेव न तु प्रकरणेन ज्योतिष्टोमांग
त्वं काभगवता जैमिनिनाश्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां स
मवाये पारदौर्बल्यमर्थविप्रकर्षादिति तस्मात्क्षतिनामपि सति सामर्थ्ये स्वैर्वैका
दरीव्रतेधिकारः। असामर्थ्ये तु परेण कारयेदिति सिद्धामः ॥ इत्यधिकारिनिर्णयः ॥

अथैकादश्युपवासो द्विधा नित्यकाम्यभेदात् तत्राद्य उक्तो गारुडे तु पोथे
कादश्यां नित्यं पक्षयोरुभयोरपि। सनत्कुमारो ध्यानकरोति हि यामहं एकाद
श्यामुपोषणं यो न रो न रकं याति रौरवं तमसावृतमिति। काम्यस्त्वनी पक्षभ
ण नियमकरणाच्छक्तानुपवासमात्रं कर्तव्यं इति विज्ञाय कुर्वीत तावद्भूयमेकाद
शीव्रतं विशेषनियमाच्छ[struck]क्तो होरात्रं भुक्तिवर्जितमिति। ब्रह्मवैवर्त्ते तु
सर्वत्राशक्तोऽशक्तिस्यानथाभ्नलोपदेशइति मायाः अथाउपवासे प्यसामर्थ्ये तु
मार्कण्डेयः। एकभक्तेन नक्तेन तथैवायाचितेन वा उपवासेन चैकेन निर्द्वादशिको
भवेदिति तत्राप्यसामर्थ्ये तु पुत्रादिना कारयेत् तदप्युक्तं स्कान्दे पुत्रं वा विन
यो पेतं भगिनीं भ्रातरं तथा। एषामभाव एवान्यं ब्राह्मणं वा नियोजयेदिति।
पुत्रादेरप्यभावे तु सहस्रगायत्रीजपं द्वादशप्राणायामान्वा कुर्यात् तत् सह
स्रसंमितां देवीं जपेद्वा प्राणसंयमान् कुर्याद्द्वादशसंख्याकान् यथाशक्त्या
तु होनं रङ्गइति स्मरणात् तस्मात् सर्वथैकादशीव्रतं कार्यमिति सिद्धम्। प्रकरणे
तु प्रायश्चित्तमुक्तं कात्यायनेन। एकादश्यामहोरात्रं भुक्त्वा चान्द्रायणं चरेदिति
यदुक्ते कादश्यां श्राद्धं तद्दापितसेवितान्नदोषमात्रपकुर्यादेव न तु द्वादश्यामि
ति शेषः यद्वा हस एव। मातापित्रोः क्षयप्राप्तो भवेदेकादशी यदि। अथ मर्वेपिर

१८

(38)

रिवांश्च आजिघ्रेत्सितत्सेवितमिति॥ अथ द्वितीय १ काम्योपवासउक्तो नारदी
ये॥ एकादश्यां समं किंचित्पापघ्नं नविद्यते॥ स्वर्गमोक्षप्रदा ह्येषा राज्यपुत्रप्र
दायिनी॥ सुकलत्रप्रदा ह्येषा शरीरारोग्यदायिनी॥ इति॥ अनयोश्च नित्यकाम्योप
वासयोर्विविदिषाधिकरणन्यायेन सकृत्प्रयोगानुष्ठाने सिद्धे सति पश्वर्थानु
ष्ठितप्रयाजादिना पशुपुरोडाशस्येव काम्योपवासेन नित्योपवासस्य प्रसंग
सिद्धिरिति ज्ञेयं॥ तथा च स्मृतिः॥ काम्योपि नित्यसिद्धिस्यात्प्रसंगेनोपवासकृ
त्॥ अथ नियमा॥ नारदीये॥ दंतकाष्ठादि महीपालत्रिदिनं परिवर्जयेत्॥ गंधतांबू
लपुष्पादि स्त्रीसंभोगं महायशाः॥ अक्षारलवणाः सर्वे हविष्यान्ननिषेविणः
अवनीतल्पशायिनः प्रियासंगविवर्जिता॥ अत्र सिद्धेत्वा गृहार्थसंबंधे तु सत्रसिद्ध
एवेति महाभाष्योक्तेर्वदंभक्षो वायुभक्ष इतिवदष्टामर्थवावयं सावधारणमिति न्या
येन हविष्यान्नमेव निषेवणीयं हविष्याणि तु भविष्योत्तरे हैमंतिकं सितास्विन्न
धान्यं मुद्गास्तिला यवाः कलायकंगुनीवाराः वास्तूकं हिलमोचिका षष्टीका कालशा
लमूलकं च मूलकं केमुकेतरत् कलायस्त्रसतिनकदंवमरः मत्स्यतिप्र॥ इत्सिद्ध
धान्यं वास्तूकं वथुवा इति प्रसिद्धा॥ त्रिकः चक्रवर्तिति नानानाम्नातेलंगेषु प्रसिद्धः
हिलमोचिका॥ मूलकं॥ हिलमोचिके समरोत्के॥ शुत्रसारी हिलम्वा इति प्रसिद्धा

नूणकः हिलं शुल्कं मोचयतीति क्षीरस्वामिनोप्युसादनात् । अभिधानमालाया
मप्युक्तं । चांगेरी हिलमोचं चकलंबी नूणकं जानत पइति । षष्टीकासारीति प्रसि
धान्यं । कालनूणकं कफादिनाशी नूणकं विशेषः । तथा च रत्नाकरनिघंटुः । कालिका
कालनूणकं चेति केमुकं मुत्ता इति प्राच्येषु प्रसिद्धः केदारतथा केदारशेषधव सामुद्र
लवणो मधुसर्पि विषयो तुहद्रुत मारं च नसाम्ह हरीतकी । पिप्पली जीरकं चैव ना
गरं चैव लितिति एषां नागरं शुंठी । कदलीलवलीधात्रीफलान्यगुडमेव च । अतैलप
कं मुनयो हविष्याणि प्रचक्षते इति वातैलकपित्तघ्नं सुगंधि लवलीफलमिति
रत्नाकरनिघंटुः । रायआवळे इति । महाराष्ट्रभाषया च्यमाने फलं लवलीलापि
लीस्पलीलालं यकिलेति । अतैलपक्कमित्यहविष्याणामेव विशेषणं । छंदोगप
रिशिष्टे हविष्ये तु यवा मुख्यास्तदनु व्रीहिय[illegible]स्मृताः । माषकोद्रव गौरादीन्
सर्वाभावेपि वर्जयेदिति । अग्निपुराणे । नृपमाकाष्टनीवारगोधूमा धान्यं ते [illegible]
हिताः । कूष्मांडालाबु वार्ताकपालक्या ज्योत्स्निकास्त्यजेत् इति । अलाबुस्तं
बीवार्ताकं वृंताकं पालक्याकुंदुरवालुकेवाथ पालंक्यो मुकुंद कुंदकुंदर
रित्यमरः । ज्योत्स्निकापटोलिका । ज्योत्स्नी पटोलिकाजालीत्यमरः । तथा स्कांदे ।
कास्यं मांसं मसूरं च क्षौद्रं चानन्तभाषणं । पुनर्भोजनमसंतोषं स्त्रीणां परिवर्जयेत् ॥

असंस्कृतं। अतिसूत्रयीत भोजनं। तथा मात्स्ये। कांस्यं मांसं सुरां क्षौद्रं तैलं वितथभा
षणं। व्यायामं च प्रवासं च दिवास्वापं च मैथुनं। तिलपिष्टं मसूरं च दशम्यादिषु
वर्जयेत्। मैथुनं चाष्टांगं। स्मरणं कीर्तनं केलिः प्रेक्षणं गुह्यभाषणं। संकल्पोऽध्यवसा
यश्च क्रियानिर्वृत्तिरेव च। एतन्मैथुनमष्टांगं प्रवदंति मनीषिणः। इति। देवलः
दशम्यामेकभक्तस्यामेकभक्तस्यात्कावेकादशीपरा। सापसायं तनपोरन्तोः सापंप्र
तश्च मध्यमे उपवासबलं प्रेप्सुर्जह्याद्दुक्ता चतुष्टयमिति। कौर्मे पुनः मसंपुपारी

तथा

च दशम्यां वैसनवस्य जेतं कांस्यं मधु परान्नं च तस्य नेतुपवसं क्रियां तथा व हिंसा
मांसजानुस्मृतिं पतितं च रजस्वलां नस्पृशेन्नाभिभाषेत तत्तेषेन व्रतवासरे व्रत
घ्नासाहे देवलः असकृज्जलपानाच्च सकृत्तांबूलचर्वणात्। उपवासः प्रणश्यत
दिवास्वापाच्च मैथुनात्। आपस्तंबे तु सएवा असकृद्वांबुपानेन नोपवासः प्रणश्य
ति। अस्य प्रामाण्ये आपस्तंबे अष्टौ तान्यव्रतघ्नानि आ
पो मूलं फलं पयः हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधं देवलः सर्वभूतभयं
व्याधीः प्रमादो गुरुशासनं। अव्रतघ्नानि पठ्यंते सकृदेतानि शास्त्रतः। इति। स
र्वभूतेभ्यो आपद्यादि दुष्टजंतुभ्यो भयमिति। समयप्रदीपे स्मृतं च स्मृतिः। उपवा
से तथा श्राद्धे न कुर्याद्दंतधावनमिति। पैठीनसिः अलाभे वा निषेधे वा काष्ठानां
दंतधावने। पर्णादिना विशुद्धेन जिह्वोल्लेखः सदैव वै। इति। पर्णं च लाभे तु व्यासः।

अपां द्वादशगंडूषैर्विदध्याद्दंतधावनमिति। विष्णुधर्मोत्तरे। तज्जप्यस्तपनध्यान
तत्कथाश्रवणादिकं। तदर्चनं च तन्नामकीर्तनश्रवणादयः। उपवासकृतामेते
गुणाः प्रोक्ता मनीषिभिः। अत्र तच्छब्देन प्रकृतदेवताया ग्रहणं। विष्णुरहस्ये। अभ्य
स्य वर्जयेत्सर्वं ग्रासानां चापि कांस्यकं गात्राभ्यंगं शिरोभ्यंगं तांबूलं चानुलेपनं
व्रतस्थो वर्जयेत्सर्वं यच्चान्यद्बलरागकृदिति। स्मृत्यंतरे विशेषः। मनुः। पुष्पालं
कारवस्त्रालिगंधमाल्यानुलेपनं। उपवासे न दुष्यंति दंतधावनमंजनमिति। तथा।
व्रतकांडे। गंधालंकारतांबूलपुष्पमालानुलेपनं। निषिद्धं स्वस्यार्थे सारोग्यौषधि
चार्यैश्चैव माहुः। अपत्ये तु सौभाग्यार्थं मनुष्टीयमाने व्रते तेषु स्त्रीणां पुष्पधा
रणं धार्यो चारो देवपतेनालंकारवपुषो। अत एव। हरिवंशे पारिजातहरणे। स्वधर्मे
ग्रस्तुमावाक्यं स्त्रीधर्माननुपक्रम्य प्रसाधनं चांजनं च गंधान्सुमनसस्तथा व्रत
के चोपवासे च नित्यमेव विवर्जयेदिति। एते चावश्यका नियमास्सर्वव्रतेषु ज्ञेयाः।
इति व्रतनियमाः। अथ व्रतविधिः। हेमाद्रौ भविष्ये। एकभक्तं तु कुर्वीत निपतेद्वितीयः। अस्या
वश्यादंतकाष्ठं तु खादेत दंतधावनं ततः। ततः स्नानं तरं विप्र ब्रह्मचारी जितेंद्रि
यः रात्रिं नयेत्। ततः प्रभाते स्नात्वा समाहितः। उपवासं तु सं
कल्प्य मंत्रपूतं जलं पिबेत् इति। संकल्पकालस्तु माधवः संकल्पये द्विज
उपवासव्रतादिकमिति। स्कंदः मध्यरात्रे उदये वा रात्रौ मी वेध सत्वे तु रा

ता

त्रावेव संकल्पादीति विशेषः यदुक्तं नारदीये। दशम्यामसंगदोषेण त्वर्द्धरात्रा
त्परेण तु। वर्जयेच्चतुरो यामान् संकल्पार्च्चनयोस्तथा॥ विद्धोपवासे नश्यं तु दि
नं सख्या समाहितः। रात्रौ संपूजयेद्विष्णुं संकल्पं च तदाचरेदिति। संकल्पप्रका
रमाह हारीतः। गृहीत्वौदुंबरं पात्रं वारिपूर्णमुदङ्मुखः। उपवासं तु गृह्णीयाद्यथा
संकल्पयेत्तु। यद्वौदुंबरं ताम्रमयं तत्र मंत्रः। एकादश्यां निराहारः स्थित्वाहमप
रेहनि। भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युतेति। सौरादीनां तु मायत्राद्यो मंत्राः
सावित्र्याप्यथवा नाम्ना संकल्पं तु समाचरेत् इति। सौरपुराणोक्तेः। मंत्रोच्चारणा
नंतरं रुक्मसमुक्तं। वाराहे तु उक्त्वार्घ्यं ततो विद्वान् पुष्पांजलिमथार्चयेत्। तदु
त्तरं क्षमापनमाह कात्यायनः। अष्टाक्षरेण मंत्रेण त्रिर्जपेनाभिमंत्रितं। उपवास
फलं प्रेप्सुः पिबेत्पात्रगतं जलं। ॐ नमो नारायणायेत्यष्टाक्षरमंत्रः॥ रात्रौ संपूज
येद्विष्णुमित्युक्ते प्रकारं तत्प्रकारमुक्तं बृहन्नारदीये। पंचामृतेन संस्नाप्य एकाद
श्यां जनार्दनं। द्वादश्यां पयसा स्नाप्य हरिसारूप्यमश्नुते। स्नाप्येति छांदसो ल्यबादेशः
आलेनानापुष्पैर्मुनिश्रेष्ठ विचित्रं मंडपं शुभं। कृत्वेति शेषः संपूज्य विधिवद्विष्णुं
श्रद्धया सुसमाहितः। पुष्पैर्गंधैस्तथा धूपैर्नैवेद्यैः परैरुपचारैर्बहुविधैर्जप
होमैः प्रदक्षिणैः। स्तोत्रैर्नानाविधैर्दिव्यैः गीतवाद्यैर्मनोहरैः दंडवत्प्रणमैर्मंत्रैः

जपश्चाद्देवस्तथोत्तमैः॥ एवं संपूज्य विधिवद्रात्रौ कृत्वा प्रजागरं॥ प्रा निविल्लोप
वं स्थाने तरो नास्त्यत्र संशय इति॥ ऊ तिव्रतविधिः॥ अथैकादशीकृत्यं॥ कालादर्शे
तिथिकृत्ये पूजाप्रसंगे॥ अग्नि॥ विरिंचि॥ गौरी च गणेशश्चापि फणीनं गुहः॥ सूर्यं ब्राह्मी सर
स्वतिममीशं हरिं स्मरं॥ शिवं चंद्रं च प्रतिपदाद्यासु तिथिषु क्रमात्॥ शुक्लो कृष्णे
पिवापक्षे विधिवत्संतपूजयेदिति ग्रंथेन तिथिपूजनमुक्तं॥ रत्नमालायां त्वेकाद
श्यां अपि तिथिर्नेया विष्णुर्देवोक्तः॥ उभयोरैवर्त्ते हरिस्मृतेः॥ स्मृत्यंतरे त्वेकादशी॥
ऋषीणां वितिऋषीणां पूजोक्ता॥ अथ वर्ज्या॥ निष्पावं दंतकाष्ठं च तैलाभ्यंगन
मंगनाः॥ भोजनं च स्त्रजे ह्रीमान्नेकादश्यां तिथौ नरः॥ इत्येकादशीनिर्णयः॥ अथ
द्वादशी॥ सा पूर्वविद्धा॥ द्वादशीयुक्ते ति वचनात्॥ द्वादशी च प्रकर्त्तव्या एकादश्या
युता न विभो॥ इति स्कंदाद्युक्त्या॥ एवं च द्वादश्यामुपवासेन सिद्धार्थ प्रपस्य सर्वं यतः
चक्रवर्त्तित्वमतुलं संप्राप्नोति॥ अश्वा तुलाप्य मिति॥ मार्कंडेय विहितकाम्य द्वादश्यु
पवास एकादश्युपवासस्य दर्शपूर्णमाससंबंधि यागत्रयोदशयोगेन प्रपाजाश्यंगा
नुष्ठाणवत्तंत्रेण सकृदेवानुष्ठेयः॥ एतच्चाखंडतिथौ॥ खंडपूर्णतिथौ तु वाक्येनोप
वासद्वयं कार्यं एकादश्यां पारणं त्वह्नि कुर्यात्॥ अन्यत्तु स्त्या द्वादश्युपवासमेव कुर्या
त्॥ एकामेकादशीं भुक्त्वा द्वादशीं समुपोषयेत्॥ पूर्वोपवासजं पुण्यं सर्वं प्राप्नो

स्य संत्रायमिति स्मरणान्नाएकादशी पारणायां तु द्वादशी परे वा कलाद्वयं त्रयं वापि
द्वादशी नत्व निक्रमेत्तथा पारणे मरणे नृणां तिथिस्तात्कालिकी स्मृता ॥ स्कांदे ॥ प्रथम
वेदशी वास्या द्वादशी पारणा दिने ॥ उषःकाले द्वयं कुर्यात्प्रातर्माध्यान्हिकं च नदिति
त्रयोदश्यां दिप्रसंगे तु तच्छ पारणमाहात्म्ये बलसंकटे विषमे प्राप्ते द्वादश्यां पारये कथं ॥
अद्भिस्तु पारणं कुर्यात्पुनर्भुक्तं न दोषकृदीति ॥ तत्रापर तुलसीमिश्रिता ग्रासाः त
तुलसीमिश्रितेनांभसा कुर्यादिति विष्णुस्मृतेः ॥ तत्र मंत्राः ह ध्विचंद्रोट्यो ब्राह्मे लो
कः श्रिमिलानी त्रातं परस्मा द्वापो विद्वद्भिरिति ॥ अथ प्रभसा केवले नैव करिष्ये तपा
हणमिति ॥ द्वादश्याः प्रथमे पादे तु पारणं निषिद्धं ॥ विष्णुधर्मोत्तरे ॥ द्वादश्याः प्रथमः पा
दो हरिवासरसंज्ञितः ॥ अतिक्रम्य तु कर्त्तव्यं पारणं विष्णुतत्परैरिति ॥ यत्तु बालप्र
कान्नउक्तमाचारकल्पोयं निषेध इति ॥ तद्विष्णुधर्मोत्तरवचनेन यदा न स्यादिति कौ
विंतमाप्याख्यायं यथा भूपतिवा एतद्दशोत्तरपद्देन दहतीत्सव्यूह निषिद्धोपयान
स्यादिति कस्याचिंत यामनो नाधिकरणमवसारितो ॥ भाष्ये यथा च सर्वदुष्टाय हो
होमः सर्वरोगोपशान्तिदः ॥ क्रियतेस्यां द्विजैः पार्थ तेन होलिका स्मृता तस्याधिकविष्णु
नवसामसि हित्वा होलीकाश्वाचारप्राप्तेस्यकं ॥ प्रान्तिकादौ यदा तु द्वादश्यां व्या
पिनस्यात्तदा तं नाररीया ॥ प्रमोदस्यां तु दुष्टद्वायां पारणं पृथ्विफलमिति ॥ अथाग्रे का
दशीव्रतनिवेदनमाह कात्यायनः ॥ प्रातःस्नात्वा हरिं पूज्य उपवासं समर्पयेत ॥

आज्ञानतिमिरांधस्य व्रतेनानेन केशव। प्रसीद सुमुखो नाथ ज्ञानदृष्टिप्रदो भव।
मंत्रं जपित्वा हृदये निवेद्योपोषणं व्रती द्वादश्यां पारणं कुर्याद्दुर्जपित्वा सुयोरस्मा
मिति। नारदीये। ब्राह्मणान्भोजयेच्छक्त्या दद्याद्दक्षिणां नतः। अत्र ब्राह्मणा
नितिषु निर्दिष्टाः स्त्रियो न भोज्याः। पारणे विशेषः स्कांदे। सुत्वा चोपवासे तु योऽश्ना
ति द्वादशीदिने। निवेद्यं तुलसीमिश्रं हत्याकोटिविनाशनं इति। अथ व्रतोगभ
तान्नियमानाह। बृहस्पतिः। दिवानिद्रां परान्नं च पुनर्भोजनमैथुनं। क्षौद्रं कां
स्यामिषं तैलं द्वादश्यामष्ट वर्जयेत्। अलाबुं पुनर्भोजनमध्वायो भारान्आया
मैथुनं। उपवासफलं हन्तुर्दिवानिद्रा च पंचमी। असंभाष्यैः सह संभाषणं हिंच
वर्जयेत्। अथाष्टोत्तरसहस्रं गायत्रीं जपेत्। एते नियमाः काम्यव्रते। श्रावण
काइस्कन्नं प्राक्। अथ द्वादशीकृत्यं। वह्निपुराणे। द्वादश्यां च त्रयोदश्यां हरेश्चम
र्दनस्य चेति। अथ वर्ज्यं। स्नानं धात्रीफलैः स्नेलं क्षौरं मांसं मसूरिकाः तुलसीभेद
नं चैव वर्जयेत् द्वादशीदिने। यत्तु प्राच्याः संक्रांतौ पक्षयोरंते द्वादश्यां श्राद्धवासरे
सायंसंध्यां न कुर्वीत कुर्वंश्च पितृहा भवेत्। इति व्यासोक्तेः सायंसंध्यापि द्वादश्यां
वर्ज्येति। तन्न हेमाद्रिमहानिबंधेष्वदर्शनान्निर्मूलं। समूलत्वेऽपि। पुनर्भोजनमध्वा
त्तं भारायासमैथुनं। संध्यां प्रतिग्रहो होमः श्राद्धं शुक्ले च वर्जयेत्। इति नियम

मूलमिति॥ व्यासोक्तेश्च॥ चतुर्दशीं तां तु पंचनाड्यस्तु पुण्याश्रोत्रामनीषिभिः॥ उद
येच तथा पित्र्ये दैवे वै व च कर्मणि॥ उत्पादिस्मरणं॥ तद्वोण कालपरं॥ एकोद्दिष्टका
लस्त्वष्टमनवममुहूर्तौ मुख्यः॥ पूर्वोदाहृतमत्स्यादिवाक्यात्॥ द्वादशमुहूर्त
स्तु गौणः इति प्रागेवोक्तं॥ सत्त्वमनु॥ यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते तथा
श्राद्धस्य पूर्वाह्णो विशिष्यत इति द्वैधाविभागमाह्यान्देकोद्दिष्टपार्वणसाधारणं
तस्मादेकादशद्वादशमुहूर्तौ पार्वणस्य मुख्यः काल इति स्थितं॥ उक्तं च भगवे
न भास्करेण पार्वणे त्वेकादशद्वादशमुहूर्तयोरेव मुख्यकालत्वमिति॥ द्विन
द्वयेप्यपराह्णव्यापित्वे त्वधिकाग्राह्या॥ अपराह्णद्वयव्याप्त्ये मावास्याया यदृशा वेत्
तत्रापि सत्त्वमहत्त्वाभ्यां निर्णयः॥ तत्र पितृकर्मणि निःस्मसंतरातः॥ अपराह्णद्व
येप्येकदेशेसमव्याप्तौ तु शिवराघवसंवादे॥ अमावास्या तु या हिंस्याद् अपराह्णद्व
येपि सा॥ क्षये पूर्वापराह्णे द्वौ साम्ये पित्र्ये प्रशस्यते॥ निःक्षयेणापराह्णद्वयव्यापि
व्याप्त एव परा॥ तिथिर्वृद्धावाम॥ दिनद्वयेप्यपराह्णव्याप्त्यस्य साग्निकैः पूर्वा नि
रग्निकादिभिः परा॥ सिनीवाली द्विजैः कार्या [illegible] साग्निकैः पितृकर्मणि॥ नि
रग्निभिः कुहूर्ज्ञेया॥ तथा चानग्निकैर्द्विजैरिति॥ लौगाक्षिवचनात्॥ सि
नीवाली चतुर्दशीयुक्तामावास्या कुहूः प्रतिपद्युक्ता॥ दृष्टचंद्रा सिनीवाली
नष्टचंद्रा सिनीवाली कुहूर्मतेति व्यासोक्तेः॥ तदेवं पार्वणश्राद्धकालो निर्णीतः॥

त्रिपुरुषोद्देशेन क्रियमाणेष्वष्टकादिष्वपि पार्वणव्यवहारोऽस्त्येव एतद्वि
तिफलत्वात्॥ अत एवकैकः त्रीनुद्दिश्य तु यत्तु द्विपार्वणं तत्पुनर्योर्विदुरिति
तस्मात्तत्रापराह्णव्यापिनी तिथिर्ग्राह्या॥ दिनद्वयेपि तथात्वे तु ग्राह्यतिथि
मपक्षोत्तरतिथेः साम्येपक्षे च सति पूर्वा॥ दर्शे तु परापराह्णव्यापिनी चेत्स्या॰
मताहस्य तु या तिथिः पूर्वस्यां निर्वपेत्पिंडमिस्तां गिसभापितमिति सुमंतूक्तेः
अपराह्णद्वयव्यापिन्यतीतस्य च या तिथिः क्षये पूर्वा च कर्तव्या वृद्धौ कार्या त
थोत्तरेति॥ बोधायनोक्तेः॥ अत्रेयं स्मार्तपरिभाषा॥ यदोत्तरतिथिरपराह्णे कालवि
क्षीयते। न हात स्यात्स्तावान् क्षयो ग्राह्या यां पूर्वतिथौ योजनीयस्तयोः सतिप्राह्य
तिथिः पूर्वविद्धैव गृहीतुमुचिता॥ अपराह्णव्यापित्वात्॥ तदुत्तरविद्धा त
तद्व्यापित्वात्॥ एवं च द्विरपि। तथा च स्मृतिः तिथ्यादेरेषु भवेदावा
नूहसो वृद्धिः परेहनि। तावान् ग्राह्यः स पूर्वेद्युः क्षयेपि स्वकर्मणीति। दिनद्वये
प्यपराह्णस्पर्शे तु मतुः न द्यह्व्यापिनी चेत्स्यान् मृताहे तु परा तिथिः पूर्वविद्धैव
कर्तव्या त्रिमुहूर्तीय दा भवेत्॥ द्वि तिपलं प्राप्तं रिकेन॥ अथामावास्याश्राद्धं नि
त्यं काम्यं च श्राद्धकालममावास्यां नित्यं पार्थिवसत्तमेति॥ अमावास्यामममावा
स्यां च तदा श्राद्धं प्रयतेन तुः कुरुत्वं भूमिप पश्येष्ठ सर्वान्कामानवाप्स्यसीति च
विष्णुधर्मोत्तरात्॥ अस्यातिक्रमे प्रायश्चित्तमुक्तं॥ अंगिविधानो। न्युपुवा च जपे

न्मंत्रेणातवारं दिने नरः॥ अमाश्राद्धं पदानास्ति तदासंपूर्णमेति नदिति॥
अत्रानुपनीतशूद्रयोरप्यधिकारः॥ मदुक्तं स्थूलमालिनिबंधे मात्स्ये॥ अमावा
स्याष्टकाकृष्णपक्षपंचदशीषु चैकपंचम्या॥ एतत्रानुपनीतोपि कुर्यात्सर्वेषु
पर्वसु॥ श्राद्धं साधारणं नाम सर्वकामफलप्रदं॥ भार्याविरहितोप्येनं तत्प्रवास
स्थोपि नित्यशः॥ शूद्रोप्यमंत्रवत्कुर्यादनेन विधिना बुधः॥ इति॥ अमंत्रवत् वैदि
कमंत्रं विना पश्चात्त्वमावास्यायामाह्निकं तदापूर्वमाह्निकं कृत्वा ततो अमाश्राद्धं
इथ कार्यमिति॥ कालादर्शे स्पष्टः॥ इति श्राद्धमानिर्णयः॥ अथामास्या कृत्यं वृ
ष्णजनं पर्वणीशोरिति॥ वन्हिपुराणे तु॥ अत्र पुष्करपर्वोक्तं॥ महाभारते॥ अमासो
मतथा भौमे गुरुवारे यदा भवेत्॥ तत्सर्वं पुष्करं नाम सर्वपर्वशताधिकमिति॥ सो
मवासरयुक्तायाममायां गंगास्नानमाहात्म्यं तातप॥ अमावास्या भवेद्वारोय
दा भूमिसुतस्य वै॥ जान्हवीस्नानमात्रेण गोसहस्रफलं भवेदिति॥ सिनीवाली
कुहूर्वापि यदि सोमदिने भवेत्॥ गोसहस्रफलं तत्र स्नानं चैव मौनिकृतं॥ सोमवार
युक्तायां तु श्राद्धं प्रागुक्तं॥ विशेषांतरं तु स्कांदे॥ अमासोमसमायुक्ते श्राद्धं यः पमि
लप्स्यते तीर्थे कपिलधारेस्मिन्॥ गयायां पुष्करे वा किं दिव्यांतरिक्षभौमानि यानि
तीर्थानि सर्वशः॥ तान्यत्र निवसिष्यंति दर्शे सोमदिनान्विते॥ इति॥ अथ वर्ज्यं॥ अमा

णामलकस्नानं दंतकाष्ठाग्नार्घ्यं बांस्नानं ग्राण्यां तिलस्नानं परान्नं रात्रिभोजनं प
लमध्ययनं चैव ममायां परिवर्जयेत्। रात्रिभोजने प्रायश्चित्तमाह। कात्यायनः अर्के
पर्वद्वये रात्रौ चतुर्दश्यष्टमी दिवा। एकादश्यामहोरात्रं भुक्त्वा चांद्रायणं चरेत्। इति
अथ पूर्णिमा। सा सावित्रीव्रतातिरिक्तापरा। पूर्वविद्धा न कर्त्तव्या अमावास्या च पूर्णिमा
वर्जयित्वा मुनिश्रेष्ठ सावित्रीव्रतमुत्तममिति ब्रह्मवैवर्तात्। अत्रामावास्यायामित्यत्रा
द्वंनिसं। अमावास्या व्यतीपातः पौर्णमास्यष्टकासु च। विद्वान् श्राद्धमकुर्वाणो नरकं
प्रतिपद्यते इति पितामहोक्तेः सर्वकामफलप्रदेति मात्स्योक्तेः काम्यं च। अत्रानुपनी
तशूद्रयोरपि प्राग्वदधिकारः। अपिंडकं चेदं श्राद्धमिति। विशेषमाह। निर्णयदीपे गा
र्ग्यः। पौर्णमासीषु सर्वासु निषिद्धं पिंडपातनं वर्जयित्वा प्रोष्ठपदीं यथा दर्शस्तथैवसेति
अत्र मूलं मृग्यं। अत्र तिथौ कर्त्तव्यं पिंडवर्जनमुक्तमेव। अथ वर्ज्यं तिलस्नानं नातिरिक्तं स
र्वममावास्योक्तं द्रष्टव्यं। इति। प्रतिपदादि सामान्यतिथयो निर्णीताः। अथेष्टिकालनिर्णयः
गोभिलः। पक्षांतावुपवस्तव्याः पक्षादयो यष्टव्या इति। उपवासोऽग्न्यन्वाधानं क्रियते च
पूर्वेद्युरग्निं गृह्णातीत्युत्तरमहर्यजतीति। पूर्वे पूर्वधाव र्हिः करोति यस्तमेवारभ्योपवसती
ति। च लघ्वक्षरपरिमितेन निमेषादिरूपसंधिकालस्यातिसूक्ष्मतयानुष्ठानायोग्यत्वादयं
कालस्तुकः संधौ यजेतेति श्रुतेस्तत्रैव नापर्यवर्णनीयः। अत्र विशेषमाह लौगाक्षिः। त्रीनं
शानोपवस्तस्य प्रागस्य चतुरो विदुः। द्वावंत्यावुत्तरे ज्ञेयो दर्शो यागे च ब्रह्मकर्मणि। अन्वाधानं।

त्रयोदश्यां प्रदोषव्रत नि०

त्रयोदश्यां स्वरती स्तोत्रपाठकरणे ग्राह्या नि०

वाक्यैकवाक्यतया संक्रांत्यादौ ग्राह्य इवार्थ एवाकृतप्रायश्चित्तस्य ग्राह्य इमो निनः
संध्यावंदननिषेधार्थं एवं हि पितृहा भवेत् ॥ इति साधु संगच्छते ॥ अथ त्रयोदशी
सा तु शुक्लोत्तरा षष्ठ्यष्टमी अमावास्या कृष्णपक्षे त्रयोदशी ॥ एताः परयुताः
पूज्याः पराः पूर्वेण संयुता ॥ इति निगमोक्तेः ॥ शुक्ला तु पूर्वविद्धा परा एव ॥ त्वोक्तं
त्रयोदशी प्रकर्तव्या द्वादशीसहिता मुने ॥ इति ब्रह्मवैवर्ताच्च सर्वासु त्रयोदशी
षु प्रदोषव्रतं अलोत्तरखंडे ॥ पक्षद्वये त्रयोदश्यां निराहारो भवेद्दिवा ॥ घटिकात्रि
तयमस्तमयात् पूर्वं स्नानं समाचरेत् ॥ शुक्लांबरधरो भूत्वा वाग्यतो नियमान्वितात्
कृतसंध्यानयविधिः शिवपूजां समारभेदिति ॥ अत्र प्रदोषव्यापिनी ग्राह्या ॥ नात
त्रैव पूजाविधानात् ॥ कर्मणो यस्य यः कालस्तत्कालव्यापिनी तिथिरिति स्मृतेः
उभयदिने सत्वेऽसत्वे वा पक्षभेदेन वक्ष्यमाणनिर्णयः ॥ अन्योपि विशेषस्तत्रैव
मंदवारे प्रदोषोयं दुर्लभः सर्वदेहिनां ॥ तत्रापि दुर्लभस्तस्मिन् शुक्लपक्षे समायते ॥
इति ॥ अस्कांदे पुराणे तु त्रयोदश्यां सति सौवुध्य कर सरस्वती स्तोत्रपाठविधिरुक्तः
पक्षद्वये पि यो भक्त्या त्रयोदश्यां कविंशति ॥ अविच्छिन्नपटेद्धीमान् ध्यात्वा देवीं सर
स्वतीं ॥ सर्वपापविनिर्मुक्तः सुभगो लोकवर्द्धनः ॥ वांछितं फलमाप्नोति सल्लोके विज
इप्सयेत ॥ इति ॥ तत्र त्रयोदशी उदये त्रिमुहूर्तव्यापिनी ग्राह्या ॥ सारस्वतोत्तं नः
पाठात्तस्याः दिष्टार्थलाभ वानिति ॥ अध्ययनस्यैव तत्र फलसंबंधावगमात् ॥

यत्तु यां तिथिं समनुप्राप्य उदयं याति भास्करः सा तिथिः सकला ज्ञेया स्नानाध्य-
यन कर्मसु इति वचनं तत्त्रिमुहूर्त्तस्यैव स्नावकं त्रयोदशीके संतु मदनमदनस्य
पूजा कार्येति प्रागुक्तमेव ॥ अथ वर्ज्यानि । तत्र कामलक स्नानं तैलं कामतिथौ परं
वर्जयेदिति त्रिपत्र ॥ अथ चतुर्दशी ॥ सा च सा पूर्वा शुक्लोत्तरा ॥ कृष्णपक्षेष्टमी चै-
व कृष्णपक्षे चतुर्दशी ॥ कर्त्तव्या परविद्धा न कर्हिचित् ॥ इति आपस्तंबोक्तेः गतती-
थ करदशी षष्ठी शुक्लपक्षे । चतुर्दशी पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुतेति
नारदीयात् ॥ सर्वासु चतुर्दशीषु वीरेश्वर वीरेश्वरपूजा कार्या स्कांदे विधायैव जा-
गरणं नरो वीरेशमर्चयेत् ॥ भूतायां नेव गण्डा लिङ्गरीरं यान्व भौतिकमिति प्र-
तिमासगत कृष्णपक्षीय चतुर्दश्यां शिवरात्रिमुक्तं ॥ स्कांदे आदौ मार्गशिरे माघि ग्रन्थ १
दीपोत्सवदिने तथा ॥ पूर्णे वा चान्द्रमासे वा दुष्टे वा मुपोषयेदिति ॥ तत्र माघा-
सितचतुर्दशी वन्निशीथव्यापिनी चतुर्दशी ग्राह्या दिनद्वये तद्व्याप्तावव्याप्तौ
वा परा ॥ पूर्वदिन एव प्रदोष निशीथव्याप्तौ पूर्वा उत्तरदिन एव चेदुत्तरा ॥ यदैक-
स्मिन् दिने निशीथे अन्यस्मिन् प्रदोषे तदा निशीथव्यापिन्येवेति निर्णयः ॥ सौ-
तु स्मार्ताग्निहोत्रपदेन निरग्निहोत्र धर्माणामिव चतुर्दश्यां कर्त्तव्यं शिवरा-
त्रिव्रतं शुभमिति कालोत्तरादौ सर्वकृष्णचतुर्दशीषु गौणेनापि शिवरात्रि-
पदप्रयोगेण माघ शिवरात्रिधर्माणाम तिदेशात् ॥ अथ चतुर्दशी कृत्यं ॥ शिव

पूजनमुक्तमष्टमीनिर्णये। दुर्गाभैरवयोर्यात्रा च। अथ वर्ज्यं दंतकाष्ठं क्षुरं ते
लं स्नानमामलकं मैथुनं रतिमाहुः तृणच्छेदं मांसं दिवसभोजनं। अधीतिर्दूरग
दंश्च चतुर्दश्यां नरस्त्यजेत्। अथामावास्या। सा परा। प्रतिपद्यमावास्येति यु
ग्मवाक्यात्। अमावास्यातीर्यान्विता उपोष्याः परान्विता इति। स्मृतेश्च। सावित्री
व्रते तु पूर्वैव ग्रह्यते। त्रितादौवेदं। श्राद्धे तु अपराण्हव्यापिनी ग्राह्या। पूर्वाण्हे दैविकं
श्राद्धमपराण्हे तु पार्वणमिति मनूक्तेः पार्वणश्राद्धे न ह्यमावास्याश्राद्धमेवोच्य
ते पर्वणीभवं पार्वणमिति। व्युत्पत्तेः दर्शश्राद्धे तु परस्तोक्तं पार्वणं तत्र कीर्तितमि
ति कात्यायनोक्तेश्च। अत्र माधवाचार्याः पूर्वाण्हे देवानां मध्यंदिने मनुष्याणा
मपराण्हः पितृणामिति श्रुतेः सोमयागीयसवनत्रयपरत्वं मत्वाना मुहूर्ते [illegible]
सर्वधर्मबहिष्कृत इति। त्रितयं प्रातस्तावानेव तु संगवः। मध्यान्हस्त्रिमुहूर्तस्या
पराण्होपि तादृशः। सायान्हस्त्रिमुहूर्तस्स्यात् सर्वधर्मबहिष्कृत इत्यासांक्तेः दिनं
पंचधा विभक्तस्याह्नो दशमेकादशद्वादशरूपमुहूर्तत्रयात्मापराण्हः श्राद्धा
नुष्ठानकालस्तत्र सप्तमअष्टमनवमरूपमुहूर्तत्रयात्मकः गौणकुतुपः। मध्या
न्हस्त्रिमुहूर्तं तु यच्चा यदा भवति। भास्करकालः कुतुपो नाम पितॄणां दत्तमक्षय
मिति नारदोक्तेः त्रिवराधर्वसंवादेपि। अह्नो दिवतिरिक्तस्य क्रमेण कुतुपः स्मृतः
कुतपाद्य वाप्यवगाः सनं कुतपे भवेदिति। पार्वणकालनिर्णयः। अत्रेदं प्रतिभाति

नारदीयत्रिवराघवसंवादीययोरेकोद्दिष्टविषयत्वेनान्विता। एकोद्दिष्टं तु मध्याह्ने
मध्यान्हव्यापिनी यास्यात्सैकोद्दिष्टे तिथिर्भवेदित्यादि बहुवचनेकमूलकल्पना
लाघवात्। यत्तु मत्स्यपुराणीयं। ऊर्ध्वं मुहूर्त्तात्कुतुपाद्यन्मुहूर्त्तचतुष्टयं मुहूर्त्तपं
चकं ह्येतत्स्वधाभवनमिष्यत इति तदेकोद्दिष्टगौणकालस्य विधायकं। त्रिकोऽ
मंडनोप्याह स्वकालादुत्तरो गौणः कालः सर्वस्य कर्मणः इति यदपि व्यासवचनं
कुतुपप्रथमे भागे एकोद्दिष्टमुपक्रमेदिति। यच्च गोभिलीयं। आरभ्य कुतुपे श्राद्धं कु
र्यादारोहिणं बुधः। विधिज्ञो विधिमास्थाय रोहिणं तु न लंघयेदिति तत्रैकोद्दिष्ट
मुख्यकालविधायकं। अष्टमनवममुहूर्त्तयोः कुतुपरौहिणयोर्मध्यान्हांतःपातित्वात्
परत्युक्तं। पूर्वाण्हेऽस्यादित्युक्तेः सोमयागपरत्वं तदपि संभवप्रदर्शनेन न तु नियतं
मानाभावात्। तस्मादयं निर्णयः पंचदशमुहूर्त्तात्मनो दिवसस्यैकादशद्वादशत्रयोदशमु
हूर्त्तेष्वपराण्हः पार्वणानुष्ठानकालः पूर्वाण्हस्त्वादि। त्रेधाविभागस्य पूर्वाण्हः
प्रहरं सार्द्धं मध्यान्हः प्रहरं तथा। आतृतीयादपराण्हः सायान्हस्ततः परमिति
गोभिलोक्तेश्चतुर्धाविभागस्य च संवादेन तस्यैवापराण्हत्वात्। यदपि व्यासोक्त
पंचधाविभागे नवदशममुहूर्त्तस्यापराण्हत्वमुक्तं तथापि तत्सावेलारं भावि
षयमेकोद्दिष्टे गौणकालपरं वा। ननु त्रेधाविभागे त्रयोदशादिमपि मुहूर्त्तानां
तत्कालं भवेदिति चेन्न। सायान्हस्त्रिमुहूर्त्तः स्याच्छ्राद्धं तत्र न कारयेदिति त्रयोद
शादिमुहूर्त्तत्रयस्य यमेन निषिद्धत्वात्। सायान्हस्त्रिमुहूर्त्तस्तु सर्वधर्मबहि

आद्याः पर्वणस्त्रयोंऽशा इत्याहुः। ननु चतुर्थः यागे च पर्व चतुर्थांशसहिता आद्याः प्रति
पदस्त्रयोंऽशाः ननु चतुर्थ इत्यर्थः। तत्रापि विशेषमाह वृद्धशातातपः पर्वणो यश्चतुर्थांश
आद्याः प्रतिपदस्त्रयः। यागकालः स विज्ञेयः प्रातरुक्तो मनीषिभिरिति। प्रातः प्रातरविशि
ष्टइत्यर्थः। दिनद्वये तादृशयागकालासत्त्वे पराण्हसंधौ प्रतिपच्चतुर्थांशमध्येऽपि प्रातर्या
गः संधिर्यत्रापराण्हे स्याद्यागं प्रातः परेऽहनि कुर्वीत एवं प्रतिपद्यागे चतुर्थेऽपि न दुष्यतीति।
तात वृद्धत्रापिक्तेः दिनद्वये तादृशकालासत्त्वे तु मदीयो निर्णयः संग्रहः पर्वाद्य तिथिसंधिश्चे
न्मध्यान्हः पूर्वमेव वा। अन्वाधानं पूर्वदिने यागः संधिदिने तदा। दिनमध्यात्परे संधौ पूर्व
व्यमपरेऽहनि। अन्वाधानं संधिदिने कर्तव्यमिति निर्णयः। आमापांतु विशेषोयं पंचांशे
प्रतिपद्दिने। तुरीयमंशं व्याप्नोति द्वितीया तु यदा तिथिः। अन्वाधानं चतुर्दश्यां यागः संधि
दिने तदा। अत्रेयं स्मार्त्तपरिभाषा। अत्र कात्यायनः परेन्हि घटिकापूर्वे सत्थे वाप्यधिका
स्वयाः तदर्द्धं च आपूर्वस्मिन् ह्रासवृद्धिप्रकल्पयेदिति प्रतिपत्क्षयस्य ह्रासवृद्धी घटिकासं
ख्यां ज्ञात्वा तदर्द्धं पर्वणि प्रक्षिप्य संधिर्निर्णेय इत्यर्थः। अनेनामावास्यांतु सद्य
स्कालतामथापस्तंब आह। सद्यो वा सद्यस्कालायां सर्वं क्रियेत इति। मलमा
सादौ तु नारंभणीयेस्तं पाक्षिकं अथैवं विकृतीष्ट्यपि पर्वणि विहिता
पदिष्टापदिष्टपशुनापदिसोमेनयजेत। सोमावरणपौर्णमासीति स्मृतेः तत्र विशेष
माह कात्यायनः। आवर्त्तनात्प्राक् यदि पर्वसंधिः कृतातु तस्मिन् प्रकृति

53

विकृत्यान्तरे च यागः। परतो यदि स्यात्तस्मिन्विकृत्याः प्रकृतेः परेद्युरिति॥ आग्र-
यणो विशेषो वार्त्तिककृता दर्शितः पूर्णमासादूर्ध्वं दर्शे भवेदुपयन्ता॥ इति॥ तत्रत्ये विशेषे-
णाह विशिष्टोषमाहापस्तंबः॥ वर्षासु श्यामाकयजेन शरदि व्रीहिभिर्वसंते यवै-
रिति॥ इति दृष्टिनिर्णयः॥ अथ पिंडपितृयज्ञः॥ तत्र कात्यायनीनां चतुर्दश्यां युक्तायां वा
मायामिति द्वैधाचारः॥ तत्र कर्कानंतभाष्यमते क्रमेण मूलं॥ आपस्तंबानां मुहूर्त-
मात्रप्यवशिष्टे दर्शे॥ अमावास्यायां पूर्वेद्युरसंनपर्वत्वे तत्र पिंडपितृय-
ज्ञं कुर्वीत। इति सूत्रात्॥ आश्वलायनानामप्येवं। अमावास्यायामपराह्णे पिंडपि-
तृयज्ञ इति सूत्रे ह्यपराह्णशब्देन चतुर्थभागो विवक्षित इति। कौतौ प्रतिपाद-
नात्। सिद्धांतभाष्ये तु यस्यां मावास्यायाः अपरो भागः इत्यमावास्याया अपरा-
ह्ण इति। षष्ठ्यानिर्देशेनामकरिष्यन्तस्मात्तस्मादमावास्यातिथिर्यस्मिन्न-
निविष्टे तस्यान्तो पराह्ण इति। देवत्रातभाष्येप्येवमहर्तिममामावास्याप्रतिपद्यपि
चेद्भवेत्। तत्तन्मध्यं ज्ञेयं। पर्वणो यत्तु पर्वव दिस्यादिहरिहरोपाध्यस्तत्त्ववचनानां
प्रयोगपारिजातोक्तिसंवादेन पिंडपितृयज्ञपरत्वमायुक्तत्वाद्याज्ञिकानुष्ठान
संवादाच्च। अयं च पिंडपितृयज्ञः स्मार्ताग्निमतामग्नियतासंपूर्णदर्शे आहुत्यतिषंगेण
कार्यः। उभयोः सहानुष्ठाने व्यतिषंगः। खंडे तु पूर्वेद्युः श्राद्धं परदिने केवलः पिंडपि-
तृयज्ञः सर्वाधानपक्षे धानिनो स्मृ संपूर्णे। खंडे वा दर्शे। श्रौताग्नौ पितृयज्ञः पृथगेव

ननु श्राद्धं स्यात्तिथिसंगात् तत्र श्राद्धे ऽग्नौकरणहोमो वन्हावेव न पाणौ यदुक्तं परिशिष्टे।
चतुर्ष्वाद्येषु साग्नीनां वन्हौ होमो विधीयत इति। श्राद्धानि चत्वारि। तत्रैवोक्तानि अ
न्वष्टक्यं च पूर्वं च मासि मास्यथ पार्वणमिति। अत्र हेमाद्रिः एषामिदं परिशिष्टोलेखा
मेवार्थं विधित्सितो न सर्वेषामिति। पिंडपितृयज्ञाकरणे प्रायश्चित्तमाह कात्या
यनः अपि तत्पयज्ञान्यथैवैव वैश्वदेवास्यैपि वा। भोजने पतितान्नस्य चरुर्वैश्वानरो भा

एकभक्तव्र०

वेत् इति। पिंडपितृयज्ञाः। अथैकभक्तं। तत्स्वरूपकालौ स्कांदे दिनार्द्धे समयेतीते भु
ज्यते नियमेन यत्। एकभक्तमिति प्रोक्तं अन्नं तस्माद्दिवैव हि। निदिनार्द्धे परिलवेषा
उक्तास मध्याह्नादूर्ध्वं त्रिघटिकास्यो मुख्यः। एकभक्तकाल इत्यर्थः। मध्याह्नव्यापिनी
ग्राह्या एकभक्तव्रते तिथिरिति। माधवस्तु त्रेधा तासां उदयदिने मध्याह्ने सत्वे

नक्तव्रतनि०

सत्वेवा पूर्वा गौणकाले सत्वात्। इत्येकभक्तं। अथ नक्तं। तत्र प्रदोषव्यापिनी ग्राह्या प्र
दोषव्यापिनी सदा नक्तव्रते तिथिरिति स्कांदोक्तात्। प्रदोषस्वरूपमाह व्यासः। त्रि
मुहूर्तं प्रदोषः स्याद्भानावस्तंगते सति। नक्तं तत्र प्रकुर्वीत इति शास्त्रस्य निश्चय इति
माधवस्त्वस्तोत्तरमेव भोजनमुक्तं तथापि सायंसंध्या त्रिघटिका घस्तादुपरि भास्व
त इति स्कांदोक्तसंध्यायां। चत्वारि मानि कर्माणि संध्यायां परिवर्जयेत्। आहारं मैथु
नं निद्रां स्वाध्यायं च चतुर्थकमिति। भोजननिषेधात्। घटिकात्रयोत्तरं भोक्तव्यं न
वा अग्नीषोमीयं पशुमालभेते सादीनां न हिंस्यात्सर्वा भूतानि इत्यादेरिव प्रदोषे नक्त

विधिनासंध्याभोजननिषेधस्यारागप्राप्तिविषयत्वेनसंकोचोस्तीतिवाच्यं। विधेर्द्धि
कात्रयोन्तरकालेभावकात्वात्तयानिषेधसंकोचकत्वेयुक्तत्वात्।अतएवकपिंज
लानलभेतेत्यनेनकपिंजलत्रयालंभविषयेननहिंस्यादित्यस्यसंकोचेपिनाधिक
लंभविषयेसंकोचः।अग्नीषोमीयपश्वालंभविधिस्तुविरकात्तालाडुवन्नेवसंकोचः
अतएवपर्वादिभारात्रिभोजननिषेधस्यरागप्राप्तिविषयतयानक्तविधिनानुपप
सासंकोचः।एतेनयदाएकादश्यामादित्यवासरस्तदाध्यामलकैःस्नानादेवभानु
वारंविनास्नानादिसामूलकस्नाननिषेधस्यरागप्राप्तिविषयतयातुष्यस्योमलकै
र्विष्णुरेकांपकादश्याविशेषतइति।विध्यगोचरत्वादिति।परास्तुभगवंतभास्करेतु
मदनरत्नादिमतानुसारेणसंध्याभोजननिषेधस्यरागप्राप्तिविषयत्वमुक्तं।ननु
वास्तवमित्युक्तेतिज्ञेयां।दिनद्वयेपिप्रदोषस्पर्शेपिपरा।तत्रापिदिवैवव्याप्तेपरा
यदिस्यात्स्वल्पयोरन्होःप्रदोषव्यापिनीतिथिः।तत्रोन्नेरत्रनक्तंस्यादुभयत्रापिसायताद्
तिजाबालिवचनात्।दिनद्वयेपिप्रदोषस्पर्शेपिपरातत्रापिदिवैवनतुरात्रौनक्तंप
दुक्तंस्कांदे।प्रदोषव्यापिनीनस्याद्दिवानक्तंविधीयते।आत्मनोद्विगुणांछायामंदीभय
तिभास्करे।तन्नक्तंनक्तमित्याहुर्नेनक्तंनिशिभोजनमिति।अत्रविशेषःस्मृत्यंतरा
नक्तंनिशायांकुर्वीतगृहस्थोविधिसंयुतः।यतिश्चविधवाचैवकुर्यात्तत्सदिवाकरमिति
२ तु सौरनक्तंदिवैवत्रिमुहूर्त्तस्पृग्गर्वान्हनिशिचैतावतीतिथिः।तस्यासौरंभवेन्नक्तंमहत्ये

वतु भोजनं मितिसुमंतुवचनात्। हरिनक्ते तु स्यव्यापिनी ग्राह्या। उदयस्था सदा पूज्या
हरिनक्तव्रते तिथिरिति स्कंदात्। अथ नक्तव्रतिनो नियमा उक्ताः गारुडे। हविष्यभोज
नं स्नानं सत्यमाहारलाघवं। अग्निकार्यमधःशय्यां नक्तभोजी षडाचरेदिति। अग्निकार्य
माहूतिहोमः यदा तु एकस्यामेव तिथ्यामेकभक्तनक्तयोः प्रसंगस्तदैकभक्तं स्वयं कार्यं
अथ मस्य प्राबल्यान्नक्तं तु पुत्रादिना कारयेदित्यादि माधवनिबंधे स्पष्टम् इति नक्तं। अथा
याचितभोजननिषेधरूपं। अथापरं अहं न कंचन याचेतेति गोतमोक्तेः याचित [illegible]
न्नान्नभोजनात्मकपर्युदासरूपं वा। अहं प्रातस्त्वहं सायं अहः मध्यादयाचितमिति
बृहस्पत्युक्तेः। एतेन श्राद्धादौ देवभोजनविषयत्वमयाचितस्येति विद्वन्निर्णयामृतका
रो निराकृतः। एवं हि याचितं न भोक्ष्ये अयाचितं भोक्ष्ये इति वा संकल्पः। यत्त्वत्रायाचिते प्राति
स्विककालविशेषविध्यभावादुपवासवत्तिथिनिर्णयः इति माधवाचार्यः तन्न प्राति
स्विककालस्य विद्यमानत्वात्। तथा च शार्ङ्गधरीये नारदः। एकभक्तस्यायाचितयोर्विशा
ल घटिकावधिः। सा तिथिः सर्वदा ज्ञेया नक्ते सायाह्नसंगतेति भगवेन भास्करेणैवं। अ
यं तु विशेषः अयाचितस्य पर्युदासरूपत्वे विंशतिघटिकोत्तरं गौणकालेपि
परदत्तमन्नं भोक्तव्यं। अन्यथा भोक्ष्ये इति संकल्पप्रतिज्ञा मन्येत। दृश्यते हि स्व
कालातीतस्य प्रत्याब्दिकादेरुत्तरकालेनुष्ठानं। निषेधरूपत्वे तु न भोक्तव्यं। न
भोक्ष्ये इति प्रतिज्ञाभंगाभावात्। एतेन अयाचितस्य पर्युदासमात्ररूपत्वमपि प्रयती

निर्णयामृतकारस्याप्यवहरिष्याम्येवेतिसंकल्प्यनियमोक्तिपूर्वोक्तगौतमवचना
नालोचननिबंधनेवेस्युपेक्षणीया।अयाचितस्यफलमुक्तं।स्मृत्यंतरे।लेशप्रायश्चित्ता
न्नीमिलभुक्परांसिद्धिमवाप्नुयाद्दिति।मितभुक्तंतु चतुर्विंशमिते।प्रायश्चित्ते
लुहोचाष्टौप्राजापत्यविधिस्मृतइति।हृद्गाग्रासारूप्यर्थ।इत्यप्रायश्चित्तं।अथव्रतो
पयुक्तापरिभाषा।हृद्भवन्निष्ठःस्वखंडव्यापिमार्त्तंडायद्यखंडाभवेत्तिथिः।व्रतप्रा
रंभणंतस्यामनष्टगुरुशुक्रयुगितिथेःखंडत्वमाहसत्यव्रतः।उदयस्थातिथिर्याहि
नभवेद्दिनमध्यभाक्।साखंडानव्रतानांस्यादारंभश्चसमापनमिति।अनष्टगुरुशु
क्रयुगिसस्यत्वनस्तयोर्गुरुशुक्रयोरित्यर्थः।लल्लोपि।नीचस्थेवक्रेसंस्थेप्यतिचरे
णागतेबालवृद्धेऽस्तगतेवासंन्यासोदेवयात्राव्रतनियमविधिः।कर्णवेधस्तुदीक्षमौ
जीबंधोगमनंप्रतियमनविधिर्वास्तुदेवप्रतिष्ठावर्ज्याःसद्भिःप्रयत्नतः।त्रिदशाधिपतिगु
रौसिंहराशिस्थितेचेति।अन्यत्रापिपूर्वोदितेगुरौसिंहेनष्टेशुक्रेमलिम्लुचेगृ
हकर्मव्रतंयात्रांमनसापिनचिंतयेदिति।राजमार्तंडः।सिंहराशौतुसिंहांशेयदा
भवतिवाक्पतिः।सर्वदेशेष्वयंत्याज्योदंपत्योर्निधनप्रदः।वसिष्ठः।भागीरथ्युत्तरकू
लेगोलम्याद्दक्षिणेतथा।विवाहोव्रतबंधोवासिंहस्थेतेनदुष्यति।ज्योतिर्निबंधेमंगला
निहकुर्वतिसिंहस्थेवाक्पतिर्यदा।भानौमेषगतेसम्यग्गिरौकुर्यान्नकारयेत्।तथा।
माघादिपंचमासेषुसर्वत्रनिंदितंशुभं।गांगोदोत्तरंहित्वागुर्वादित्येषुनदुष्यति।गार्ग्यो
पिवसंगेचगुरोःशुक्रेबालेवृद्धेमलिम्लुचेचोद्यापनमुपारंभंव्रतानांनैवकारयेदिति॥

ति ३

२९

२ दे

तथा॥ अतीचारगतो जीवस्तं राशिं नैति वै पुनः॥ लुप्तसंवत्सरो ज्ञेयः सर्वधर्म
बहिष्कृतः॥ अथापवादाः॥ नृपे मेषे वृषे कुंभे यद्यतिचारगो गुरुः॥ न तत्र काललो
पस्यादित्याह गणावलो बोमुनिः॥ तथा वाराहितंत्रे॥ शुक्रोऽस्तो यदि वा वृद्धो गुर्वा
वृद्धो भवेद्यदि॥ मेषवृश्चिकसिंहेषु तथा दोषो न विद्यते॥ राघवभट्टीये ज्ञानसु
सागरसंहितायां॥ तथा काशीखंडे॥ निग्रहास्तोदयकृतो दोषो विश्वेश्वरालये
तथा॥ गोदावर्यां गयायां च श्रीशैले ग्रहणद्वये॥ सुरासुरगुरोर्णां च मौढ्यदोषो न वि
द्यते॥ तथा राघवभट्टीये तत्त्वसागरसंहितायां॥ पुण्यतीर्थे कुरुक्षेत्रे देवीपीठच
तुष्टये॥ प्रयागे श्रीगिरौ काश्यां कालाकाले न शोधयेत्॥ तथा ब्रह्मयामले॥ दिनभ
द्रा यदा रात्रौ रात्रिभद्रा यदा दिवा॥ न सा ज्या शुभकार्येषु प्राहुरेवं पुरातनाः॥ रत्नमाला
यां॥ विरुद्धसंज्ञा इह ये च योगास्तेषामनिष्टः खलु पाद आद्यः॥ सबै धृतस्त्यति पा
तनाम्नां सर्वोप्यरिष्टः परिघस्य चार्द्धं॥ तिरुस्क योगे प्रथमे सवज्रे व्याघातसंज्ञे न नव
पंचशूले। गंडे तिगंडे च षडेन व नाडयः शुभेषु कार्येषु निवर्जनीया इति॥ तथा तत्रैव॥ सो
मसौम्यगुरुशुक्रवासराः सर्वकर्मशुभं भवति सिद्धिदा इति॥ कर्मप्रदीपे॥ यत्रोपदिश्यते कर्म
कर्तुरंगं न तूच्यते॥ दक्षिणः स्तत्र विज्ञेयः कर्मणां पारगः करः॥ यत्र दिङ्नियमो नास्याज्ज
पहोमादिकर्मसु॥ तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्री सौम्यपराजितेति॥ प्राची उत्तरा॥ ईशानी वे
त्यर्थः॥ मार्कंडेयपुराणे॥ शिरःस्नानं च कुर्वीत दैवं पित्र्यमथापि वा इति॥ द्विजातीनां॥ संध्यावंद
नं सर्वकर्मसाः पूर्वांगमावश्यकं॥ संध्याहीनोऽशुचिर्नित्यो ह्यनर्हः सर्वकर्मसु इति स्मृतेः॥४॥

59

अथ सर्ववर्णसाधारणव्रतांगानि। तत्र देवलः। अशुक्लप्रातराहारः स्नात्वा चैव स-
माहितः। सूर्यादिदेवताभ्यश्च निवेद्य व्रतमाचरेदिति। संकल्पस्तु प्रातरेव कार्यः। प्रातः
संकल्पयेद्विद्वानुपवासव्रतादिकमिति स्मरणात्। भविष्ये। क्षमा सत्यं दया दानं शौ-
चमिंद्रियनिग्रहः। देवपूजाग्निहवनं संतोषस्तेयवर्जनं। सर्वव्रतेष्वयं धर्मः सामान्यो

प्र

दशधा स्मृता इति। अग्निहोमो व्याहृतिहोमः। अयं चानुक्तहोमेषु व्रतेषु। अग्निपुराणे
स्नात्वा व्रतवता सर्वव्रतेषु व्रतमूर्त्तयः। पूज्याः सुवर्णमय्याद्याः शक्त्या वै भूमिशायिना।
जपो होमश्च सामान्यं व्रतान्ते दानमेव च। चतुर्विंशा द्वादश वा पंच वा त्रय एव वा। विप्रा
भोज्या यथाशक्ति तेभ्यो दद्याच्च दक्षिणामिति। व्रतदेवतामूर्त्तिस्वरूपं भविष्ये। अनुक्ते
तद्द्रव्यसंख्या देवताप्रतिमा नृप। सौवर्णी राजती ताम्री वृक्षनामा निकीर्त्तिता। वि-
त्रजा पिष्टले पोथ्या निजवित्तानुरूपतः। आमाषात्पलपर्यंता कर्त्तव्या प्रणिविय जितेरिति।
सर्वत्रैव तु उद्यापनमावश्यकं। उद्यापनं विना यत्तु व्रतं तन्निष्फलं भवेत् इति पृथ्वीचंद्रो-
दये नारदपुराणात्। उद्यापनानुक्तौ तु तत्रैव। वित्तानुसारतो ज्ञेयमादद्यादनुक्तोद्यापने व्रते
गां वैश्य कांचनं दद्यात् व्रतस्य परिपूर्त्तये इति। भारते। सर्वोपनिषदे चैव सर्वकामे-
सु दक्षिणा। सर्वत्र तु मयोद्दिष्टा भूमिर्गावोथ कांचनमिति। अशक्तस्य तु नारदीये
सर्वेषामप्यलाभे तु यथोक्तकरणं विना। विप्रवाक्यं स्मृतं शुद्धं व्रतस्य परिपूर्त्तये। व-
चा विप्रवचो यस्तु गृह्णाति मनुजः शुभं। अदत्वा दक्षिणामायुः स याति नरकं ध्रुवमिति।
गृहीतव्रतत्यागे तु गृहीतव्रतत्यागे तु छागलेयः। पूर्वं व्रतं गृहीत्वा यो नाचरेत्काम-

३०

७७

मोहितः जीवन्मवतिचांडालो मृतश्वा चापि जायते इति। प्रायश्चित्तं चोक्तं गारुडे
क्रोधात्प्रमादाल्लोभाद्वा व्रतभंगो भवेद्यदि। दिनत्रयं न भुंजीत मुंडनं शिरसोथ वा इति। पुरा
णांतरे। उपवासमशक्तश्चेदेकं विप्रं तु भोजयेत्। तावद्धनानि वा दद्याद्यद्भक्तस्य द्विगुणं तथेति
वायवीयेपि। द्रव्यहानोपवासस्य फलं प्राप्नोत्यसंशयमिति। मात्स्ये तु उपवासेष्वशक्तानां
नक्तं भोजनमिष्यत इति। प्रायश्चित्तं कृत्वा पुनरपि व्रतं कार्यं। प्रायश्चित्ते ततः कृत्वा पुनरे
व व्रती भवेदिति स्मरणात् इति। सामान्यव्रतोपयुक्त परिभाषा। अथ इति श्रीसामंतचक्रचू
डामणिमरीचिविरचितनीराजनानीराजितकाशीश्वरपंचमगहिर[illegible]वारवविविधबिर
दावली विराजमानमहाराजाधिराजश्रीमदिंद्रमणिनृपतिनंदनश्रीमज्जसवंतसिं
ह प्रेरिताग्निहोत्रीकुळतिलकायमानश्रीमहादाजिभट्टसूनुभास्करविरचिते जस
वंतभास्करे सामान्यमासादिनिर्णयः प्रकाराः सामान्यमासमलमासतिथीमितोत्स्य
किंचैकभक्तमथनक्तमयाचितादि। निर्णीय सप्रतिमुदाजसवंतदेवसंप्रेरितेन विरचि
किलवर्षकृत्सं। तत्र तावत्संक्रांतिनिर्णयः। संक्रांतिर्नाम पूर्वस्माद्राशेरुत्तरराशौ श्रीसू
र्यस्य संक्रमणं। तत्र मेषादिद्वादशराशिसंबंधात्तत्तद्राशिसंज्ञया द्वादशविधं तत्र
मेषतुलाख्ये संक्रांती विषुवन्नामिके। वृषभसिंहवृश्चिककुंभा विष्णुपदनामकाः मि
थुनकन्याधनुर्मीनाः षडशीतिमुखनामकाः कर्कमकरे अयननामके। तत्र संक्रांतिः नृपः
स्सूक्ष्मो दुर्ज्ञेयः पिपीलिलक्षणैः तद्योगाद्ध्यधश्चोर्ध्वं त्रिंशन्नाड्यः पवित्रिता इ। प्रतिदेव
लेन यद्यपि सर्वासु संक्रांतिषु पूर्वोत्तरत्रिंशद्घटिकारूपः पुण्यकाल उक्तस्तथापि विशे

पविहितसंनिहितकालानुष्ठानोसंभवविषयः सः विष्णुपदविषयस्तु प्रदर्श्यते। अस्तुवै
वर्त्ते विषुवत्परामुहूर्त्तस्याः षट्त्रिंशतीति मुख्येत्र पंतथ्यः। विष्णुपदेत्रीणिपुण्यानि कथयो विषु रिति
पत्तु बृहस्पतिः। वर्त्तमाने तुलामेषे नाड्यस्तूभयतो दशेति। पत्र विष्णुपदयोर्द्वयवसिष्ठगणु
ण्यायां विष्णुपदयोश्च प्राक् पश्चादपि षोडशैव घट्यः पुण्याः। षोडशीस्यामतीतानागतावे ष्टी रुक्तो
स्तु नाडिकाः षष्ठिरिति। समेस्यात्तदृतत्वादिति न्यायात्। तत्स्तु षोडशी त्रिषु प्रत्येकं पंचदशात्रयु
टिकाः पुण्याः तुस्तर्योतरं दृष्टेन तत्सर्वं संनिहितकालानुष्ठानासंभवे ह्यस्या दशहृत्वीति पञ्चाक्षी
दिवसः। यायाः संनिहितानानाड्यः स्तास्ताः पुण्यतमाः मताइति। अयनयोस्तु बृहस्पतिः। अयने
विंशतिः पूर्वा मकरे विंशतिः परा इति कर्के पूर्वा विंशतिघटिकाः पुण्यकालः मकरे तु परा इत्यर्थः।
परः स्यानंतरमेव कर्कसंक्रमणमस्तास्त्राग्नेव मकरसंक्रमणे तदाकर्के परा विंशतिघटिका
पुण्यकालो मकरे तु पूर्वाइति ज्ञेयं। अग्निसंक्रमणे पुण्यमहः कृत्स्नं प्रकीर्त्तितमिति स्कंदवसिष्ठौ।
वचासाध्यो ऽत्रोस्नानदानादिप्रतिषेधे चाहन्यवपूर्वोत्तरभागयोः संभवाने दृष्टमेवापि
सेयंः प्रत्याहदेवलः दिनार्द्धं पुण्यमित्यपक्रम्य अयने द्वेविति दिवसे यने जाते सति दिनार्धं
पुण्यमित्यर्थः। अत एव माधवाचार्यैरुक्तबृहस्पतिवचनस्य मध्याह्नादिनापनविषयत्वमुक्तं
यनुवृद्धवसिष्ठः। त्रिंशत्कर्कटके नाड्यः इति तत्स्त्राक्व्यास्येयाः। तु निशि वा संक्रमणे पुण्य
कालनिर्णयः। अथ रात्रिसंक्रमणे देवलः। अस्तसंक्रमे पुण्यं दिनार्धं स्नानदानयोः।
रात्रौ संक्रमणे भानोर्विषुवतीति। विषुवनामकं संक्रमणं यदा पूर्वरात्रे तदा पूर्वदिनस्यान्ते
रार्धं पुण्यं यदा त्वपररात्रे तदापरदिनस्य पूर्वार्धमित्यर्थः। यदा चार्द्धरात्रेपि पूर्वतिथिमध्ये संक्र
मस्तदापि पूर्वदिनमेव पुण्यं विजानीयाद्यद्यपि स्याततिथिर्भवेत्। अर्द्धरात्रे व्यतीते तु वि

।८ ज्ञेयमपरेहनि॥ तिथिभेदे तु दिनद्वयमपि पुण्यमित्युपदमेव वक्ष्यं ते
विष्णुपदषडशीतिमुखयोर्विशेषः स्मर्यते॥ विष्णुपद्या धनुर्मीनन्दयुक्कन्या
सु वैयष्टा॥ पूर्वोत्तरगते रात्रौ भानोः संक्रमसो भवेत्॥ पूर्वाण्हे पंच नाड्यः स्युः पु
ण्याः प्रोक्ता मनीषिभिः॥ अपराण्हे तु पंचैव वश्यो तेस्मात्रैव कर्मणी तिविष्णुप
द्यादिसंक्रमणे पूर्वरात्रे सति पूर्वदिनापराण्हस्यांतिमाः पंच घटिकाः पुण्याः
अपररात्रे सति तु परदिनपूर्वाण्हस्यादिमाः पंच घटिकाः इत्यर्थः यदा तु अर्द्धरा
त्रएव संक्रमणं तदोक्तं॥ भविष्योत्तरे संक्रमस्तु निशीथे स्यात्स्युभौ माः पूर्वप
श्चिमाः संक्रांतिकाले विज्ञेयस्तत्र स्नानादिकं चरेदिति॥ निशीथपदेन द्वितीयप्र
हरस्यांत्या घटिका तृतीयप्रहरस्याद्या वेति घटिकाद्वयमुच्यते॥ तत्र संक्रमणे दि
नद्वयं पुण्यमित्यर्थः॥ अयनयोर्विशेषो भविष्योत्तरे॥ मिथुनात्कर्कसंक्रांतिर्यदि
स्यादंशुमालिनः प्रभाते वा निशीथे वा कुर्यादहनि पूर्वतः॥ कार्मुकं तु हयं संक्रमेत्तरविः
प्रदोषे वार्द्धरात्रे वा स्नानं दानं परेहनीति॥ माधवस्तु श्रीसूर्यस्योदयसंध्यास्तसंध्ययोः
कर्कमकरसंक्रमणे तु ह्यकर्कं उत्तरदिने॥ मकरे तु पूर्वदिनमेव पुण्यं यदा ह्यज्यो
तिर्निबंधानारदः॥ सूर्यस्योदयसंध्यायां यदि स्यादयनं भवेत्॥ तदोदयाद्रेहः पु
ण्यं पूर्वाण्हः पूर्वलोपदि स्यात्॥ अस्तमनसंध्यायां यदि सौम्यायनं भवेत्॥ परेहः पुण्यकालः
स्यात्परतश्चेत्परेहनीति॥ संध्यालक्षणमपि स एवाह॥ अर्द्धास्तमनात्संध्या घटि
कात्रयसंमिता॥ तथैवार्द्धोदयादूर्ध्वं घटिकात्रयसंमितेति॥ अत्रान्यान्यपि॥

विरुद्धवचनानि संतीति तत्र तावद्वृद्धवसिष्ठः । अर्वाक्चेदर्द्धरात्रे तु यदा संक्रमते रविः
प्राहुर्दिनद्वयं पुण्यं मुक्त्वा मकरकर्कटौ इति वचनेन रात्रिसंक्रांतिषु दिवानुष्ठानं
विधाय मकरकर्कयो रात्रावेवानुष्ठानमाह । याज्ञवल्क्योपि राहुदर्शनसंक्रांति
विवाहात्ययवृद्धिषु स्नानदानादिकं कार्यं निशि काम्यव्रतेषु च इति । मकरे बौधायन
स्का । अस्तंगते यदा सूर्ये दुषं याति दिवाकरः प्रदोषे वार्द्धरात्रे वा तदा पुण्यं दिनद्वयमिति
साह । श्राद्धे हेमाद्रौ मदनरत्ने वा न तदा पुण्यं दिनांतरमिति पाठः । एतेषां च विरुद्धवचसां त
न्निर्णयाचारा घ्यवस्थेति सिद्धांतः । तत्र दाक्षिणात्या म विष्णोत्तरीयवचोर्थमाश्रित्य तत्
प्राच्यास्तु बौधायनोक्तं । इतरे तु वृद्धवसिष्ठोक्तमिति द्वैधं इति रात्रिसंक्रमणे पुण्य
कालनिर्णयः । अथ विशेषमाह गालवः । मध्ये विषुवतिदानं विष्णुपदे दक्षिणायने चा
हौ षडशीतिमुखे तेति । तथोत्तरायणे च भूरिफलमिति । अयमर्थः यावान् पुण्य
कालोस्माघटिकादिर्विषुवदादौ निर्णीतस्तत्रैयानियोन्त्यो मध्यादिकालस्तत्रान
पुण्यतम इति । वारभेदादपि पुण्यकालभेदो । रवौ पुरातनसूर्ये घोरा विषो ध्वांक्षी
भौमवारे महोदरी । बुधे मंदाकिनी नाम मंदा सुरपुरोहिते । मिश्रिता शुक्रवारे स्या
ससीस्वरा नेश्रयेत्रिचतुः पंच सप्ताष्ट नवदृष्टा नासुतु । एतसंख्याकाः घटिकाः पुण्य
कालइत्यर्थः । इति विशेषतः पुण्यकालः । अथ संक्रांति कृत्यं शातातपः । संक्रांतौ यानि
दत्तानि हव्यकव्यानि दातृभिः तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि । रविसंक्रमणे
पुण्ये न स्नायाद्यदि मानवः सप्तजन्मसु रोगी स्याद् दुःखभागी च जायते इति । शाह्वो अ
यनद्वितये श्राद्धं विषुवद्वितये तथा संक्रांतिषु च सर्वासु पिंडनिर्वपणं हन इति । पंतुमासस्ते

हा

३२

65

ततः प्रभृति संक्रान्तावुपरागादिपर्वसु त्रिपिंडमाचरेच्छ्राद्धमेकोद्दिष्टं मृते हनीति
तत्संक्रांत्यादौ सत्स्वपि मृताहनिमित्तकं त्रिपिंडमेकोद्दिष्टं वा ज्येष्ठकनिष्ठपर्यालोचन
याश्राद्धं कर्तव्यमित्येतदर्थकं। उक्तं च हेमाद्रिणा। पिंडनिर्वपणादत्र इति विशेषणं प
प्रसंगात्तत्कालपतितं मृताहश्राद्धमाश्रपितुर्महतीति। एतेन मात्स्यवचने मालोच्य
व्यग्रहणाग्रहणवत्संक्रांतिनिमित्तकश्राद्धे पिंडदानविकल्प एवेति शूलपाणिः
प्रसक्तः। वसिष्ठः। उपोष्यैव तु संक्रांतौ स्नातो योऽभ्यर्चयेद्धरिं। प्रातः पंचोपचारेण स
म्यफलमश्नुते। अयने विषुवे चैव चंद्रसूर्यग्रहे तथा। त्रिरात्रोपोषितो नरः सर्वपापैः
प्रमुच्यते। स्नात्वाप्यः पूजयेद्देवं सर्वान् कामान् समश्नुते। सप्तोपोष्य रवेर्वारे नाद्यां
स्नात्वानुसंक्रमे। अर्कमभ्यर्च्य यत्नेन स दुःखी सुखमश्नुत इति। उपवासः पुत्रीगृ
हस्थातिरिक्तविषयः। यदाह जैमिनिः। आदित्यहनि संक्रांतौ ग्रहणे चंद्रसूर्ययोः।
उपवासो न कर्तव्यः पुत्रीणां गृहिणां तथेति। उपवासः संक्रांतिदिने स्नानदानादि
तत्पुण्यकाल इति सिद्धांतः। शातातपः। अयनादौ सदा देयं द्रव्यमिष्टं गृहेषु यत्
षडशीतिमुखे चैव मोक्षे वै चंद्रसूर्ययोरिति। इति श्रीमत्सामंतचक्रचूडामणि
रविरचितनीराजनानिराजितकाञ्चीश्वरपंचमगाहिरवार विविधबिरुदावली
विराजमान महाराजाधिराजश्रीमदिद्रमणिनृपतिनंदनश्रीमज्जसवंतसिंहप्रेरि
ताग्निहोत्रीकुलतिलकायमानश्रीमद्दापाजीभट्टसूनुभास्करविरचिते जसवंत
भास्करे संक्रांतिनिर्णयप्रकाशः। ७। अथ चैत्रमासः तत्र वस्त्रदानमुक्तं विष्णुधर्मे

रवे

६७

त्तेशाः। चैत्रे चित्राणि वस्त्राणि दत्वा सौभाग्यमश्नुत इति। विशेषांतरमुक्तं कालिकापुराणे
चैत्रे तु सकलं मासं शुचिः प्रयतमानसः। लौहित्यतोये यः स्नायात्स कैवल्यमवाप्नुयादिति।
लौहित्यो नाम पूर्वस्यां दिशि प्रसिद्धो ब्रह्मपुत्रो नदः। तत्र मंत्रः। ब्रह्मपुत्र महाभाग शांतनोः
कुलसंभवः। अमोघागर्भसंभूत पापं लौहित्य मे हरेति। अथ चैत्रे मीनसंक्रांतौ षडशीति
मुहूर्तत्रयं पुण्यतममित्याद्युक्तं प्राक्। अतिरेदानं तु विश्वामित्र आह। मीनप्रवेशे स्त्रीनानां
मात्स्यानामपि वा दानमममेति। दानमित्यनुषंगः। अत्र विशेषमाह वृद्धगार्ग्यः। मीने धनु
षि सिंहे च स्थिते सप्ततुरंगमे। क्षौरमन्नं न कुर्वीत विवाहं गृहकर्म चेति। अत्र मीनमेषयोः
र्वसंत इति। बोधायनोक्तेः। मधुश्च माधवश्च वासंतिकावृतू इति श्रुतेश्च वसंते तुलानद्य
नमपि देयं। यमधौम्योक्तेः। विष्णुधर्मोत्तरे। स्नानानुलेपनादीनां वसंते दानमिष्यत इति।। अथ
तिथिकृत्यं। चैत्रकृष्णप्रतिपद्दिवसे तोलकास्या साच पूर्वाग्राह्या। वत्सरादौ वसंतादौ बलिरा
ज्ये तथैव च। पूर्वविद्धैव कर्तव्या प्रतिपत्सर्वदा बुधैरिति। वृद्धवसिष्ठोक्तेः। अत्र तैलाभ्यं
गो नित्यः। वत्सरादौ वसंतादौ बलिराज्ये तथैव च। तैलाभ्यंगमकुर्वाणो नरकं प्रतिपद्यत इति
वृद्धवसिष्ठोक्तेः। अत्र विशेषो भविष्योत्तरे। चैत्रे मासि महाबाहो पुण्ये तु प्रतिपद्दिने
यस्तत्र श्वपचं स्पृष्ट्वा स्नानं कुर्यान्नरोत्तमः। न तस्य दुरितं किंचिन्नाधयो व्याधयो न प
भवति कुरुशार्दूल तस्मात्स्नानं समाचरेत्।। इति। नीराजनं तद्दिने सर्वरोगविनाशनमिति
श्वपचं चांडालं। तथा। प्रवृत्ते मधुमासे तु प्रतिपद्युदिते रवौ। कृत्वा चावश्यकार्याणि संतर्प्य
पितृदेवताः। मध्येऽथो ब्लिकाभस्म सर्वदुष्टापशांतये। तत्र मंत्रः। वंदितासि सुरेंद्रेण ब्रह्मणा

ष्टांकरेण चात्र नक्तं पाहि नो देवी भ्रते भ्रति प्रदायं बेति। तथा गोमहिष्यादियुक्तिं चिंतनत
सर्वभूमयेनपा विल्वपत्रैर्दिपिः सर्वलोकगणाधः स्वतोनपेदिति। अत्र रसालकुसुम
प्राशनमुक्तं। युधिष्ठिरं प्रति कृष्णेनाप्तिः पिबेतिय संताये चूतपुष्पसचंदनोऽसस्य तृतस्य
स्य कामस्य प्रीतये यं क्रियते जनैरिति। तत्र मंत्रः चूतमग्र्यं वसंतस्य माकंदकुसुमं तव
सचंदनं पिबाम्यद्य सर्वकामार्थसिद्धये इति। चैत्रकृष्णद्वितीयायां राज्ञोन्दोलोत्सव
उक्तस्तथैव। ततः प्रातर्द्वितीयायां पुत्रमित्रादिसंयुतः। नृपतिर्वितते दिव्ये वितानेन विभू-
षिते। सर्वतश्च समास्तीर्णे रत्नकंबलशोभिते। उपविश्यासने रम्ये स्नानपटे
सह सिंदूरं कुंकुमं कुंदपट्टवासैः सचंदनैः। विकीर्य लोकास्ताडलैः समास्यैव पृथक्-
पृथक्। न संगीतं विना देवं कुर्यात्कामममहोत्सवं। एवं कुर्वन्नवाप्नोति यावत्संवत्सरं सुख-
मिति। चैत्रकृष्णत्रयोदश्यां योगविशेषे गंगास्नानस्य महाफलमुक्तं। अहो डोवास
रेण समायुक्ता मधौ कृष्णा त्रयोदशी। गंगायां यदि लभ्येत शतसूर्यग्रहैः समा। तासांरे
णे न्यूनतारका। मैथिलनिबंधे तु शनिवारयोगे महावारुणी शुभयोगाधिका महावा-
रुणी स्मृता। तथा च तत्रैव। शनिवारसमायुक्ता सा महावारुणी स्मृता। गंगायां यदि ल-
भ्येत कोटिसूर्यग्रहैः समा। शुभयोगसमायुक्ता शनौ शतभिषा यदि। महामहेति विख्या-
ता त्रिकोटिकुलमुद्धरेदिति। चैत्रकृष्णैकादश्यां विशेषमाह। पुलस्त्यः। चैत्रकृष्णचतुर्द-
श्यां यः शिवसन्निधौ स्नानं प्रेतत्वमवाप्नोति गंगायां तु विशेषत इति। अथ चैत्रामावास्याम-
न्वादिः। अत्र कृत्यं भारते। यामन्वाद्या युगाद्याश्च तिथयस्तासु मानवः। स्नात्वा हुत्वा च जप्त्वा

वदत्त्वानंतफलं लभेदिति। अत्र पिंडरहितं श्राद्धं कुर्यात्तदुक्तं कालादर्शे विषुवाय
ने संक्रांतिमन्वादिषु युगादिषु। विहाय पिंडनिर्वापं सर्वश्राद्धं समाचरेदिति। दर्शितु स्प
वमन्वादेः संपाते श्राद्धकर्मणः। प्रसंगादितरस्यापि सिद्धेस्तत्र मात्रेरेदिति च। अत्रेदं
विंत्यं। द्वादशिकस्य सपिंडकत्वेन मन्वादेः स्वपिंडकत्वेन विरुद्धं ग[illegible]वालकं यं प्रसंगासिद्धि
वार्त्तिककाररीत्या न तोपन्नोकरोतीति वन्निषेधेन विधायकाभावे रंगीकर्त्तव्यं त्वेतस
चविषयांतरलाभे सति विकल्पस्याचितत्वात्। श्राद्धाकरणे प्रायश्चित्तं मुक्तमभि
धाने। तं भुवः प्रति मंत्रं च शतवारं जले जपेत्। मन्वादयोपलक्ष्यन्नाकुरुते नैव वापि यदुति
सत्रमावास्यापराह्णव्यापिनी ग्राह्या। पूर्वाह्णे तु सदा ग्राह्या शुक्ला मनुयुगादयः। दैवक
र्मणि पित्र्ये च कृष्णे चैवापराह्णिका इति। गावेत्रोक्तेः स्यापराह्णव्यापिनी ग्राह्या। अत्र
रात्रिभोजने प्रायश्चित्तमुक्तमभिधाने। रात्रौ भुंक्ते वत्सरे तु मन्वादिषु युगादिषु। अपि
स्वरेष्टिमंत्रं तु जपेद्दशानपातकं मिति च। त्रयस्य मलमासत्वे मासद्वये पि श्राद्धकार्यं प्रति
मासं मृताहे च श्राद्धं यत्स्मृति वत्सरं। मन्वादौ च युगादौ च तन्मासो रूपयोरपिति। मल
नरत्ने मरीच्युक्तेः। अथ चैत्र शुक्लप्रतिपदि संवत्सरारंभः। तत्रौदयव्यापिनी ग्राह्या। चै
त्रमासि जगद्ब्रह्मा ससर्ज प्रथमेहनि। शुक्लपक्षसमग्रं तु तदा सूर्योदये सतीति। ब्राह्मोक्तेः
दिनद्वये तत्र सत्त्वे सत्त्वे वा पूर्वा। वत्सरादावुस्यादिपूर्वोदाहृतलाद्धवसिष्ठवाक्यादित्या
कुः। अयंहि नेषा मान्नायः। पूर्वविद्धेत्यत्र पूर्वा चासौ विद्धा चेति। कर्मधारयाद्दिनद्वयउद
यसत्त्वे पूर्वा प्रतिपद्ग्राह्या। असत्वे तु एकदिएकदिनवर्त्तिनी प्रतिपदीतियद्यपि न संदिग्धा

तथापि दिनद्वये उदयव्याप्ति तथा कर्मलोप एव स्यादिति तदिदं पक्षद्वयं विरुद्धं परप्रतिपद्ग्रा-
माधुक्ते क दिनवर्त्तिन्यपि प्रतिपद्ग्राह्येत्युक्तमिति। चैत्रस्य मलत्वे शुद्ध एवारंभः। अत्रा-
प्येगो निस्य: वत्सरादित्वात्। अत्रैव नवरात्रारंभः। तत्र परयुता ग्राह्या। अमायुक्ता न कर्त-
व्या प्रतिपच्चंडिकार्चने। मुहूर्तमात्रा कर्तव्या द्वितीयादिगुणान्वितेति देवीपुराणात्। अ-
त्र प्रपादानमुक्तं अपरार्के भविष्ये। अतीते फाल्गुने मासि प्राप्ते चैत्रे महोत्सवे। पुण्येऽह्नि
विप्रकथिते प्रपादानं समारभेत्। तत्र मंत्रः। प्रपेयं सर्वसामान्या भूतेभ्यः प्रतिपादिता
अस्याः प्रदानात्पितरः तृप्यंतु हि पितामहा इति। अनिवार्यं ततो देयं जलं मासचतुष्टय-
मिति। अशक्तौ तु। प्रत्यहं धर्मघटको वस्त्रसंवेष्टिताननः। ब्राह्मणस्य गृहे देयः शीतामल-
जलः शुचिः। तत्र मंत्रः। एष धर्मघटो दत्तो ब्रह्मविष्णुशिवात्मकः। अस्य प्रदानात्सकलाः
मम संतु मनोरथाः। अनेन विधिना यस्तु धर्मकुंभं प्रयच्छति। प्रपादानफलं सोपि प्राप्नोति
न संशय इति। चैत्रशुक्लद्वितीयायां विशेषो भविष्योत्तरे। चैत्रशुक्लद्वितीयायामुमा प्रजा-
फलार्थिभिः। शिवपूजा वह्निपूजा च कर्तव्या मुनिसत्तमेति। देवीपुराणेपि। उमां शिवं हुता-
शं च द्वितीयायां प्रपूजयेत्। अविघ्नमन्नैर्नैवेद्यं गंधाद्यैर्नान्वितं। फलमाप्नोति विप्रेंद्र
सर्वक्रतुसमुद्भवमिति। अत्र द्वितीया सामान्यनिर्णयात्परैव। चैत्रशुक्लतृतीयायां वि-
शेषस्तत्रैव। तृतीयायां यजेद्देवीं शंकरेण समन्वितां। कुंकुमागुरुकर्पूरमणिवस्त्रसुगं-
धकैः। स्रक्गंधधूपदीपैश्च दमनेन विशेषतः। आंदोलयेत्ततो वत्स शिवोमातुष्टये सदा
रात्रौ जागरणं कार्यं प्रातर्देयाच्च दक्षिणा। हेमवस्त्रान्नपानादि तांबूलानि स्रजं तथा। सौ-
वर्णा तु उमा कार्या राजतः शंकरस्तथा। चतुर्भुजास्तु देवेभ्यो द्विजराजानुमा भवेदिति।
अत्र तृतीया मुहूर्तमात्रापि परैव। मुहूर्तमात्रसत्त्वेपि दिने गौरीव्रतं परे इति माधवीये।

इयं मन्वादिरपि॥ अत्र पूर्वाह्णव्यापिनी ग्राह्या शुक्लपक्षत्वात्॥ श्राद्धादौ चैवं । उपवासे
त्वधती व्यतीपातायां युगमन्वादयस्तथा॥ सन्मुखा उपवासे स्युर्दर्शनाद्यं वेति मासम्मता
ति॥ अत्रैव वह्निपुराणे परिणेन्॥ मत्स्योत्सवे तु दृष्ट्वा तन्मत्स्यजयंती॥ पुराणान्तरे चै
त्रशुक्लपंचम्युक्ता॥ वाराहपुराणे तु॥ आषाढशुक्ल एकादश्यां प्रातः मत्स्योत्सवे तिलकोपोषणं
त्वा॥ अत्र कल्पभेदाद्व्यवस्था॥ इयं तदुपासकानां नित्या॥ अन्येषां तु काम्या॥ रामनवम्यादि
त्तवचनविशेषात्सर्वेषां नित्येति वक्ष्यामः॥ अत्र चैत्रशुक्लपंचमी कल्पादिः॥ अत्र स्नानादे
र्महाफलमिति इयमेव श्रीपंचमीति दिवोदासः॥ चैत्रशुक्लसप्तम्यां विशेषो देवीपुराणे॥
भास्करस्य तु सप्तम्यां पूजां दमनकादिभिः॥ कृत्वा प्राप्नोति भोगादीन् विगतारिर्महातपा इति
अथ चैत्रशुक्लाष्टम्यशोकाष्टमी॥ अत्र कसंलेगो॥ अशोककलिकाश्चाष्टौ ये पिबंति पु
नर्वसु॥ चैत्रे मासि सिताष्टम्यां न ते शोकमवाप्नुयुः॥ तत्र मंत्रः॥ त्वामशोक नराभीष्ट मधुमा
ससमुद्भव॥ पिबामि शोकसंतप्तो मामशोकं सदा कुरु इति॥ अत्रैव भवान्या उत्सवः॥ तत्र शुक्ल
पक्षस्यत्वेन सामान्यनिर्णयात् सैवाष्टमी ग्राह्या॥ अत्र विशेषः काशीखंडे॥ भवानीयात्रा
पनूपन शुक्लाष्टम्यां मधौ नरः॥ न जातु शोकं लभते सदानंदमयो भवेदिति॥ विशेषांतरं तु॥
कालिकापुराणे॥ चैत्रे मासि सिताष्टम्यां यो नरो नियतेंद्रियः॥ स्नात्वा लौहित्यतोयेषु स याति
ब्रह्मणः पदमिति॥ लौहित्यो ब्रह्मपुत्रः॥ अन्यमपि विशेषमाह॥ विष्णुः॥ पुनर्वसुबुधोपेता
चैत्रे मासि सिताष्टमी॥ प्रातस्तु विधिवत्स्नात्वा वाजपेयफलं लभेदिति॥ चैत्रशुक्लनवमी
रामनवमी॥ इयं मध्याह्नव्यापिनी ग्राह्या॥ चैत्रशुक्ले तु नवमी पुनर्वसुयुता यदि॥ सैव मध्या
ह्नयोगेन महापुण्यतमा भवेत् इति॥ आगस्त्यसंहितायां॥ केवलापि सदोपोष्या नवमी

३७

राष्ट्रसंग्रहादिति च। दिनद्वये तद्व्याप्तौ वाव्याप्तौ वा पुनर्वसुयुतामपि नवमीं त्यक्त्वा वैष्णवैः
परैव कार्या। नवमी चाष्टमीविद्धा त्याज्या विष्णुपरायणैरित्यगस्त्यसंहितोक्तेः। अत एवोक्तं माध
वाचार्यैः। अष्टमीविद्धसत्र्यृक्षापि नोपोष्येति। स्मार्तैस्तु यदा प्रातस्त्रिमुहूर्ता नवमी दशमी
वरूपेण श्रीसूर्योदयात्प्रागेव समाप्ता तदाष्टमीविद्धैव कार्या दशम्यादिषु वृद्धिश्चेद्विद्धा स्याज्जै
ववे स्मवैरत दस्यपो व्रतं तत्रैव निश्चितमिति। रामार्चनचंद्रिकोक्तेः। उत्तरदिवसा एकादशी निमि
त्तोपवासेन नवमीव्रतपारणाप्रसंगेन पारणांते व्रतं ज्ञेयमित्युक्तेः। पारकर्मसमाप्तावि
तिस्मरणात्पूर्वं व्रतभंगापत्तेश्च। देवव्रतं नित्यापि। यस्तु रामनवम्यां तु भुंक्ते मोहाद्धि मूढधीः
कुंभीपाकेषु घोरेषु पच्यते नात्र संशय इति। अगस्त्यसंहितोक्तेः। तत्र सर्वेषां नित्यं तदुपवास
कानामेवेति। नियमः। तस्मात्सर्वात्मना सर्वैः कार्यं च नवमीव्रतमिति। तत्रैवोक्तेः। चैत्रमासि नव
म्यां तु जातो रामः स्वयं हरिः। पुनर्वस्वृक्षसंयुक्ता सा तिथिः सर्वकामदा इति। तेन फलस्मरणात्
काम्यं च। इदं च मलमासे न कर्तव्यं न कुर्यान्मलमासे तु महादानं व्रतानि चेति। संग्रहोक्तेः
स्पष्टमासविशेषोक्त्या विहितं वर्जयेन्मल इति। [illegible] अत्र विशेषोऽगस्त्यसंहितायां स्वगृहे
चोत्तमे देशे रामस्योज्ज्वलमंडपं। शंखचक्रहनुमद्भिः प्राग्द्वारे समलंकृतं। गुरुत्मच्छार्ङ्ग
बाणैश्च दक्षिणे समलंकृतं। मध्ये हस्तचतुष्कात्त्यं वेदिकायुक्तमंडपं। तथा ततः स्वर्णमुक्तां
रामप्रतिमां पलमात्रतः। चत्वारः सुवर्णाः पलं निर्मितां द्विभुजां दिव्यां वामांकस्थितजानकीं
बिभ्रतिं दक्षिणकरे ज्ञानं महामुने। वामेनाधःकरेणैव देवीमालिंग्य संस्थितां। सिंहा
सने राजते तत्र पलद्वयविनिर्मिते। अशक्तो यो महाभाग स तु वित्तानुसारतः। पलेन वा त
दर्द्धेन तदर्द्धार्द्धेन वा मुने। सौवर्णं राजतं वापि कारयेद्रघुनंदनं। यामप्रभृति तत्रात्र प्रोक्तं तथा
चक्रावुभौ। चापद्वयसमायुक्तं लक्ष्मणं चापि कारयेत्। दक्षिणे गरुत्मद्रथं पुत्रं विभीषणं तथा सुरैः

मातुरंकगतं राममिंद्रनीलसमप्रभं । तथा । ततः संकल्पयेद्देवं राममेवं स्मरन्मुने । अस्यां राम
नवम्यां च रामाराधनतत्परः । उपोष्याष्टयामेषु पूजयित्वा यथाविधि । प्रजानुमध्याह्ने पुरुषसू
क्तेन षोडशोपचारैः कार्या तथा । अत्रोक्तकुंकुमैर्युक्तमर्घ्यं दद्याद्विचक्षणः । तत्र पौराणिको
मंत्रः दशाननवधार्थाय धर्मसंस्थापनाय च । राक्षसानां विनाशाय दैत्यानां निधनाय च । प
रित्राणाय साधूनां जातो रामः स्वयं हरिः । गृहाणार्घ्यं मया दत्तं भ्रातृभिः सहितोऽनघ इति । कौसु
ल्यापूजनैव पौराणिको मंत्रः । रामस्य जननी चासि रामरूपमिदं जगत् । अतस्त्वां पूजयिष्या
मि लोकमातर्नमोऽस्तु ते । नमो दशरथायेति पूजयेत्पितरं ततः । तथा पंचामृतेन स्नानेन संपू
विधिनात्ततः पुष्पांजलिं पुनर्दत्वा यामे यामे प्रपूजयेत् । तथा उपोषणं जागरणं पितृन्मुदि
श्य तर्पणं । तस्मिन्दिने तु कर्त्तव्यं ब्रह्मप्राप्तिमभीप्सुभिः । ततः प्रातः समुत्थाय स्नानसंध्यादिकाः
क्रियाः समाप्य विवद्रामं पूजयेत् विधिवन्मुने । ततो होमं प्रकुर्वीत मूलमंत्रेण मंत्रवि[illegible]
वैत्तिपद्मकुंडे वा स्थंडिले वा समाहितः । लौकिकाग्नौ विधानेन शतमष्टोत्तरं ततः । साज्येन पाय
सेनैव स्मरन् राममनन्यधीः । आचार्यं चैव संपूज्य दक्षिणां तु प्रयत्नतः । प्रार्थयेत्तेपि श्रीरामप्रतिमादा
नं करिष्येहं द्विजोत्तम । भक्त्याचार्यो भव प्रीतः श्रीरामोऽसि त्वमेव च । तथा । ततो भक्त्या सुसं
तिष्ठ आचार्यं पूजयेन्मुने । ततो रामं स्मरन्दद्यादेवं मंत्रमुदीरयेत् । तत्र मंत्रः । इमां स्वर्ण
मयीं रामप्रतिमां समलंकृतां । चित्रवस्त्रयुगच्छन्नां रामाहं राघवाय ते । इति दत्वा विध
नेन दद्याद्वै दक्षिणां शुभं । ब्रह्महत्यादिपापघ्नी दोलनीयो देवरामः । सलक्ष्मीको महोत्सवैः
चैत्रशुक्ले काद्दश्यां विष्णोपोत्साहे । चैत्रमासस्य शुक्लायामेकादश्यां तु वैष्णवैः । आंदोलनी
यो देवेशः सलक्ष्मीको महोत्सवैः । चैत्रशुक्लद्वादश्यां विष्णोपोरामार्चने चंद्रिकायां । द्वादश्यां

चैत्रमासस्य शुक्लायां दमनोत्सवः बोधायनादिभिः प्रोक्तः कर्त्तव्यः प्रतिवत्सरमिति
तथा। पारणाहे न लभ्येत द्वादशी घटिकापि चेत्। तदा त्रयोदशी ग्राह्या पवित्रदमना
र्पणे इति। पाद्मेपि। ऊर्जे व्रते मधौ दोलाश्रावणे तंतुपूजनं। चैत्रे च दमनारोपमकु
र्वाणो व्रजत्यधः इति। तथा रामार्चनचन्द्रिकायां। हरो न दमनारोपस्यान्मधौ विघ्नतो यदि
वैशाखे श्रावणे वापि न तिथौ स्यात्तदर्पणं। शुक्रास्तादावपि कार्यं उपाकर्मोत्सर्जने
च पवित्रदमनार्पणे। इज्यापनस्य बलिं चित्रे ज्ञापनं परिवर्त्तने कुर्यात् शुक्रस्य च गुरोर्मौ
ढ्येपीति विनश्यय इति। वृद्धगार्ग्योक्तेर्मलमासे तु न कार्यं। उपाकर्मोत्सर्जनं च पवि
त्रदमनार्पणमिति। कालादर्शे निषेधात्। चैत्रशुक्लत्रयोदश्यामनंगव्रतं। तत्र पूर्वा
ग्राह्या। पूर्वानंगत्रयोदशीति। माधवोक्तेः। दीपिकायामपि त्रयोदशी तिथिः पूर्वसि
त इति। अत्रैव विशेषो देवीपुराणे। चैत्रशुक्लत्रयोदश्यां मंगारकदिने यदि। पिशा
चत्वं पुनर्न स्यात् गंगायां स्नानभोजनात्। चैत्रशुक्लत्रयोदश्यां यः स्नात्वा शिवसन्नि
धौ। भागीरथ्यां विशेषेण नासौ प्रेतोपि जायते इति। चैत्रशुक्लचतुर्दशी पूर्वा। मधौ
श्रावणमासस्य शुक्लायां च चतुर्दशी। सा रात्रिव्यापिनी ग्राह्या नान्या शुक्ला कृष्णा च नेति
बोधायनोक्तेः। चैत्रपौर्णमासी मन्वादिः तत्र विशेषो धर्मजिरे। संप्राप्य चैत्रमासस्य
शुक्लपंचदशीं नरः। चित्रवस्त्रयुगं दद्यात् सोपवासो जितेंद्रियः। ब्राह्मणांश्च नमस्कृत्य
तेन सौभाग्यमाप्नुयादिति। तथा आह्ने। मंदे वार्के गुरौ वापि वारेष्वेतेषु चैत्रिका। तत्रा
श्वमेधजं पुण्यं स्नानश्राद्धादिभिर्भवेदिति। इति श्रीमहासामंतचक्रचूडामणिरवि
रविनतनीराजनानिराजित काशीश्वर पंचम गहिरवार विविरदावली विराजमान

महाराजाधिराजा श्रीमदिंद्रामणिनृपतिनंदनश्रीमहाराजजसवंतसिंहस्येरिता
गिनहोत्रीश्रीमद्बापाजीभट्टसुतभास्करनिरचिते जसवंतभास्करे चैत्रमासनिर्णयप्र
काशः। अथ वैशाखः। तत्र विशेषः मात्स्ये मधुमासस्य शुक्लायामेकादश्यां विशेषितः। पंच
दश्यां तु भौवीरामेषसंक्रमणे तु वा। वैशाखस्नाननियमं ब्राह्मणानामनुज्ञया मधुसू
दनमभ्यर्च्य कुर्यात्संकल्पपूर्वकं। तत्र मंत्रः। वैशाखं सकलं मासं मेषसंक्रमणे रवेः। प्रातः
सनियमः स्नास्ये प्रीयतां मधुसूदनः। मधुहंतुः प्रसादेन ब्राह्मणानामनुग्रहात्। निर्विघ्न
मस्तु मे पुण्यं वैशाखस्नानमन्वहं। माधवे मेषगे भानौ मुरारे मधुसूदन। प्रातःस्नानेन मे
नाथ फलदो भव पापहन्निति। तथा। विसृष्टा वद्धि तुलामकरमेषेषु प्रातःस्नानं विधी
यते। हविष्यं ब्रह्मचर्यं च महापातकनाशनमिति। तथा पाद्मे। तीर्थं चानुदिवं स्नानं तिलै
श्च पितृतर्पणं। दानं धर्मघटादीनां मधुसूदनपूजनं। माधवे मासि कुर्वीत मधुसूद
नतुष्टिदं। अज्ञाननामतीर्थे विष्णुतीर्थमुत्तमं। प्रदानं ज्ञायते नाम तस्य तीर्थस्य भो द्विजाः।
तत्रैकस्नानमात्रेण विष्णुतीर्थमिदं स्मृतमिति। नारदोक्तेः। तथा। एकभक्तं यथा नक्तमयाचितमत
द्विजः। माधवे मासि यः कुर्यात् लभतेर्थमभीप्सितं॥ अत्रोद्यापनमुक्तं पाद्मपुराणे। मास
मेवं बहिः स्नात्वा नद्यादौ विमले जले। एकादश्यां च द्वादश्यां पौर्णमास्यामथापि वा। उ
पोष्य नियतो भूत्वा कुर्यादुद्यापनं बुधः। मंडपं कारयेद्दिव्यं कलशं तत्र विन्यसेत्। निष्केण
वा तदर्धेन तदर्धार्धेन वा पुनः। तत्प्रमाणाकारयेद्देवं सौवर्णं लक्ष्मणान्वितं। सौवर्णं वाथ नि
ष्कं सुवर्णं च तुष्टयं। लक्ष्मीयुक्तं जगन्नाथं पूजयेदासने बुधः। अर्घ्यपाद्यैः चंदनैः पुष्पैर्दीपैर्धूप
नैवेद्यसंचयैः। एवं संपूज्य विधिवद्रात्रौ जागरणं चरेत्। प्रभाते तु कृते तत्र नाथ ग्रहवेद्या
महान्यजेत्। होमं कुर्यात्प्रयत्नेन पायसेन विचक्षणः। तिलाज्येन यवैर्वापि सर्वैर्वापि स्व

शक्तितः अष्टोत्तरसहस्रं तु शतमष्टोत्तरं तु वा। प्रतद्विष्णुरनेनैव इदं विष्णुरनेन वा।
व्रतसंपूर्णसिध्यर्थं धेनुमेकां पयस्विनीं। पादुकोपानहौ छत्रं गुरवे अंजनं तथा। शय्यां
सोपस्करां दद्याद्दीपिकां दर्पणं तथा। सोपस्करां तुलीकादिसंहितां। ब्राह्मणान्भोजयेत्तत
त्रिंशत्तु तेभ्यो दद्याच्च दक्षिणां। कलशान् जलसंपूर्णान् तेभ्यो दद्याच्च वासस्तथा। एवं कृ
ते माधवस्य उद्यापनविधौ शुभे। फलमाप्नोति सकलं विष्णुसायुज्यमाप्नुयात्। इति
कृष्णस्योद्यापनं। एतदुद्यापनाशक्तौ तु तत्रैव। वैशाख्यां विधिवत्स्नात्वा भोजयेन्न ब्रा
ह्मणान् दश। वत्सरं सर्वपापेभ्यो मुच्यते नात्र संशयमिति संपूर्णमासस्नानाशक्तौ तु
पाद्मे त्रयोदश्यां चतुर्दश्यां वैशाख्यां च दिनत्रयं। अपि सम्यग्विधानेन नारी वा पुरुषो
ऽपि वा। प्रातः संनियमस्नातः सर्वपापैः प्रमुच्यते इति। वैशाखस्य मलमासत्वे द्वयं स्ना
नादिनियमाः कर्तव्याः। काम्यानां समाप्तिनिषेधात्। मासोपवासचांद्रायणादिकं तु मल
मास एव समापनीयं। यदुक्तं कालादर्शे। आरब्धं मलमासात्प्राक् काम्यं कर्म समापि
तं। आगते मलमासे तु तत्समाप्तिर्न संशय इति। माधवादीनामप्येवं संमतं। एतेन
कालादर्शोक्तवचसा मलमास एव वैशाखस्नानादिसमापनमिति। हेमाद्रिमदनादि
निबंधोक्तिश्चैवं सा॥ अथ वैशाखदानानि। विष्णुधर्मोत्तरे। अपूपानां प्रदानेन वैशा
खस्य स्वर्गमश्नुते। स्कांदे तु। प्रपा कार्या च वैशाखे देवे देया गलंतिका। उपानत्व्यजनं छत्रं सू
क्ष्मवासांसि चंदनं। जलपात्राणि दिव्यानि तथा पुष्पगृहाणि च। पानानि विविधानि द्रा
रंभाफलान्यपि। अथ वैशाखे मेषसंक्रमणे विषुवस्नानं। षण्मुहूर्तं पुण्यतमं तत्र
दानमाह विश्वामित्रः। मेषसंक्रमणे भानोर्मेषदानं महाफलं। अथ वैशाखकृत्यानि हेमा
खकल्पे पंचम्यां विशाखायां। परशुरामप्रतापनिबंधे स्कांदे। मार्गशीर्षे तथा माघे वैशाखे

75

कार्त्तिके तथा। पुत्रकामनरैः कार्या प्रकृष्टा ह्य स्कंदपंचमी। पुत्रकाममनुष्याणां मन्योपा-
योन विद्यते। सुखकालनुपंचमीश्राद्धामिति प्रेतेपितामह। तत्रादौ प्रायश्चित्तमुक्तं तत्रैव।
प्रायश्चित्तं विशुध्यर्थं रुद्रैकादशकं जपेत्। गायत्र्यष्टसहस्राणि ह्यानो न तु [illegible]मयेत्
ब्राह्मणान्वेदविदुषः आकृष्य मंत्रको विद्यानिति। आरंभे विद्रापस्तत्रैव। आरंभे केश-
नासांसि कृत्वा गोदैन्दक्षिणाः तथा। आदि विधिश्च तत्रैव। वैश्वदेवाह्निकं श्राद्धं षडङ्गं पिं-
डैमकल्पयेत्। धूरिलोचननामानि विश्वेदेवांस्तथार्चयेत्। रौप्यपात्रेण वक्तुर्यात्रिका-
म्यश्राद्धं विधानतः। मध्यमं तु ततः पिंडं नमः कुर्यात्पितामह। गृहीत्वा यजमानेन दे-
ताभ्यश्चेत्र वंजयेत्। पिंडमाघ्राय दातव्या धर्मपत्नी पत्रस्विना। तथा गृहीत्वा तं पिं-
डं संप्राश्य विधिवत्सरार्हे दक्षिणां द्विजमाश्रिय ततो भुंजीत वाग्यतह्निति। वैशाखन-
वम्यां विशेषो। भविष्योत्तरे। वैशाखमासि राजेंद्र नवम्यां पक्षयोर्द्वयोः उपवासप-
रो भक्त्या पूजयानास्तु चंडिकां। हंसकुंदेंदुसंकाशं तेजसा ध्रुवसन्निभं। विमान-
वरमारूढो देवलोकमहीयत इति। वैशाखशुक्लतृतीया। अक्षयतृतीया। यथा मुप-
क्रम्योक्तं भविष्योत्तरे। अस्यां तिथौ क्षयमुपैति। हुतं न दत्तं तेनाक्षयेति कथिता मु-
निभिः स्तृतीया। उद्दिश्य यस्करपितृन्क्रियते मनुष्यैस्तच्चाक्षयं भवति भारत सर्व-
मेवेति। इयं पूर्वाह्णव्यापिनी ग्राह्या दिनद्वयेनस्तत्वे परा। तथा च नारदीयाद्वमि-
ष्टवाक्यं। वैशाखे शुक्लपक्षे तु तृतीयारोहिणीयुता। दुर्लभा बुधवारेण सोमेनापि
आपुरा। रोहिणी बुधयुक्तापि पूर्वविद्धा विवर्जिता। भक्त्या कृताप्यमाधातः पुण्यं
हंति पुराकृतं। गौरी विनायकोपेता रोहिणीबुधसंयुता। विनापि रोहिणीयोगा-
त्पुण्यकोटिप्रदा सदेति। गौरीतृतीया। विनायकश्चतुर्थी। इयं युगादिरपि। कै-

त्युगस्य त्रेतायुगस्येति। पुराणेऽपि विध्यं कल्पभेदात् व्यवस्थाप्यम्। अत्र प्राग्युक्तमन्वादि
वन्निर्णयादि सर्वं द्रष्टव्यं। वैशाखस्य मलमासत्वे तु तत्रैव युगादिकृत्यं कुर्यात् दशाह
रासुनोत्कर्षश्चतुर्थ्यपि युगादिश्चित्रप्रसंगो नोत्कर्षनिषेधबलेन हेमाद्रिप्रभृतिनि
बंधकारैः। सौरमासग्रहणं गौणस्यैव सिद्धांतितत्वात्। श्राद्धमात्रस्य तु वचनादृष्टिः।
तथा मरीचिः। प्रतिमासं मृताहेषु श्राद्धं च प्रतिवत्सरं। मन्वादौ च युगादौ च तन्मासे स्युभयो
रपि। तत्र विशेषो स्कांदपुराणे। युगादौ स्नात्वा तु नरः स्नात्वा विधिवल्लवणोदधौ। गोसहस्र
प्रदानस्य कृतस्य फलमाप्नुयात्। तत्फलं लभते मर्त्यो भूमिदानस्य तच्च ध्रुवमिति
तथा भविष्ये। वैशाखस्य तृतीयायां श्रीसमेतं जगद्गुरुं। नारायणं पूजयेथाः पुष्प
धूपविलेपनैः। वस्त्रालंकारसंभारैर्नैवेद्यैर्विविधैस्तथा। ततस्तस्याग्रतो धेनुं लव
णस्याढकेन तु। कुर्यात्कुरुकुलश्रेष्ठ चतुर्भागेन वत्सकं। अविचर्मोपरि स्थाप्य कल्पयि
त्वा विधानतः। तत्स्थापितक्रमयोगेन ब्राह्मणाय प्रदापयेत्। श्रीधः श्रीपतिः श्रीमान्
श्रीरामः प्रीयतामिति। अनेन विधिना दत्वा तु धेनुं विप्राय भारत। गोसहस्रदानगुणं
प्राप्नोति हि न संशयमिति। अन्योऽपि विशेषस्तत्रैव। वैशाखशुक्लपक्षे तु तृतीयायां त
थैव च। गंगातोये नरः स्नात्वा मुच्यते सर्वकिल्बिषैः। तस्यां कार्यो यवैर्होमो यवैर्विष्णुं
समर्चयेत्। यवान् दद्याद्द्विजातिभ्यः प्रयतः प्राशयेद्यवानिति। अत्र दानदानविशेषो
पि तत्रैव। उदकुंभान् सकनकान् सान्नान् सर्वरसैः सह। यवगोधूमचणकान्
सक्तुदध्योदनं तथा। वैशाखे सर्वमेवात्र सस्यदानं प्रशस्यते इति देवीपुराणे। तत्रै

पापौ तु वैशाखेरे हि। एतत्क्षेत्रप्रसूत्यन्तु उदकुंभप्रदानेन सुरवलोके महीयत इति। तत्र
मंत्रः। एष धर्मघटो दत्तो ब्रह्माविष्णुशिवात्मकः। अस्य प्रदानात् तृप्यंतु पितरोपि पि
तामहाः। गंधोदकतिलैर्मिश्रं सान्नं कुंभं फलान्वितं। पितृभ्यः संप्रदास्यामि अक्षय्यमु
पतिष्ठतु इति। तथा विष्णुपुराणे। पानीयमप्यत्र तिलैर्विमिश्रं दद्यात्पितृभ्यः प्रयतो
मनुष्यः। श्राद्धं कृतं तेन समासहस्रं रहस्यमेतत्पितरो वदंति। अत्र अक्षय्यतृतीयानि
र्णयः। अस्यामेव परशुरामावतारः। तत्र प्रदोषव्यापिनी ग्राह्या। दिनद्वये तद्व्याप्तावेक
तः समव्याप्तौ च परान्यथा पूर्वेति। मार्गवार्चेन दीपिकायां निर्णीतं। वैशाखशुक्लसप्त
म्यां गंगोत्पत्तिरुक्ता। ब्राह्मे। वैशाखशुक्लसप्तम्यां जह्नुना जाह्नवी पुरा। क्रोधात्पीता पु
नस्त्यक्ता कर्णरंध्रात्तु दक्षिणात्। तां तत्र पूजयेद्देवीं गंगां गगनमेखलां। तत्र पूर्वाह्णव्या
पिनी ग्राह्या। दैविककर्मत्वात्। मध्याह्नव्यापिनीत्यन्ये इति तु शिष्टाचारः। दिनद्वये तद्व्याप्ता
वव्याप्तौ वा सामान्यनिर्णयात्पूर्वा। वैशाखशुक्लद्वादश्यां पायोगविशेषो ज्योतिर्निबंधोप॥
चाननस्थो गुरुस्फर्मि पुत्रो मेषे रविः स्याद्विद्धि शुक्लपक्षे। पाताभिधाना करभेण युक्ता ति
थिर्व्यतीपात इति ह योगः। अस्मिंस्तु गोभूमिहिरण्यवस्त्रदानेन सर्वं परिहाय पापं। सु
रत्वमिंद्रत्वमनामयत्वं मर्त्याधिपत्यं लभते मनुष्य इति। पंचाननः सिंहकरस्थोहस्तः पा
ताभिधाना तिथिर्द्वादशीति। हेमाद्र्यादयो निबंधकाराः। वस्तुतस्तु मासाभिधाने ति
पाठोक्तः। मासानां द्वादशत्वेन तत्संख्या द्वादशीति तिथिप्रतिपादनस्वारस्यात्। पाताप दे
स्पातथात्वात्। दृश्यते चाचिरंतनपुस्तकेषु तथैव पाठः। वैशाखशुक्ले चतुर्दश्यां नृसिंह

३९

जयंति॥ सा प्रदोषव्यापिनी ग्राह्या॥ नारसिंहपुराणे॥ वैशाखे शुक्लपक्षे तु चतुर्दश्यां
निशामुखे। मज्जन्मसंभवं पुण्यं व्रतं पापप्रणाशनं। वर्षे वर्षे तु कर्त्तव्यं मम संतुष्टकारणं
मिति॥ दिनद्वये वैषम्येण तद्व्याप्तावधिका ग्राह्या॥ समव्याप्तौ परा॥ ततो मध्याह्नवेलायां
नद्यादौ विमलजले स्नात्वा॥ उपक्रम्य परिधाय ततो वासो व्रतकर्म समारभेत्॥ इति॥ तत्रैवो
क्तः संकल्पकालेपि सत्वात्॥ दिनद्वयेप्यव्याप्तौ पूर्वा॥ गौणकालसत्वात्॥ अत्र योगविशे
षेणापि प्राशस्त्यमुक्तं॥ तत्रैव॥ स्वातीनक्षत्रयोगे च शनिवारे महद्व्रतं॥ सिद्धियोगस्य योगे
न च वणिजे करणे तथा॥ पुंसां सौभाग्ययोगेन लभ्यते दैवयोगतः॥ एभिर्योगैर्विनापि स्यान्म
द्दिनं पापनाशनं॥ इदं च व्रतं नित्यं॥ दिव्यं सिंहदिनं यस्तु अर्थयेन्मुनिपुंगव स सत्यमदमते
स्तु भवेज्जन्म निरर्थकमि[illegible]स्यादिना भविष्योत्तरे अकरणे प्रत्यवायस्मरणात्॥ नृसिंहपुरा
णे॥ विज्ञाय मद्दिनं यस्तु लंघयेत्स पापकृन्नरः॥ स याति नरकं घोरं यावच्चंद्रदिवाकरौ॥ इति
व्रतं लक्ष्मीनृसिंहस्य ये कुर्वंति च ये नराः शतं पुत्रपौत्रसहिता मोदन्ते स्थिरसंपद इति॥ नृसिं
हकल्पोक्ता मंत्राः॥ अत्र सर्वेषामधिकारः॥ सर्वेषामेव वर्णानां व्रतेस्मिन्नधिकारितेति त
त्रैवोक्तेः॥ अत्र प्रतिमादानादि॥ तत्रैव बहुदृच्या॥ वैशाखपौर्णिमायां॥ भविष्योत्तरे विशेषः॥
वैशाखी कार्तिकी माघी तिथयोतीव पूजिताः॥ स्नानदानविहीनास्ता न नेयाः पांडुनं
दनेति॥ तथापरार्के जाबालिः॥ स्थितान्मुदकुंभं च वैशाख्यां च विशेषतः॥ निर्दिश्य धर्म
राजाय गोदानफलमाप्नुयात्॥ सुवर्णतिलयुक्तैस्तु ब्राह्मणान्सप्त पंच वा॥ तर्पयेदुदपा
त्रैस्तु ब्रह्महत्यां व्यपोहति॥ इति॥ तथा यमगाथासु पृच्छकृष्णाजिने सखुरं शृंगसंयु
तं॥ तिलैः प्रच्छाद्य वासोभिः सर्ववस्त्रैरलंकृतं॥ वैशाख्यां पौर्णमास्यां तु विशाखासु विशेषतः॥

ससमुद्रगुहा तेन सशैलवनकानना। सप्तद्वीपा विता दत्ता पृथिवी नात्र संशय मिति
विष्णुरूपा कृष्णाजिने तिलान्कृत्वा हिरण्यमधुसर्पिषा। ददाति यस्तु चत्राय सर्वं तर
ति दुष्कृतमिति। महाभारते वैशाख्यां पौर्णमास्यां तु तिलान्दद्यात् द्विजातिषु। तिला
न्भक्षयेच्चापि स्नानस्त्कसदा बालंभनं चैतरिति। पक्षे तु ज्येष्ठमासि कुजेहनि। हरते दश
पापानि तस्माद्दशहरा स्मृतेति। तानि च पापानि। अदत्तानामुपादानं हिंसा चैवाविधा
नतः। परदारोपसेवा च कायिकं त्रिविधं स्मृतं। पारुष्यमनृतं चैव पैशुन्यं चापि सर्वशः
असंबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधं। परद्रव्येष्वभिध्यानं मनसानिष्टचिंतनं वित
थाभिनिवेशश्च मानसं त्रिविधं स्मृतमिति। स्कांदे तु दशयोगा उक्ताः। ज्येष्ठमासि सि
तपक्षे दशम्यां बुधहस्तयोः। गरानंदव्यतीपाते कन्याचंद्रे वृषे रवौ। दशयोगे नरः स्नात्वा
सर्वपापैः प्रमुच्यते इति अत्र बुधभौमवारयोर्विकल्पः। अस्याश्च दशम्या योगबाहु
ल्यनिर्णयः। श्रीमत्समस्तचक्रचूडामणिरनिरवित्तनीराजनानिराजितकाशीश्वरपंक
मगहिरवार विविधविरदावली विराजमान महाराजाधिराजश्रीमद्दिङ्मणिनृपति
नंदनश्रीमहाराजजसवंतसिंहप्रेरितागस्तिकुलतिलकायमान श्रीमद्दापाजिसू
नुभास्करविरचिते जसवंतभास्करे वैशाखनिर्णयप्रकाशः। अथ ज्येष्ठः। तत्र विष्णु
र्मोधविष्णुधर्मोत्तरे। छत्रदानात्तथा ज्येष्ठे सर्वान्कामान्समश्नुते। देवीपुराणे तु सर्वान्
कामानवाप्नोति ज्येष्ठे तिलमयीं तथेति धेनुं दत्त्वेत्यनुषंगः। तथा। वामनपुराणे। उदकुं
भांबुदानं च तालवृंतसचंदनं। त्रिविक्रमस्य प्रीत्यर्थं दातव्यं ज्येष्ठमासि चेति। अत्र वृ
षसंक्रांते विष्णुपददानमुहूर्तत्रयं पुण्यकालं। तत्र दानमाह। विश्वामित्रः। वृषसंक्रमणे दानं।

गवां प्रोक्तं तथैव चेति। शुक्रेश्च शुचिश्च गेभावृन्तइति श्रुतेः। गीमत्तुलातटे नमपि
दीयं पटुक्तं। विष्णुधर्मोत्तरे। पानकानां तथा गौरीभिरुक्ति। दानमिष्यन्तइस्तनुषंगः। अथ मि
थुनः। तत्र ज्येष्ठशुक्लप्रतिपदादिषु दशम्यंतासु विशेषः। काशीखंडे। ज्येष्ठे मासि सिते
पक्षे प्राप्य प्रतिपदं तिथिं। दशाश्वमेधिके स्नात्वा मुच्यते सर्वपातकैः। एवं सर्वासु तिथि
षु क्रमस्नायी नरोत्तमः। अथोक्तपक्षदशमीं प्रतिजन्माद्यमुत्सृजेदिति। इयमेव दशमी
दशहरानाम यत्रउक्तं वाराहे। दशमी शुक्लपक्षे तु इयं मलमासे सति तत्रैव कार्या दशाह
रासु नोत्कर्षवृत्तिवचनात्। यथान्योपि विशेषो भविष्योत्तरे तस्यां दशम्यामेतत्स्तोत्रं गं
गाजले स्थितः। यः पठेद्दशकृत्वस्तु दरिद्रो वापि वाक्षमः। सोपि तत्फलमाप्नो
ति। गंगां संपूज्य यत्नतः इति। प्रतिपदादिदशम्यंततिथिवृद्धौ एकावृत्तिवृध्या वा
पठनीयमिति तु शिष्टाचारः। तथा काशीखंडे। लिंगं दशाश्वमेधेशं दृष्ट्वा दश
हरातिथौ। दशजन्मार्जितैः पापैः त्यज्यते नात्र संशय इति। अत्र गंगाप्रतिमा
पूजनादि। भविष्योत्तरादवसेयं। तथा स्कांदे। यां कांचित्सरितं प्राप्य दद्यात्तिलोद
कं। मुच्यते दशभिः पापैः समहापातकैरपीति। इति दशहरानिर्णयः। ज्येष्ठशुक्लचतु
र्थ्यां भवान्या उत्सव इत्युक्तं। ब्राह्मे। ज्येष्ठस्य शुक्लचतुर्थ्यां तु जाता पूर्वमुमा सती। तस्मात्सा
तत्र संपूज्या स्त्रीभिः सौभाग्यवृद्धये। उपहारैश्च विविधैर्गीतनृत्योत्सवादिभिः। दी
पैः पयोभिर्वस्त्रैश्च पत्रपुष्पैः सुगंधिभिरिति। ज्येष्ठशुक्लैकादशी निर्जला। उक्तं हि
स्कांदे। ज्येष्ठमासि नृपश्रेष्ठ या शुक्लैकादशी शुभा। निर्जलं समुपोष्याथ जकुमानस

ज्येष्ठशुक्लचतुर्थी उ०

येनुवेति इत्यादिरनुषंगः। तत्र मिथुनसंक्रांते ष्षडशीतिमुख्यसंज्ञान्मुहूर्ते पुरायतमां त
त्र स्नानमाह। विश्वामित्रः। वस्त्रान्नपानदानानि मिथुने विहितान्यिति ॥ अथ तिथयः। आ
षाढ नवम्यां विशेषो भविष्योत्तरे। उपवासपरो भक्त्या नवम्यां पक्षयोर्द्वयोः। आषाढमा
सि राजेंद्र यः कुर्यान्नक्तभोजनं। पूजयेत् च दुर्गां मे शुरी नाम्नी तु नामतः। ऐरावणगतां
शुभ्रां श्वेतरूपेण रूपिणीं। स ऐरावणमारुह्य इंद्रस्यानुचरो भवेदिति॥ आषाढशुक्लद्वि
तीयायां विशेषस्तिथितत्वे। स्कांदे। आषाढस्य सिते पक्षे द्वितीया पुष्यसंमिता। तस्यां र
थे समारोप्य रामं मां भद्रया सह। यात्रोत्सवं प्रवर्त्याथ प्रीणयेत द्विजान्बहून्। ऋक्षा
भावे तिथौ कार्या यात्रा सा प्रीतये ममेति। आषाढशुक्लसप्तम्यां विशेषो ब्राह्मे। आषा
ढशुक्लसप्तम्यां विवस्वान्नाम भास्करः। जातः पूर्वासु तस्मान्नं तत्रोपोष्य यजेत्सदा
रथचक्राकृतौ रम्ये मंडले सर्वकामदं। भक्ष्यैर्भोज्यैस्तथा चान्नैः पुष्पधूपविलेपनैरिति
षा। आषाढशुक्लदशम्यां मन्वादिः। आषाढशुक्लैकादश्यां देवशयनी। पद्मे तु ब्राह्मे। एकादश्यां
तु शुक्लायामाषाढे भगवान् हरिः। भुजंगशयने शेते चक्षीरार्णवजले सदेति। यत्तु वाराहे
द्वादश्यां संधिसमये नक्षत्राणामसंभवे। आभाकासितपक्षेषु शयनावर्तनादिकमि
ति द्वादश्यामपि देति। यत्तु वाराहे। द्वादश्यां संधिसमये नक्षत्राणामसंभवे। आभा
कासितपक्षेषु शयनावर्तनादिकमिति द्वादश्यां जांभायां योगनिद्रांसमाप्नुयादिति
पूर्णिमायां यच्चारामार्चनं चंद्रिकायां पारणादिने तत्रैव देवाचारा व्यवस्था। तत्र विष
योपशमविषये। आभाकासितपक्षेषु मैत्रश्रवणरेवती। आदिमध्यावसानेषु प्रस्वा
पावर्त्तनोत्सवाइति। उत्सवो बोधः। तस्यापवादो विष्णुधर्मोत्तरे। द्वादश्यां च ससं

योगं षाड्योगो न कारणमिति। वाराहेपि षाड्योगोयदा न स्यात्कृष्णे णापि तदा भ
वेत्। नक्षत्राणामप्यसंभवे सायं संध्यायां प्राग्गुरूहेन वाराहवचनात् स्वापादिकार्यं
मलमासेपि तन्निषिद्धं ईशानस्य बलिं विष्णोः शयनं परिवर्त्तनं इति। कालादर्शो
क्तेः। अत एव चातुर्मास्यव्रतारंभोप्युक्तो भारते। आषाढे तु सिते पक्षे एकादश्यामुपो
षितः चातुर्मास्यव्रतं कुर्याच्च किंचिन्नियतो नर इति। ब्रह्मवैवर्त्तेपि। एकादश्यां तु
गृह्णीयात्संक्रांतितो कर्कटस्य वा। आषाढ्यां वा नरो भक्त्या चातुर्मास्यव्रतं त्रियामि
ति। निःसंदेहं वार्षिकांश्चतुरो मासान्वाहयेत्केनचिन्नरः व्रतेन नो चेदाप्नोति कि
ल्बिषं वत्सरोद्भवं। असंभवे तुलार्केपि कर्त्तव्यं तत्प्रयत्नत इति। भारतोक्तेः। तुल्ये च
मलमासादौ नारंभणीयं। असंक्रांते तथा मासे दैवे पित्र्ये च कर्मणि। मलमा
समनुष्ठं वर्जयेत्सतिमान्नर इति चातुर्मास्यप्रकरणे भविष्योक्तेः। द्वितीया
द्यारंभस्तु भवत्येव। अशुचिर्वा शुचिर्वापि यदि स्त्री यदि वा पुमान्। व्रतमेतन्नरः कृ
त्वा मुच्यते सर्वपातकैरिति। भार्गवार्चनदीपिकायां स्कांदोक्तेः। तथा वृद्धगार्ग्येन
शेषावेन मोषं च शुक्रगुर्वोर्न वा तिथिः। एवं उक्तं वितथयदादौ चातुर्मास्यविधौ नरः इति
तत्राप्यनिषेधः। प्रतिवर्षं च यः कुर्याद्वैवं वै संस्मरन् हरिं। देहांते तेन प्रदिप्तेन विमानेन ना
र्कवर्चसा। मोदते विष्णुलोके सो यावदाभूतसंप्लवमिति। सर्वेषामाद्याधिकारः। य
दुक्तं ब्रह्मवैवर्त्ते। द्विवेदा भक्तिसंयुक्ता मानोवा गणनायके। कृत्वा व्रतस्य नि
यमं यथोक्तं फलभाग्भवेदिति। अथ व्रतानि विष्णुपुराणे। आषाढादि च

तुर्मासान्मासानःस्नायीभवेन्नरः विप्रायभोजनंदद्यात्कार्तिक्यांगोप्रदोभवेत्।
मनकुंभंतथादद्यात्सर्वान्कामानवाप्नुयात्। एवंव्रतमित्युक्तं विष्णुलोकप्रदा
यकमिति। आषाढादीस्थलहूणसंविज्ञानोवदुश्रीहिः। भविष्ये। श्रावणेवर्जयेच्छा
कं दधिभाद्रपदेतथा। दुग्धमाश्वयुजेमासिकार्त्तिके द्विदलंत्यजेत् इति। अत्रशा
कशब्दोदशसुरूढः। यथोक्तं। मूलपत्रकरीराग्रफलकांडाधिरूढकाः। त्वक्पुष्पं
कवचंचेति। शाकंदशविधंस्मृतमिति। अमरसिंहोप्याह। शाकाख्यंपत्रपुष्पा
दीति। यत्तुशाकंत्यजेन्निशातुमनेनेतिनूणाकइति। व्युत्पत्तेः व्यंजनमात्रं व्यंजन
मात्रंवर्जनीयमिति। तन्न। अहीनन्यायेनस्वप्राप्तिकापारूढयोगलावलीय
स्त्वात्। दधिरूढकाअत्रनुबृनवतक्रादिनामनिषेधः। तत्रदधिव्यवहाराभा
वात्। दुग्धग्रहणेनतुपायसादिवर्जितं। दध्यादिविकारस्तुनात्र। दुग्धानुलेपस्तं
मितदुग्धव्यवहाराभावात्। पायसादौतस्यैवतद्व्यवहारायनीभूतदुग्धस्यैवपा
यसत्वात्। यद्योतुभट्टपाठात्पयसायघनीमामीहस्वभिधीयतइति। संधिन्यादिक्षी
रनिषेधेतुदध्याद्यपिवर्ज्यं क्षीराणिपान्यभक्ष्याणितद्विकाराशनेबुधः। सप्तरात्रं
व्रतंकुर्यात्प्रयत्नेनसमाहितः। इत्यपरार्केनोक्तेः। एतेनप्रकृतिनिषेधेविकृति
निषेधोयुक्तिनएवेति। मिताक्षराग्रंथाज्ञायश्चिंसाद्विदलमनुवृत्तेनवपयसोसत्तोर
सद्वयसंबंधस्तन्निषिध्यतेनचमाषमुद्गमसूराश्चवणकाश्चकुलत्थकास्तिष्या
वाराजमाषाश्चअष्टौद्विदलंस्मृतमिति। श्लोकोक्तोष्टावेवाहीनन्यायाद्विदल

४२

85

न्नाशे हरेः ॥ इति वाक्यं । प्रोक्षन्यधिकरणन्यायेन दूषेहे रक्षमात्मकत्वात् स्कांदेव च
त्क संभवपु दर्शनपरं । अत एवाहुः बीजमेव समुद्भूतं द्विदलं वांकुरं विना । इत्यपत्ते पत्र
सस्येषु द्विदलं लभ्रितं तदिति । स्कांदे । व्रतार्थे नानि नित्यानि । चतुराश्रमवर्त्तिनां एतानि
पाकादिभ्रतानि । तथा । द्विदलं व कुबीजं च वर्ह्नाकं चैव वर्जयेत् । नित्यान्येतानि विप्रे
न्द्र व्रतान्याहुर्मनीषिणः । तथा वार्षिकांश्चतुरो मासान् प्रसुप्ते वैजनार्दने । मंचर व हूरि
ष्ट्रापनं वर्जयेद्भक्तिमान्नरः । अन्नं तौ वर्ज्जयेद्धान्यं मासं मधु परौदनं । पटोलं मूलकं चैव वरंता
किं च न भक्षयेत् । तथा । जंबीरं राजमाषांश्च मूलकं रक्तमूलकं । कूष्मांडं चेक्षुदंडं च चातु
र्मास्ये सजेत् बुधः । तथा । विशेषाद्बृहतीं धात्रीं कूष्मांडं तित्तिणीं त्यजेत् । आरमदीपे रं
ताकं च कलिंगं च बिल्वोदुंबर भिः सदा । उदरे यस्य जीर्येत तस्य दूरतरो हरिर्भिः स
दा दृश्यान्तं भीः सदेति पाठे तु श्लेष्मातकं नितिव्याख्येयं । प तथापराके देवलो ब्रह्म
यस्य जीवंति थान्नौ चं सस्यमामिषवर्ज्जनं । व्रतेष्वेतानि चत्वारि वरिष्ठावीतिनिश्च
यः । आमिषाणि चोक्तानि । पाद्मे । प्राणिर्गेण्यं च र्ण च र्मांबु । जंबीरं बीजपूरकं । अपः पि
ष्टं च माषादि च द्विदलार निवेदितं । दग्धमन्नं मसूरं च मांसं चेत्यष्टधामतं । रक्तं च तत्त्वे
गालक्यं तु सुप्ते देवि विवर्जयेत् । तथा । गोछागीमहिषीदुग्धादन्यदुग्धादि वा मिषं । धा
न्ये मसूरिका । प्रोक्त अन्नं पर्युषितं तथा । द्विजक्रिडा रसाः सर्वे लवणं भूमिजं तथा । तां
म्रपात्र स्थितं गव्यं जलं पल्वलसंस्थितं । आत्मार्थं याचितं चात्र मामिषं तत्स्मृतं बुधैरिति
तिष्यावान्न राजमाषांश्च मसूरं संधितानि च । वृंताकं च कलिंगं च सुप्ते देवे विसर्ज
येत् । निष्पावाः त्रिंविधान्यानि संधितानि लवणशाकादीनि तथा । विष्णुधर्मोत्तरे

ते

चतुर्ष्वपि हि मासेषु हविष्याशीतपाययभाक्। हविष्याणि तु सामान्ये कादम्बीष्टुकरणे निरूप
पि तथा। भावार्थदीपिकायां पाद्मे। नापनीबीधनी मध्ये स्वामी दूर्वाप मार्गके। अंगराजे न
दिवा स्कन्दार्चयित कदाचन। तथा चतुर्वर्गचिंतामणौ। आषाढादि चतुर्मासान् भंगं वर्ज
येन्नरः। समाप्ते च पुनर्दद्यात्तिलतैलयुतं घटं। आषाढादि चतुर्मासं वर्जयेन् खर्कं तानरे
ताकं गंजनं चैव मधुसर्पिर्वराग्निवितं। कार्त्तिक्यां तु पुनर्देयं ब्राह्मणाय निवेदयेत्। तथा रोड
पानंदे स्कांदे। एकांतरं द्व्यंतरं वा कुर्यान्मासोपवासकं। अन्नोदनं फलाहारं नक्तव्रतमथापि
वा। अन्यान्यप्यपि काम्यानि गुडादिवर्जनरूपाणि। व्रतानि तत्समाप्तौ दानानि च चतुर्वर्गचिं
तामणौ द्रष्टव्यानि। इति चातुर्मास्यव्रतानि। अथ चातुर्मास्यव्रतग्रहणप्रकारः। [illegible]रश्च गमग्र तापु
निबंधे। आह। एकादश्यां तु शुक्लायां आषाढे भगवान् हरिः। भुजंगशयने शेते क्षीरार्णवजले
सदा। तदा तस्य प्रतिमा कार्या सर्वलक्षणसंयुता। सुधातुरौप्यपर्यंकैः नीलमह्हिः सुदारुभिः
ताम्रारकूटहमजैस्तथा। चित्रपटेषु वा। आरकूटं पित्तलं इति। क्रियामारकूटे इत्यभिधा
नात्। लक्ष्मीया उत्संगहस्तेषु विन्यस्तचरणांबुजां। नानाविधोपकरणैः पूजयेच्च विधिपूर्वकं
उपवासश्च कर्तव्यो रात्रौ जागरणं तथा। तस्यां रात्रौ व्यतीतायां द्वादश्यां पूजयेत्ततः। अपार
गमान्ततान् सुगीतवाद्यं निवेदयेत्। तथा चतुर्वर्गचिंतामणौ भविष्ये। एवं तां प्रतिमां विष्णोः पू
जयित्वा स्वयं नरः। प्रभाते तां ततो विप्राः कृतांजलिपुटस्तथा। चतुरो वार्षिकान्मासान् दे
वस्योत्थापनावधि। इयं करिष्ये नियमं निर्विघ्नं कुरु मेऽच्युत। तत्र मंत्रः। इदं व्रतं मया देव गृहीतं
तं पुरतस्तव। निर्विघ्नं सिद्धिमायातु प्रसादात्तव केशव। गृहीतेस्मिन्व्रते देव पंचत्वं यदि मे भवेत्
तदा भवतु संपूर्णं त्वत्प्रसादाज्जनार्दन। इति व्रतग्रहणप्रकारः। अथ अत्र च तत्प्रभुद्धे धारणा
भविष्ये। तापित्वां चैव बौधिन्यां चक्रतीर्थे तथैव च। नापि चक्रविधानेन वन्हिप्रतापवेन रैः

इति॥ इदं च श्मश्र्वादिविषयमिति॥ ८ खिचंड्रादेः प्रतिपादनं॥ तं खचक्राध्ययनं च गीतनृत्यादिकं
तथा॥ एकजातेरयं धर्मो न जातु स्याद् द्विजन्मनः॥ इत्यादिस्मरणात्॥ न स्कन्दस्याग्निहोत्रं यथा नि
त्यं वेदस्याध्ययनं तथा॥ ब्राह्मणस्य तथैवेदं न मसुड्रादिधारणं॥ इत्यादि पाद्मोक्तेः सर्वविषय
मर्यादं अतियत्नः इति॥ वैष्णवावैष्णवविषयौ विधिनिषेधौ नित्याचारप्रकाशे मयाव्यवस्थापि
तमिति। तत एवावसेयं॥ इति ज्ञायन्येकादशीकृत्यं॥ आषाढशुक्लद्वादश्यामनुराधा प्रथमपादे
पारणं केचिन्निषेधंति॥ तत्र भविष्यवचनं मूलमपुरादर्शं॥ आभाकानितपक्षेषु मैत्र
श्रवणरेवती॥ संगमे न हि भोक्तव्यं द्वादशी द्वादशीं हरेत् इति॥ आषाढभाद्रकार्त्तिकशुक्लद्व
द्वादशीष्वनुराधारेवतीयुक्तासु पारणं न कुर्यादित्यर्थः॥ तथा॥ विष्णुधर्मस्थले नोहाहरंति मै
त्राद्यपादे स्वपिति हरिविष्णुः पौष्णांत्यपादे प्रतिबोधमेति॥ श्रुतिश्च मध्ये परिवर्त्तमेति सुप्ति
प्रबोधपरिवर्त्तनमेवं वर्ज्यमिति॥ तदेतत्सर्वं महानिबंधेषु दर्शनान्निर्मूलं यत्तु चतुर्वर्गचिं
तामणौ इदं दृष्टं इति॥ किंचित् यदपि दिवोदासीये॥ हनुमत इत्यन्ये तदुभयमपि पुस्तकाना
लोचनेन निर्बंधेन निरूपेक्ष्यं॥ आषाढपौर्णमासी मन्वादिः॥ अत्रैव कोकिलाव्रतमुक्तं भविष्ये
आषाढपौर्णमास्यां तु संध्याकाले उपस्थिते॥ संकल्पयेन्मासमेवं श्रावण्यां सहं गृहां स्नानं करि
ष्ये नियता ब्रह्मचर्ये स्थिता सती॥ भोक्ष्यामि नक्तं भर्त्राथ्यां करिष्ये प्राणिनां दयामिति॥ अस्यां न
क्तंव्रतत्वात्सायाह्नव्यापिनी ग्राह्या॥ अत्रैव व्यासपूजायां तु मध्याह्नव्यापिनी ग्राह्या॥ दिनद्वये त
थात्वे तु परैवेति॥ चातुर्मास्यपक्षतो॥ अत्रैव विशेष उक्तो ब्राह्मे॥ आषाढ्यामाश्वयुज्यां च पौष्यां मा
घ्यां च सर्वदा॥ न गृह्णीयाद्दुर्वाक्षीरं सर्वं वत्साय निक्षिपेदिति॥ तथा विष्णुस्मृतौ॥ आषाढ्यामाषाढायु
युक्तायामन्नपानादिदानेन तदेवाक्षयमाप्नोतीति॥ इत्याषाढपौर्णमासी॥ इति श्रीमत्सामंत

चक्रचूडामणिार स्वैरविरचितनीराजनीराजितपंचमगाहिरवार विविध बिरुदावली वि
राजमानश्रीमहाराजेंद्र नृपमंदरनश्रीजसवंतसिंहप्रेरिताग्निहोत्रीकुलतिलकापमान
श्रीमहादाजिभट्टसूनुभास्कर विरचिते जसवंतभास्करे आषाढनिर्णयप्रकाशः॥ अथ श्रा
वणः॥ तत्र विष्णुधर्मोत्तरे॥ श्रावणे वस्त्रदानस्य कीर्तितं तु महत्फलं मिति॥ वामनपुराणे तु
घृतं च क्षीरसंयुक्तं कुंभांश्च घृतधेनु फलानि च॥ श्रावणे श्रीधरप्रीत्यै दातव्यानि विपश्चिते
ति॥ अत्र मासि वडवा प्रसवो निषेधः॥ यदुक्तं मथवर्णावेदगृह्यपरिशिष्टे माघे बुधे च महि
षी ~~[illegible]~~ श्रावणे वडवा दिवा॥ सिंहे गावः प्रसूयंते स्वामिनो मृत्युदायका इति॥ अत्र तदुक्त्म
मताख्या शांतिः कार्या॥ अत्र कर्कसंक्रांतौ पूर्वा विंशति घटिकाः पुण्यकालः॥ रसायुक्तं तत्र
दानं विश्वामित्र माह॥ घृतधेनुप्रदानं च कर्कटे पि विशिष्यते॥ तथा विष्णोर्वातरं सुमंतुराह
कुंभे कर्कटे वापि कन्यायां कार्मुके रवौ॥ रोमखंडं ग्रहस्थस्य पितृन्प्राप्नोयते यमः॥ रोमखंडं रो
मखंडनं॥ अत्र नभव्रत नभस्यश्च वार्षिकावृतू इति क्षते वर्षे तुलादानमपि देयं॥ यदुक्तं
विष्णुधर्मोत्तरे॥ छत्राणं तटनं लरदुति वर्षे छत्राणां दानमिस्यर्थः॥ तथा वर्षासु तिलदानमप्य
न्यत्रोक्तं॥ अथ तिथयः॥ तत्र श्रावणे द्विचातुर्मास्यकस्य पक्षगतासु च तस्य पिद्वितीयास्व
शून्यशयनं व्रतं॥ यद्विष्णोत्तरेउक्तं॥ तस्यचंद्रोदयव्रतस्य सा [illegible] तत्कालव्यापिनी ग्राह्या य
दुक्तं॥ एकादश्यां भक्ते दिवा नक्ते निशि चंद्रोदये व्रते॥ तिथिस्तात्कालिकी ग्राह्या पारणे तु परा ति
थिरिति॥ संवर्त्तोपि॥ कृष्णाष्टमी रहस्त्यासा वित्रिवृटपैत्रकी॥ कामत्रयोदशी रंभाउपोष्याः
पूर्वसंयुता॥ इति वह्नतत्स्या॥ अशून्यशयनद्वितीया॥ दिनद्वये चंद्रोदयव्यापित्वे परा॥ चतुर्द
सितपक्षेषु मासेषु श्रावणादिषु॥ अशून्याख्यं व्रतं कुर्याज्जयया दितु फलाधिकमिति स्मरणात्॥

इयमेव फलद्धिनिये स्कन्द्यते॥ श्रावणकृष्णाष्टमी मन्वादिः॥ श्रावणशुक्लतृतीया मधुस्रवाख्या
गुर्जरेषु प्रसिद्धा॥ तत्र तृतीया सामान्यनिर्णयात् परैव ग्राह्या॥ श्रावणे मधुस्रावणिका कज्जली
हरितालिका॥ चतुर्थी मिश्रिता स्त्रीभिर्दिवा नक्तं विधीयत इति। दिवोदासीये वचनाच्च श्राव
णशुक्लचतुर्थी पूर्वा॥ मातृविद्धा गणेश्वर इति वचनात्॥ गणपतिपूजादिविषयं चैतत्। यदुक्तं
ब्रह्मवैवर्ते। चतुर्थी च तृतीयायां महापुण्यफलप्रदा॥ कर्तव्या व्रतिभिर्वत्स गणनाथसुतोषिणी
ति श्रावणशुक्लपंचमी॥ नागपंचमी सा परेति सामान्यनिर्णय एवोक्तम्। अधायिं तत्र पूजाविषयं॥
उपवासे तु मध्यंदिनव्यापिनी तु भवेत्सा र्यं मुपोषणमिस्फत्तो। मध्यंदिनस्कंध युगं चतुर्थी यस्या मिश्रयेः॥
तत्र स्कांदे भविष्ये। श्रावणे मासि पंचम्यां शुक्लपक्षे नराधिप। द्वारस्योभयतो लेख्या गोमयेन विषो
ल्बणाः। पूजयेद्दधिवद्भिरदधिदूर्वांकुरैः कुशैः॥ गंधपुष्पोपहारैश्च ब्राह्मणानां च तर्पणात्। ये
स्यां पूजयंतीह नागान्भक्तिपुरःसराः। न तेषां सर्पतो वीर भयं भवति कुत्रचित्॥ इति। अथ श्रावणशुक्ल
द्वादश्यां पवित्रारोपणमुक्तं विष्णुरहस्ये। श्रावणस्य सिते पक्षे कर्कटस्थे दिवाकरे। द्वादश्यां वासु
देवाय पवित्रारोपणं स्मृतं। द्वादश्यां श्रावणे वापि पंचम्यामथवा द्विजाः। अनुकूलेषु कर्तव्यं पंच
दश्यामथापि वा इति॥ पवित्रं च तत्रैव। अष्टोत्तरशतं कुर्यात् चतुःपंचाशदेव वा। सप्तविंशतिरेवाथ
ज्येष्ठमध्यकनीयसी। अधमं नाभिमात्रं स्यादूरुमात्रं द्वितीयकं। मूलं वा जानुमात्रं स्यात्प्रतिमायाः नि
गद्यत इति। शिवपवित्रं तु शिवागमे। एकाशीत्यापि वा सूत्रैः त्रिंशता वाष्टयुक्तया। पंचाशता वा
कर्तव्यं तुल्यग्रंथ्यंतरालयोः। द्वादशांगुलमानानि व्यासादष्टांगुलानि च। लिंगविस्तारमाना
नि चतुरंगुलकानि चेति। अस्य गौणकालश्चोक्तो रामार्चनचंद्रिकायां। पवित्रारोपणं विष्णो
श्रावणे न भवेद्यदि। कार्तिक्यवधि शुक्लासु कर्तव्यमिति नारदः। हेमरूप्यताम्रक्षौमैः सूत्रैः कौ
शेयपद्मजैः। कुशैः काशैश्च कार्पासैर्ब्राह्मण्या कर्तितैः शुभैः। कृत्वा त्रिगुणितं सूत्रं त्रिगुणीकृ

स्य शोधयेत्॥ तत्रोत्तमं पवित्रं तु षष्ट्यासह शतैस्त्रिभिः सप्तत्यासहितैर्द्वाभ्यां शताभ्यां म
ध्यमं स्मृतं॥ साशीतिना शतेनैव कनिष्ठं तत्समाचरेत्॥ साधारणपवित्राणि त्रिभिः सूत्रैः
समाचरेत्॥ उत्तमं स्यात् शतग्रंथिं पंचाशत् ग्रंथि मध्यमं कनिष्ठं तु पवित्रं स्यात् षट्त्रिंशग्रं
थिशोभनं॥ षट्त्रिंशच्च चतुर्विंशद्द्वादशेति केचन॥ चतुर्विंशद्द्वादशाष्टौ विद्येके मुनयो वि
दुरिति॥ हेमादिपवित्राणि॥ सुगांधतरपराणि॥ कलियुगे तु क्षौ॥ कालांतरे कार्पासं तु कलौ स्मृ
मिति॥ देवताविशेषे तिथिविशेषस्तत्रैव॥ धनस्स्वर उमा गौरी गणेशः सोमराट् गुहः भास्कर
श्चंडिकांबा वासुकिश्च तथर्षयः॥ चक्रपाणिर्हनंगश्च शिवो ब्रह्मा तथैव च॥ प्रतिपत प्रभृ
तिष्वेताः॥ पूज्यास्तिथिषु देवताः॥ यथोक्ताः॥ शुक्लपक्षे तु तिथयः श्रावणस्य चेति॥ पवित्रे काल
विशेषस्तत्रैव॥ आषाढांते चतुर्दश्यां नभस्य नभसोस्तथा॥ अष्टम्यां च चतुर्दश्यां पक्षयोरुभयोः
समामिति॥ पवित्रारोपणं च चतुर्णामपि वर्णानां नित्यमिति॥ चतुर्वर्गचिंतामणौ प्रतिपादितं॥
आकरणे तु॥ हामार्चनं चंडिकायां पवित्रारोपणं काले न करोति कथंचन॥ तदा तु तज्जपेन्मंत्रं स्तो
त्रं वापि समाहितः इति॥ इति पवित्रारोपणविधिः॥ अथ प्रयोगः॥ तत्र तावत् पूर्वेद्युरेकादश्यामधिवा
सनं कुर्यात्॥ तद्यथा॥ आचम्य प्राणानायम्य देशकालौ संकीर्त्य श्रीपरमेश्वरस्य वार्षिकपूजनफ
लप्राप्तिकमनया पवित्रारोपणांगत्वेन करिष्यमाणे ध्यास्मधिवासनं करिष्य इति संकल्प्य
देवं प्रार्थयेत्॥ क्रियालोपविधानार्थं यत्त्वया विहितं प्रभो॥ मयैतत् क्रियते देव तव तंतव
तुभ्यं पवित्रकं॥ न मे विघ्नो भवेद्देव कुरु नाथ दयां मयि॥ सर्वदा सर्वदा भगवान् विश्वोद्भव त्वं परमा ग
तिः॥ उपवासेन देवेश तोषयामि जगत्पते॥ कामक्रोधादयो येन न मे स्युर्व्रतघातकाः॥ अ
द्यप्रभृति देवेश यावद्वैशेषिकं दिनं॥ तावद्रक्षा त्वया कार्या सर्वस्यास्य नमोस्तु ते॥ इति देवं

संप्राथ्यो। मही द्यौरिति मंत्रेण। भुवं मंत्र्य। ॐ पयः पयः संवदंत इति मंत्रेण। तत्रान्तराणिं कृ
त्वा। तत्र कालत्रूं छिस्सादि मंत्रैः कुंभस्थापनादि कृत्वा। तत्र वैणवे वंशपूर्णपात्रे संस्थाप्य तत्र
वस्त्रवेष्टितामुत्तममध्यमकनिष्ठानि पवित्राणि। त्रिंशत्कुशनिर्मितारत्निपरिमाणमेकां
वेणीं च स्थापयेत्। ततः संवत्सरस्य यागस्य पवित्रीकरणायतो। विष्णुलोकात्पवित्राय पथा
गच्छ ह नमोस्तु ते। इति मंत्रेण मूलमंत्रेण चोत्तमादिक्रमेण पवित्रेषु। विष्णुब्रह्महरद्रुद्रान्
सत्वरजस्तमांसि वेदत्रयं चावाह्य वनमालायां प्रकृतिं चावाह्य त्रिसूत्र्यां ब्रह्मविष्णुरुद्रा
नू ग्रंथिषु क्रियापौरुषी विराड् विजया इत्या अपराजिता। मनोन्मनि भद्रा मुक्ति श्री
सेता। आवाह्य मंत्रं पूजयेत्। ततो देवकरे मंगलसूत्रं बध्नीयात्। तत्र मंत्रः। संसार कू
तार्त्वायाः संपूर्णफलदो पिप्पलपवित्रारोपयेतत्कुधरते नमः। विष्णुतेजोभवं रम्यं सर्व
पालकनाशनं। सर्वकामप्रदं देव नवाग्रे धारयाम्यहं इति। ततो देवं षोडशोपचारैः पूजयेत्।
अथानुमंत्रणं। अभिमंत्रितो सि देवेश पुराणपुरुषोत्तम। प्रातस्त्वां पूजयिष्यामि सान्नि
ध्यं कुरु केशव। क्षीरोदधिमहानागशय्यावस्थितविग्रह। प्रातस्त्वां पूजयिष्यामि सा
न्निध्यं कुरु ते नमः। निवेदयाम्यहं तुभ्यं प्रातरेतत्पवित्रकं। सर्वथा सर्वदा विष्णो नमस्तेस्तु
प्रसीद मे इति। एवं निमंत्र्य नृत्यगीतादिभिः रात्रौ जागरणं कुर्यात्। इत्यधिवासनं। ततो द्वि
तीयदिने कृतनित्यक्रियो देवं संपूज्य गंधदूर्वादियुक्तं पवित्रं तत्र निवेदयेत्। तत्र मंत्रः। अ
तो देवा अवंतु न इति वैदिकः। पौराणिको पि। देवदेव नमस्तुभ्यं गृहाणेदं पवित्रकं। पवि
त्रीकरणार्थाय वर्षपूजाफलप्रदं। पवित्रकं कुरुष्वाद्य यन्मया दुष्कृतं कृतं। शुद्धो भवाम्यहं देव
त्वत्प्रसादात्सुरेश्वर इति। श्रीइस्तु नाममंत्रेणेन समर्पयेदिति। विशेषातनानैवेद्यादिनीरा

जप्त्वा तं स्तुत्वा देवं प्रार्थयेत्॥ तत्र मंत्रः॥ मणिविद्रुममालाभिर्मंदारकुसुमादिभिः॥ इयं सांवत्सरी
पूजा तवास्तु गरुडध्वज॥ वनमालां तथा विस्मो कौस्तुभं सततं हरे। तद्वत्पवित्रं मद्दत्तं पूजां च
हृदये वह॥ जानता जानता वापि न कृतं यन्मया विभो॥ तत्सर्वं पूर्णतां यातु त्वत्प्रसादाद्रमापते॥
जितं ते पुंडरीकाक्ष नमस्ते विश्वभावन॥ नमस्तेस्तु हृषीकेश महापुरुष पूर्वजेति॥ ततो मंत्रही-
नमित्यनेन च संप्रार्थ्य पारणां कुर्यात्॥ इति पवित्रारोपणप्रयोगः॥ अत्र वेद्यारंभणं रोधे व्रतं सं-
कल्पयेत्॥ श्रावणशुक्लचतुर्दश्यां पूर्वं प्रागुक्तौ॥ अथोपाकर्म॥ तत्राश्वलायनसूत्रे॥ अथातो
ध्यायोपाकरणं ओषधीनां प्रादुर्भावे श्रवणेन श्रावणस्य पंचम्यां हस्तेन वेति॥ वृत्तिकृतानां
कालत्रयमुक्तं॥ अत्रौषधीप्रादुर्भावे सति श्रावणमासीयं श्रवणनक्षत्रमेकः कालः॥ अ-
सति तु भाद्रमासीयं श्रवणं द्वितीयः॥ श्रावणमासि पंचमी हस्तयुक्ता पंचमी तृतीयः॥ अथवा ह-
स्तयुक्तायां पंचम्यां वा तदुपलक्षितिः॥ कारिकोक्तौ॥ श्रावणपर्वस्य हस्ते ह्यौषधीरपस्यायादुभय-
त्रान्वयः इति॥ वृत्तिकृतौ विमलत्वात् सर्वश्रावणमासे त्रिशुक्लप्रतिपदादितिथयः द्वितीयांतो
ग्राह्याः मदनरत्नादौ तथैवाभिधानात्॥ पयुक्तेव कारिकायां॥ आश्वलायनानामुपाकर्म श्राव-
णं श्रवणे स्थितिः॥ श्रावणमिति समीपार्थे तेन श्रावणपौर्णमास्याः समीपवर्ति श्रवणं
लभ्यते॥ तत्राषाढपौर्णमास्युत्तरमिस्यवधेपा॥ तत्र श्रवणं मुख्यं दिनद्वये श्रवणे परं ग्राह्यं सा-
निष्ठासंयुतं कुर्याच्छ्रावण्यां कर्म यद्भवेत्॥ तत्कर्म सफलं ज्ञेयमुपाकरणसंज्ञितं॥ श्रवणेन तु य-
त्कर्म उत्तराषाढसंयुतं॥ संवत्सरकृतोध्यायस्तस्य एतदेव नश्यतीति॥ व्यासोक्तौ॥ अत्र विशेषः॥
पृथ्वीचंद्रोदये॥ स्पष्टं तरे उदये संगवस्पर्शे श्रवणे पर्वणी वा कर्म कुर्युर्न सस्युपाकर्म त्रयम्
सामगाः क्रमादिति॥ संगवस्पर्शश्चात्र सर्वायपक्षावच्छेदेन नत्वेकदेशावच्छिन्नः॥ अत एवं
श्रवणं पौर्णमासी च संगवात्परतो यदि। तदा होत्रयिकी ग्राह्या नान्या होत्रयकी भवेदिति॥
प्रयोगपारिजाते दोहेतात्स्मृसं नर न चेसा पर्वणी संगवात्परतायदीस्करोहरिष्यमाणेन

४७

९२

वसान्वेकवाक्यत्वा विषाद्दे घटिकाद्वयमिति॥ वचनं तु निर्मूलं समूलत्वेपि संगवांत
र्वाह्नविषयं प्रशंसाद्वारा संगवांतर्वाह्णस्यैव सावकं संक्रांतिग्रहणाद्युक्तं तु न कुर्यात्॥
तथा च रुद्रमतमुक्तं कात्यायनेन। अर्धरात्रादधस्ताच्चेत् संक्रांतिग्रहणं तथा। उपाकर्म न कुर्वीत
परतश्चेन्न दोषकृदिति॥ तदा पंचम्यां कार्यमिति गोणकालः पंचमी॥ तथापि जिन्नस्यैवौगु
निषेधउक्तः। स्मृत्यर्थसारे। श्रवणे आद्यो घटिकाचतुष्टयापि जिज्ञासूत्रोक्तं वर्ज्यमिति। पि
तुर्वे दिनस्य पर्वणी कुर्युः दिनद्वये पर्वण्यपरस्त...वेः परं ग्राह्यं। अन्ये तु पूर्वापर्वणोरप
कि कुर्युः श्रावण्यां तेन तिरीयकाइति। गार्ग्यस्तु भौदयिके पर्वणि विशेषमाह। गोभिलः। श्राव
णीपौर्णमासी चेत्संगवास्पृशेततोपि यदि तदा सौदयिकी ग्राह्यान्या ह्यौदयिकी भवेत् इति॥ ग्रहण
संक्रांतिसहितेतु पर्वणि न कार्यं किंतु पंचम्यां तथा च स्मृतिमहार्णवे। संक्रांतिग्रहणं वापि पौ
र्णमास्यां यदा भवेत्। उपाकृतिस्तु पंचम्यां कार्या वाजसनेयिभिरिति॥ अन्ये तु प्रोष्ठपद्या
मिति ज्ञेयं। अर्धरात्रोत्तरं ग्रहणसंक्रांत्योस्तु प्रतिप्रसवः। प्रागुक्त एव सामवेदिनस्तु श्राव
णमासगतहस्ते कुर्युः। बह्वृचाः श्रवणर्क्षे च हस्तर्क्षे सामवेदिन इति। गोभिलोक्तेः
दिनद्वयेन तत्सत्वे तु पर्वश्रवणवत्संगवव्याप्तः परो ग्राह्यः। यनिष्ठा प्रतिप्रसवस्तु चाषु
त्रसमन्वितं। श्रावण्यां कर्म कुर्वीरन् ऋग्यजुःसामपाठका इति परिशिष्टात्। संक्रां
तिग्रहणयोगे तु गार्ग्यः। सिंहे रवौ तु पुष्यर्क्षे पूर्वाह्णे हलिचरेद्द्विजः। छंदोगामिलिता कु
र्युः त्सर्गे धूं... स्वस्वछंदसां। शुक्लपक्षे तु हस्ते न उपाकर्मीपराह्णके मिति। कर्कस्थे श्री
मान् नोनर्मदोत्तरभागविषयं उपाकर्मनिषेधउपसंहाराधिकरणन्यायात्सामगविषयः
सामगैरपराह्णे इदं कार्यं। अन्ये तु पूर्वाह्ण इति ज्ञेयं॥ ७॥ अथोत्सर्जनं तच्चैव बह्वृचै

93

माघ्यं कार्यं ॥ आषाढ्या योत्सर्जनं माघ्यां पौर्णमास्यां विधियन्नइति कारिकोक्तेः ॥ तैत्तिरीयस्तु
पौष्यं तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेदिति ॥ तत्र हस्तेन ताद्बौधायनस्मृतौ पौष्यां वा माघ्यां वा पौर्ण
मास्यां वोत्सृजेदिति ॥ तत्तत्रानुक्तौ पौषी पौष्याभाद्रपदे वा उत्सर्गश्च तत्र तैष्यां तथाश्वोछुपप
रपि वेति ॥ कात्यायनो केशान्त मगेः सिंहार्के पुष्य ऋक्षे मेवापद्योपाकर्मदिने एव सर्वैः कार्यमिति प
दुक्तं खादिरगृह्ये ॥ पुष्येतूत्सर्जनं कुर्यादुपाकर्मदिनेऽथवेति ॥ एते चापाकरणोत्सर्जने द्विजानां
नित्ये ॥ उत्सर्जनं च वेदानामुपाकरणकर्म च ॥ अकृत्वा वेदजाप्येन फलं नाप्नोति मानव इति गोभि
लोक्तेः ॥ अकरणे तु कृच्छ्र उपवासश्च प्रायश्चित्तं कुर्यात् ॥ इत्युपाकर्मोत्सर्जने ॥ अथ श्रावणपौर्णमास्यां
श्रवणाकर्मोक्तमाश्वलायनसूत्रे श्रावण्यां पौर्णमास्यां श्रवणाकर्मेति श्रवणेन युक्ता श्रावणी नक्ष
त्रेण युक्तः कालः इत्यण् टिड्ढाणञिति ङीप् ॥ लुबविशेषे इति नसलुपाभावो यथा चाभगवानुपाणिनि
रपि प्रायुक्तं विभाषा फाल्गुनीश्रवणा सा ईति वेत्सिसा फाल्गुनी कार्तिकेस्यादि निर्देशेन
पौर्णमास्यां लुबभावस्य ज्ञापितत्वात् ॥ अस्मिन्दोषः अबाधकान्यपि निपातनानि भवंतीति तु तिथि
वनाख्यग्रन्थे ॥ निर्देशस्याप्यबाधकत्वात् ॥ अबाधकानीति वचनेन मूलं तु यत्रैते याणिनीय
परिभाषाभास्करे द्रष्टव्यं ॥ श्रवणपदं चात्र पौर्णमासीविशेषलक्षणार्थं तेन श्रवणाभावेपि पौ
र्णमास्यामिदं कर्म कार्यमेवाह ॥ आस्तमयमुक्तपौर्णमासीग्राह्या ॥ अस्तमिते स्थालीपाकं
श्रपयित्वेति सूत्रात् ॥ अस्यापेव ह र्णिमायाम्योपि विशेषो विष्णुधर्मोत्तरे ॥ तलधेनुप्रद
नेन श्रावण्यां स्वर्गमाप्नुयात् ॥ अत्रैव मंत्रार प्रापरक्षाबंधनं कुर्वंति ॥ तत्र प्रऊलवचनमप्युक्तं
हेमाद्रौ भविष्ये ॥ ततोपराह्णसमये कुर्यात्स्योदलिकांशुभां ॥ कारयेत्अक्षतैस्तद्वत्सिद्धार्थैश्च
समन्विता ॥ मिति ॥ तत्र भद्रोत्तरं कार्यं भद्रायां द्वे न कर्तव्ये श्रावणी फाल्गुनी तथेति ॥ संग्रहे
वाक्ये ॥ तत्रमंत्रोपि येनबद्धो बलीराजा दानवेंद्रो महाबलः ॥ तेन त्वां प्रति बध्नामिरक्षे

४८

मा चलमाचलेति॥ आलस्यार्चनं दक्षिणादिभिः कुर्यात् इति॥ इति श्रीसामंतवंशोद्भवउदा-
मणिहम्बिरहम्बिरत्ननीराजनीराजितश्रीमहाराजेन्द्रग्रामणीनृपतिनंदनश्रीमहाराजाधिरा-
जसवंतसिंहप्रेरितश्रीमद्दापाजीभट्टसूनुभास्करविरचिते जसवंतभास्करे श्रावणनिर्णय-
प्रकाशः॥ अथ भाद्रपदः॥ अत्र दानेमुक्तं॥ वामनपुराणे॥ मासि भाद्रपदे दद्यात्पायसं तिलसर्पि-
षा हृषीकेशप्रीणनार्थं लवणं च गुडोदनमिति॥ विष्णुधर्मोत्तरे तु॥ तथा प्रोष्ठपदे मासि प्रदाना-
सूणि तस्य चेति॥ महत्फलमित्यनुषंगः फाणितं [illegible] मिक्षुविकारविशेषः॥ मत्स्यंडी फाणि-
तं पंके स्यमरः॥ एवमिति माघा॥ देवीपुराणे तु॥ घृतधेनुदानमप्यत्रोक्तं॥ घृतानां भाद्रपदे
तथेति॥ अथात्र सिंहसंक्रमणास्य विष्णुपदत्वान्म कृतेत्र पंपुण्यपनमं तत्रदानं मासावि-
शा मित्र॥ स सुवर्णं छत्रदाने सिंहेपि विहितं स्मृतेति॥ अत्र गोप्रसूतिर्निषिद्धेति प्रोक्तं॥
क्तं॥ तथा चाद्भुतसागरे॥ नारदोपि॥ भानौ सिंहगते चैव यस्य गौः संप्रसूयते॥ मरणं तस्य नि-
र्दिष्टं षड्भिर्मासैर्न संशयः॥ तत्र शांतिं प्रवक्ष्यामि येन संपद्यते शुभं॥ प्रसूता तत्क्षणादेव तां
गां विप्राय दापयेत् इति॥ ततो होमं प्रकुर्वीत घृताक्तैः सहसर्षपैः॥ आहुतीनां घृताक्तानां
मयुतं जुहुयात्ततः॥ अयं होमो व्याहृतिभिः सोपवासः प्रयत्नेन दद्याद्विप्राय दक्षिणामिति॥ अ-
थ तिथयः॥ भाद्रकृष्णतृतीया कज्जलीसंज्ञा परा ग्राह्येति दिवोदासीये॥ भाद्रकृष्णचतुर्थी
बहुलाख्या॥ मध्यदेशे प्रसिद्धा॥ सायाह्नव्यापिनी ग्राह्या॥ दिनद्वये तत्र सत्वे तु पूर्वं स्यापि
तत्रैवा॥ उक्तं च॥ गोवत्सश्च चतुर्थीविद्धा धेनुपूजा दुर्गार्चनं दुर्गरलोके च वत्सस्य पूजा त्रिवय-
त्रिरेलाः परान्वितास्ते तिरूपसराष्टमिति॥ अत्र धेनुपूजायां तेन बहुलाख्या गृहीतेति मदन-
दिवोदासौ॥ भाद्रकृष्णषष्ठ्यां कुशापहलाख्यव्रतं॥ भविष्योत्तरे उक्तं॥ तत्र षष्ठीमध्याह्न-

व्यापिनी ग्राह्या॥ एतज्जाग्रन्तेषु सर्वेषु मध्याह्नव्यापिनी तिथिरिति स्मरणात्॥ सखीभिः सह
मध्याह्ने गत्वा च विपिनान्तिकमित्यादिना तत्कथायां कर्मकालोक्तेश्च॥ दिनद्वये तत्रासत्त्वे ऽसत्त्वे
वा परा तदुक्तं॥ परार्कहलषष्ठ्याद्याः पूर्वाविद्धाश्च द्वादिका पुनरिति॥ कुत्र॥ पलाशाश्चात्र तस्यैव हलष
ष्ठीसंज्ञा॥ अथ भाद्रकृष्णाष्टमी॥ जन्माष्टमी यत्तु श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्र
तमित्यादिवचनं तत्तु कृष्णपक्षादिमासाभिप्रायेण यदुक्तं ब्रह्मे तथा भाद्रपदे मासि कृष्णा
ष्टम्यां कलौ युगे॥ अष्टाविंशतिमे जातः कृष्णोसौ देवकीसुत इति॥ तत्र तावच्छ्रीमद्भगवता
विर्भावकाल उक्तो वसिष्ठसंहितायां॥ अष्टमी रोहिणीयुक्ता निश्यर्धे दृश्यते यदि॥ मुख्यका
ल इति ख्यातस्तत्र जातो हरिः स्वयमिति॥ वह्निपुराणेपि समायोगे तु रोहिण्यां निशीथे रा
जसत्तम॥ समजायत गोविंदो बालरूपी जनार्दन॥ तस्मात्तं पूजयेत्तत्र यथा वित्तानुसा
रतः इति॥ अत्र पूर्वार्धरात्रोत्तरार्धरात्रयोः संधिरूपस्य मुख्यस्य श्रीकृष्णाविर्भावकाल
स्य लवाद्यक्षरपरिमितत्वेनातिसूक्ष्मत्वात्तत्र पूजनाद्यसंभवेन तत्समीपवर्ति पूर्वोत्तर
घटिकाद्वयात्मके निशीथत्वेन प्रतिपादिते मुहूर्तविशेषे पूजां विधायेत्युक्तालस्य कर्मका
लत्वात्तद्व्यापिन्यष्टमी मुख्या॥ एतावताष्टम्या अलाभे तूक्तमुख्यसंधिकालसमीपवर्ति
नी पूर्वापरार्धघटिकेत्येकघटिकात्मककालव्यापिनी ग्राह्या॥ तदुक्तं माधवीये यो
गीश्वरः॥ अर्धरात्रादधश्चोर्ध्वमेकार्धघटिकान्विता॥ रोहिणी चाष्टमी ग्राह्या उपवासव्रते ति
थिरिति॥ एका च अर्धघटिका चैकार्धघटिके ताभ्यां समन्विते त्वर्थः॥ तादृश्या अष्टम्या
अलाभे तूक्तसंधिसमीपवर्ति पूर्वोत्तरकलाद्वयरूपघटिकांशविशेषव्यापिनी ग्राह्या
यदुक्तं॥ आदिपुराणे॥ अर्धरात्रादधश्चोर्ध्वं कलयापि तथा भवेत्॥ जयंती नाम सा प्रोक्ता

सर्वपापप्रणाशिनी॥ निशाघटिकायामष्टाधिकशततमो भागः कला॥ इयं पक्षद्वये
पि॥ अर्द्धरात्रादधश्चैवेति वचनात् सेन समुच्चयद्योतकेन संधिपूर्वापरयोर्घटिकाद्विकालयोः
समुच्चयेन विद्यमानाया अष्टम्या व्रतप्रयोजिकालप्रतिपादनात् पूर्वोक्तमुख्यसंधिकाल
व्यापिन्यष्टमीसत्तिसंभवे सर्वथा ग्राह्येति उक्तं भवति॥ अत एव यदा प्रथमदिने रात्र्युत्तरा
र्द्धारंभकलायां प्रवृत्ताष्टमी द्वितीयदिने रात्र्युत्तरार्द्धारंभकलाव्यापिनी न तदापरे वा ऊर्ध्वा
धः कलाद्वयव्याख्यासंधिकालव्यापिनीत्वात्॥ पूर्वेद्दिने रात्र्युत्तरार्द्धारंभकैककलायामप्र
ष्टमीसत्वेपि मुख्यसंधिकालाव्यापनात्॥ एवं यदा प्रथमदिने रात्रिपूर्वार्द्धावसानकलामा
रभ्य प्रवृत्ताष्टमी परदिने संधिकालात् प्रागेव पूर्वार्द्धावसानकलायां समाप्यते तदा पूर्वेव
ऊर्ध्वाधःकलाद्वयव्याप्त्या पूर्वदिन एव संधिकालव्यापिनीत्वात्॥ उत्तरदिने पूर्वार्द्धावसा
नैककलायामष्टम्याः सत्वेपि संधिकालत्वाभावात्॥ अत एवोक्तं विष्णुधर्मोत्तरे रोहिणी
सहिता कृष्णा मासि भाद्रपदेष्टमी॥ सप्तम्यामर्द्धरात्राधःकलयापि यदा भवेत्॥ तत्र जातो ज
गन्नाथः कौस्तुभी हरिरीश्वरः॥ तमेवोपवसेत्कालं तत्र कुर्याच्च जागरमिति॥ दिनद्वयेतत्का
लसत्वेः सत्वे वा परा वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमीत्यादिवचनेभ्यः प्रातः संकल्पये
द्विद्वानुपवासव्रतादिकमिति॥ संकल्पकाले सत्वाच्च यदा तु पूर्वेद्युर्निशीथे रोहिणीयुताष्टमी
परदिने तु निशीथे केवलाष्टमी॥ तदा पूर्वैव कार्या विद्धापि सप्तम्या रोहिणीसहिताष्टमीति व्र
तवैवर्त्तोक्तेः॥ विनार्क्षं नापि कर्त्तव्या नवमीसंयुताष्टमी॥ कार्या विद्धापि सप्तम्या रोहिणीसहिताष्ट
मीति॥ माधवोदाहृतस्मृतेश्च॥ तन्निर्णयामृतेपि सप्तमीसंयुताष्टम्यां निशीथे रोहिणी यदि भ
विता साष्टमी पुण्या यावच्चंद्रदिवाकरावीति॥ यदा तु परदिन एव निशीथे रोहिणीयुताष्टमी तु

धसोमवारे वा॥ एवं दिने च निशीथे केवलाष्टमी यदा च दिनद्वयेपि निशीथे रोहिणीयुताष्टमी
तदा चपरैव॥ वर्जनीया प्रयत्नेन सप्तमीसंयुताष्टमी॥ सऋक्षापि न कर्तव्या सप्तमीसहिताष्टमी
ति ब्रह्मवैवर्त्तात्॥ पारणापि॥ भेतयो निर्गतानां तु भेलनं नाति॥ तेनेदं अपि कृता आवणमासि अ
ष्टमी रोहिणीयुता॥ किंतु न्हात्बुधवारेण सोमेनापि विशेषत॥ किं पुनर्नवमीयुक्ता कुलकोट्यास्तु
मुक्तिदेति॥ यदा तु पूर्वदिने निशीथे केवलाष्टमी परदिने तु प्रातरष्टमी संयुतापि निशीथे के
वला रोहिणी न स्यात् वैवा पूर्वोक्तवसिष्ठसंहितोक्तमुख्यकाले ष्टम्याः सत्वात्॥ नतु उक्तं किमेल
पस्य यः कालस्तत्कालव्यापिनी तिथिरिति॥ यद्यपि परदिने केवलर्क्षयोगोस्ति तथापि तस्य बु
धवारादिवन्न निर्णायकत्वं॥ यत्तु स्कान्दे रोहिण्यां चाष्टमी किंचिन्नवमी सकलापदि॥ भवेत्बुधसं
युक्ता प्राजापत्यर्क्षसंयुता॥ अपि वर्षशतेनापि लभ्यते यदि वा न वेति॥ तत्रोदयपदेन त्वं
श्रावण्या अर्द्धरात्रे तु योगो यं तारापस्फुटे यं सति॥ जयंती नाम सा मासा रात्रिस्तत्र गो
तो जनार्दन इति॥ विष्णुधर्मैकमूलकल्पनालाघवात्॥ अत एव हि रात्रिवाची जयंतीनाम्न्येमुच्यः
इति॥ तत्र अभिजिन्नाम नक्षत्रं जयंतीनाम शर्वरी॥ मुहूर्तो विजयो नाम यत्र जातो जनार्दन
इत्यं गौणं॥ तथा च वह्निपुराणे॥ कृष्णाष्टम्यां भवेद्यत्र कलैका रोहिणी यदि॥ जयंती नाम सा प्रो
क्ता उपोष्या सा प्रयत्नत इति॥ अत एव जन्माष्टमी जयंत्योर्न व्रतभेदः॥ अत एव जयंत्या स्वतंत्र
तं भिन्नं कृष्णजन्माष्टमीव्रतमादिति॥ माधवाचार्योक्तं चिंत्यं॥ प्राप्तान्तराभ्याससंख्यासंज्ञागुण
प्रकरणं तरेहि कसंभिद्यते॥ तत्र यजतिदद्यातिजुहोति निबन्धापणाय यथानुरूपं ग्राह्यं
न भेदोस्ति॥ नापि समिधो यजति॥ तन्ननपातं यजतीत्यादि॥ यद्वा तो पुनः श्रु॥ तिरु

मिणाभ्यासेन नापि तिस्र आहुतीर्जुहोतीति दिवसंख्यया। नाप्यथैष ज्योतिरथ वि
श्वज्योतिरित्यादिवत्संज्ञया। अयं तीर्थोक्तस्य रात्रिविशेषवाचितया उक्तत्वेन कर्मप्र
तिपादकत्वाभावात्। नापि वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमितिवद्गुणेन। नाप्युपस
द्भिश्चरित्वा मासमग्निहोत्रं जुहोतीतिवत्संनिधिरूपप्रकरणान्तरेण। अथ गोकु
लस्थवैष्णवानां निर्णयसंप्रदायः। यदापरदिने श्रीसूर्योदये रोहिण्या संबद्धा वा काचिद
ष्टमी अग्रे च सकला नवम्यपि रोहिणीसंबंधात्तदा शुद्धामपि पूर्वाष्टमीं त्यक्त्वा परदिने
एवं कुर्वन्ति। तत्र मूलवचांस्युपराजहनूपाख्ये। मुहूर्तेनापि संयुक्ता संपूर्णा साष्टमी भवेत्
किं पुनर्नवमीयुक्ता कुलकोट्यास्तु मुक्तिदेति। ब्रह्मवैवर्ते। अष्टमी नवमीचैव रोहिणी
बुधसंयुता। महाजयन्ती सा प्रोक्ता तत्रोपोष्यं महाफलमिति। उक्तोपि। अष्टम्यां बुधवा
रेण नवमी रोहिणीयुता। एते योगे यदा प्राप्तास्तत्रैवोपवसेदिति। तथा सप्तमीविद्धां सर्वथा नो
पवसेत्। जन्माष्टमी पूर्वविद्धां सनक्षत्रां सकलामपि। विहाय नवमीं शुद्धामुपोष्य व्रतमाच
रेदिति वचनात्। वेधे विशेषः स्कान्दे। पलवेधे तु विप्रेंद्र सप्तम्या अष्टमीं त्यजेत्। सुरापा बिं
दुना स्पृष्टं गंगाम्भः कलशं यथेति। इति गोकुलस्थानां निर्णयसंप्रदायः। अत्र व्रते प्रधानमु
पवासः पूजा चेत्युभयमिति। का उ तत्त्वविवेचनकाराणां मतं दूषयित्वा। पूजाया एव प्राधा
न्यमिति। भगवंतभास्करे निर्णीतं। एतच्च व्रतं नित्यं। श्रावणे बहुले पक्षे कृष्णजन्माष्टमीव्रतं॥
न करोति नरो यस्तु भवति क्रूरराक्षस इति। भविष्ये। अन्यत्र वा न करोति नरो यस्तु जयंतीसं
भवव्रतं। यमस्य वशमापन्नः सहते नारकीं व्यथामिति। करणे दोषात्तेः। जन्माष्टमीव्रतं ये वै प्र
कुर्वन्ति नरोत्तमाः। कारयन्त्यथवा लोकास्तेषां लक्ष्मीः सदा स्थिरा। सिध्यन्ति सर्वकार्याणि कृते

जन्माष्टमीव्रते इति॥ महाजयार्थं कुरु तां जयंतीं मुक्तयेनघ॥ धर्ममर्थं च कामं च मोक्षं च मुनि
पुंगव॥ ददाति वांछितानर्थान्ये चान्येप्यतिदुर्लभा इति॥ स्कांदे फलश्रवणकामं च॥ अ
ष्टमीकं संभविष्या॥ ततो कृष्णतिलैः स्नातो नद्यादौ विमले जले॥ सुदेशे शोभनं कुर्याद्दे
वक्याः सूतिकागृहं॥ तन्मध्ये प्रतिमां स्थाप्य सा चाप्यष्टविधा स्मृता॥ कांचनी राजती ताम्री
पैत्तली मृन्मयी तथा॥ वार्क्षी मणिमयी चैव वर्णकैर्लिखिताथवा॥ सर्वलक्षणसंपन्ना प
र्यंके च पटाकृता॥ देवकी चैव देवेऽस्मिन् प्रदेशे सूतिकागृहे॥ प्रसुप्ता च प्रसूता च स्थाप
येन्मंचकोपरि॥ मां तत्र बालकं सुप्तं पर्यंके स्तनपायिनं॥ यशोदां तत्रैव कस्मिन्प्रदेशे सू
तिकागृहे॥ तद्वच्च कन्यये सार्धं प्रसूतवरकंन्यका॥ कश्यपो वसुदेवाय मदितिश्चैव देवकी
शेषो वै बलिभद्रोय यशोदा क्षितिरन्वभूत्॥ नंदः प्रजापतिर्दक्षो गर्गश्चापि चतुर्मुखः॥ गो
पीःसु कुंजरश्चैव दानवांश्च लिखेत्ततः॥ लिखनीयश्च तत्रैव कालियो यमुनाह्रदे॥ इत्येवं
मादि यत्किंचिद्वक्ष्यते चरितं मम॥ लिखयित्वा प्रयत्नेन पूजयेद्भक्तिलक्षणः॥ मंत्रेणानेन
कालेपदेवकीपूजयेन्नरः॥ तत्र मंत्रः॥ गायद्भिः किंनराद्यैः सततपरिवृता वेणुवीणानिनादैः
भृंगारादर्शकुंभप्रवरकृतकरैः किंकरैः सेव्यमाना॥ पर्यंके स्वास्तृते [illegible]या मुदिततरमुखी
पुत्रिणी सम्यगास्ते सा देवी देवमाता जयति सुतनया देवकी कांतरूपा॥ पादौ संवाहयंती
श्रीदेवक्याश्चरणांतिके॥ निषण्णा पंकजे पूज्या नमो देव्यै श्रियै इति॥ अथ चंद्रार्घ्यः॥ आखेतो
यं समाहाय सपुष्पकुसुमांचंदनं॥ जानुभ्यां धरणीं गत्वा चंद्रायार्घ्यं निवेदयेत्॥ तत्र मंत्रः॥
क्षीरोदार्णवसंभूत अत्रिनेत्रसमुद्भव॥ गृहाणार्घ्यं शशांकेदं रोहिण्यासहितो
मम॥ ज्योत्स्नापते नमस्तुभ्यं नमस्ते ज्योतिषांपते॥ नमस्ते रोहिणीकांत अर्घ्यं नः
प्रतिगृह्यतां॥ अथ देवक्यर्घ्यमंत्रः॥ यथा पुत्रं हरिं लब्ध्वा प्राप्नुमतिनिर्वृतिः परां॥ तथा मे

वनिर्वर्तितं देहि सुपुत्रं स्वर्गायस्वमेइति॥ अर्द्धरात्रेच सोद्धारां पातयेत्तु गुडसर्पिषा॥ ना
डीवर्द्धापनं षष्ठीनामदेः करणं मम॥ ततः पुष्पांजलिं दत्वा यामेयामे प्रपूजयेत्॥ प्रभा
न ते ब्राह्मणान् भक्त्या भोजयेद्भक्तिमान्नरः॥ ॐ नमो वासुदेवाय गोब्राह्मणहिताय च॥ शां
तिरस्तु शिवं चास्त्विदं स्कन्दकामं विसर्जयेत् इति॥ इति जन्माष्टमीकृत्यं॥ अथ पारणा
निर्णयः॥ तत्र यद्यपि सर्वेषामुपवासानां प्रातरेव हि पारणेति स्मरणात्॥ प्रातरेव हि सा
प्राप्ता तथापि तिथिरष्टगुणं हन्ति नक्षत्रं च चतुर्गुणं॥ तस्मात्प्रयत्नतः कुर्यात्तिथिभान्ते तु पा
रणमिति॥ अत एवेदं वचनात्॥ उपोष्य तिथिनक्षत्रयोरष्टमीरोहिण्योरन्ते कार्यमिति मु
ख्यः कालः॥ अन्यतरान्तस्त्वनुकल्पः॥ यान्ते कुर्यात्तिथेर्वापि शस्तां भारत पारणमिति वह्नि
पुराणात्॥ यच्च तु तिथिनक्षत्रान्तो रात्रौ स्यात्तदोक्तं॥ विष्णुधर्मे तिथ्यन्ते तिथिभान्ते वा पारणं
यत्र चोदितं॥ यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणेति॥ मनुत्र्यहाडो नरात्रौ पारयात्रौ
पारणं विधायकं॥ निशायां स्वपित्रादेरस्वास्थ्ये तास्यौ भावात्॥ अपि वेदान्तगं रणदु लिवत
पदुक्तं अत एव वक्तौ॥ सर्वेष्वेवोपवासेषु दिवा पारणमिष्यत इति॥ अत्र च वचनान्तरं॥ तिथ्यृ
क्षयोर्यदाच्छेदो नक्षत्रान्तमथापि वा॥ अर्द्धरात्रेथवा कुर्यात्पारणं त्वपरेहनीति॥ तत्सापे
क्षार्था॥ अथवा यद्यर्द्धरात्रे तिथिभान्तस्तदा परेतस्मिन्नेवाहनि न तु रात्रौ पारणं कुर्यादिति॥
इति पारणनिर्णयः॥ भाद्रमायां कुशग्रहणमाह मरीचिः॥ मासे नभस्यमावास्या तस्यां
दर्भोच्चयो मत इति॥ यत्तु हारितः॥ मासे नभस्यमावास्या तस्यां दर्भोच्चयो मतः॥ अयातया
मास्ते दर्भा विनियोज्याः पुनः पुनरिति॥ तत्तु शुक्लपक्षादिमासाभिप्रायेणेति॥ मरीचेर्नै
कवाक्यत्वेन एकमूलत्वकल्पनालाघवात्॥ भाद्रशुक्लप्रतिपदि महत्तमास्त्वं
हद्व्रतं॥ स्कान्दे उक्तं॥ तत्र प्रतिपत्पूर्वविद्धा ग्राह्या॥ एद्व्रतेषु सर्वेषु कर्त्तव्या संमुखी इति॥

10

थिरिति। अलवैवर्त्तात्॥ भाद्रशुक्लतृतीयायां हरितालिकाव्रतं। तत्र तृतीया परा ग्राह्या। मु
हूर्त्तमात्रसत्वेपि दिने गौरीव्रतं परे। इति माधवोक्तेः। यद्यपि हरितालिकाव्रतं चतुर्वर्गचिंता
मण्यादिनिबंधेषु न दृश्यते। तथापि सकलदेशशिष्टाचारात्। अविगीता ग्राह्यैव। हरितालि
काख्यं पुरस्कृत्य पूर्वेद्युः कृतमिति वोपासीय वचनात् प्रामाण्ये निर्विवादं॥ इ पंचमन्वादि पि॥ अ
थ भाद्रशुक्लचतुर्थी गणेशचतुर्थी सा च सिद्धिविनायकव्रते मध्याह्नव्यापिनी ग्राह्या। तत्

६ तिलैः

तुक्तं भविष्ये। प्रातः शुक्लतिलैः स्नात्वा मध्याह्ने पूजयेन्नृपेति। एतद्व्रतेषु मध्याह्नव्यापिनी ति
थिरिति स्मरणाच्च। परदिन एव मध्याह्नव्यापित्वे परा। मातृविद्धा प्रशस्ता स्याच्चतुर्थी गण
नायके। मध्याह्ने परतश्चेत्स्यान्नागविद्धा प्रशस्यत इति स्मृत्यंतरात्। पञ्चाननेतु पूर्वा च
तुर्थी गणनाथस्य मातृविद्धा प्रशस्यते। अन्यास्तु सर्वकार्येषु पंचमीसहिताः शुभा इति। बृ
हस्पति वचनात्। मातृविद्धा गणेश्वर इति स्मरणाच्च। उक्तं च माधवाचार्यैः। परेद्यु
रेव मध्याह्नव्याप्तौ विघ्नस्य सा परा। अन्यथा पूर्वविद्धैव मातृयोगप्रशस्तत इति। रविभौ
मवारयोगे त्वियमिति प्रशस्ता॥ अस्यां चंद्रदर्शनं निषेधो। ब्राह्मे वासुदेवोपि शास्त्रसं
निधाकेरमरी विष्णुः। सिंहितश्चतुर्थ्यां माघायां मनुष्याणां पतिश्च सः॥ तत्वश्चतुर्थ्यां चंद्रं तु प्र
पलात्त्वीक्ष्यमानवा। सिंहेसौ रात्रिकं वा कंप्राप्नुयाद्वाप्नुयादुःख इति। प्रथलादिस्यस्य पठेदि
त्यनेनान्वयप्रधान क्रियान्वयस्यैव विस्तारात्। तद्वाक्यं तु विष्णुपुराणे। सिंहः प्रसेनमवधीत्
सिंहो जांबवता हतः। सुकुमारक मारोदीस्तव ह्येष स्यमंतक इति। तिथितत्वे। पंचाननग
तिमानो पलयोरप्ययोरपि। चतुर्थ्यामुदितश्चंद्रो नेक्षितव्यः कदाचनेति। चतुर्थ्यां नेक्षणीय
इति संबंधः। सिंहः प्रसेनमिति मंत्रेणाभिमंत्रितं जलं पेयं स्यमंतकोपाख्यानं च श्रोतव्यमा
चारादिति। स्मार्त्तभट्टाचार्याः॥ इति गणेशचतुर्थीव्रतं॥ अथ भाद्रशुक्लपंचमी॥ ऋषि

पंचमी। सा च मध्याह्नव्यापिनी ग्राह्या। पूजाव्रतेष्विति। पूर्वोदाहृतवचनात्। दिनद्वये
तत्रसत्त्वे। सत्त्वे वा पूर्वा। सामान्यनिर्णयात्। भाद्रशुक्लषष्ठी सूर्यषष्ठी। सा हलषष्ठी वसरा
तत्र कृत्यं निर्णयामृते। तदुक्तं। शुक्ले भाद्रपदे षष्ठ्यां स्नानं भास्करपूजनं। प्राशनं पंचग
व्यस्य अश्वमेधफलाधिकमिति। तथा तत्रैव भविष्योत्तरे। ये ये भाद्रपदे मासि षष्ठी स्या
द्भरतर्षभ। इयं पापहरा पुण्या शिवा शान्ता शुभा नृप। स्नानदानादिकं सर्वमस्यामक्षयमु
च्यते। यस्यां षड्रूपं तिग्मांशोर्दक्षिणापथमाश्रितं। ब्रह्महत्यादिपापेभ्यो मुच्यते नात्र संशय
इति। अथ भाद्रशुक्लाष्टमी। दूर्वाष्टमी। तदुक्तं पुराणसमुच्चये। शुक्लाष्टमी तिथिर्यातु मा
सि भाद्रपदे भवेत्। दूर्वाष्टमीति सा ज्ञेया नोत्तरा सा विधीयते इति। अतएव च पूर्वा। बृह
द्यमोपि। श्रावणी दुर्गनवमी दूर्वा चैव हुताशनी। पूर्वविद्धा प्रकर्तव्या शिवरात्रिर्बलेर्दि
नमिति। ज्येष्ठामूलयोस्तु पूजा न कार्या। दूर्वाष्टमी सदा त्याज्या ज्येष्ठामूलर्क्षसंयुतेत्यादि
हेमाद्र्युदाहृतवचनात्। एवं च पूर्वदिने ज्येष्ठामूलयोः सतोः परा अष्टमी कार्या। तदुक्तं।
मुहूर्ते रौहिणे अष्टम्यां पूर्वा वा यदि वा परा। दूर्वाष्टमीति सा ख्याता ज्येष्ठामूलं च वर्जयेत्
इति। नवममुहूर्तस्य रौहिणसंज्ञा। यदा तु ज्येष्ठामूले विनाष्टमी न प्राप्यते तदोक्तं पुरा
णसमुच्चये। कर्तव्या चैकभक्तेन ज्येष्ठामूलं यदा भवेत्। दूर्वामभ्यर्चयेत्तस्मान्न वंध्यं
दिवसं नयेदिति। एतच्च मलमासे सति तत्रैव कार्यं। तदुक्तं स्कान्दे। अधिमासे तु संप्रा
प्ते नभस्ये उदये मुनेः। अर्वाक् दूर्वाव्रतं कुर्यात्परतो नैव कुत्रचिदिति। अतएव चा
गस्त्योदये कन्यार्के च निषेधस्तत्रैव। आगस्त्य उदिते तात पूजिते स्मृतो दूर्वा। वै
धव्यं पुत्रशोकं च दद्याद्वर्षाणि पंच च। तथा। शुक्लभाद्रपदे मासि दूर्वासंज्ञा तु सा

सं ६

ष्टमी॥ सिंहार्के एव कर्तव्या न [illegible] कन्यार्के कदाचनेति॥ एतत्स्त्रीणां नित्यं मंत्रदूर्वाया
लिंगपूजनमनग्निपक्वाक्षारलवणभक्षणं च मदनरत्ने स्पष्टं॥ इति दूर्वाष्टमी॥ अत्रैव
ज्येष्ठापूजोक्ता॥ कालादर्शे॥ भाद्रे शुक्लाष्टमी ज्येष्ठानक्षत्रेण समन्विता॥ महती कीर्तिता
तस्यां ज्येष्ठा देवीं प्रपूजयेत्॥ उपहारैर्बहुविधैर्लक्ष्मीं विनिवृत्तये इति॥ पूजामंत्रः स्कांदे
ज्येष्ठायै ते नमस्तुभ्यं ज्येष्ठायै ते नमो नमः॥ शर्वायै ते नमस्तुभ्यं शंभवायै ते नमो नम
इति॥ अथावाहनमंत्रः॥ एह्येहि त्वं महाभागे सुरासुरनमस्कृते॥ ज्येष्ठे त्वं सर्वदेवानां म
त्समीपगता भवेति॥ अथार्घ्यमंत्रः॥ ज्येष्ठे तेयोकनिष्ठे वा ब्रह्मिष्ठे ससवादिनि॥ एह्येहि त्वं
महाभागे अर्घ्यं गृह्ण सरस्वती॥ तत्राष्टमी ज्येष्ठायोगवशात्स्पर्शे ग्राह्या॥ दिनद्वये तु प
परे वा नवम्या सह कार्या स्यादष्टमी॥ तत्संग्रहे॥ मासि भाद्रपदे शुक्ले पक्षे ज्येष्ठर्क्षसंयुता॥
तुलिस्कांदोक्ते पूर्वं निरात्रिभोगपूर्वे वा रात्रिर्यस्मिन् दिने ज्येष्ठा ज्येष्ठायाः परिपूज
नमिति॥ तत्रैवोक्तेः॥ अपवादः यस्मिन् दिने भवेज्ज्येष्ठा मध्याह्नादूर्ध्वमप्यणु तस्मिन्
हविष्यं पूजा॥ चन्द्रना चेत्सूर्वे वा सूरौ॥ एतच्च नक्षत्र एव दाक्षिणात्याः कुर्वंति॥ तदुक्तं तत्र
मासि भाद्रपदे शुक्लपक्षे ज्येष्ठर्क्षसंयुते॥ यस्मिन् तस्मिन् दिने कुर्याज्ज्येष्ठायाः परिपूजनमिति
मंत्रेणावाहयेद्देवीं ज्येष्ठायां तु प्रपूजयेत्॥ मूले विसर्जयेद्देवीं त्रिदिनं व्रतमुत्तममिति॥ मात्स्ये
पि प्रस्ताह्निकं तथावृत्तं य ज्येष्ठादैवतं व्रतं॥ प्रति ज्येष्ठाव्रतं चैव विहितं केवलो इति॥ तथा
वेदाचरे दाध्वं द्वितीये केवलर्क्षत इति॥ इति ज्येष्ठाव्रतं॥ भाद्रशुक्ले द्वादशी॥ वामनजयंती॥ सि
हे भाद्रपदे सिते हरितिथौ श्रीवामन इति पुराणसमुच्चयोक्ते॥ अत्र वामनपूजा हेमाद्रि
ग्रंथे द्रष्टव्या॥ अत्रैव विष्णोरंगपरिवर्तनमुक्तं॥ भविष्योत्तरे॥ मासे भाद्रपदे मासि एक

दश्यां दिने सितेऽर्के ढिंढानं भवे द्विसोमे हा पातकनाशनं इति ॥ सोऽयं शुक्ला द्वादशी श्रवणा
द्वादशी ॥ अत्र योगविशेष उक्तो मात्स्ये ॥ द्वादशी श्रवणास्पृष्टा स्पृशेदेकादशीं यदि ॥ स एव वै
सर्वो योगो विष्णुशृंखलसंज्ञक इति ॥ इति हेमाद्र्युक्तः पाठः ॥ निर्णयामृतानुसारि तु वैष्णवपाठः ॥
द्वादशी श्रवणर्क्षं च स्पृशेदेकादशीं यदि इति ॥ तथा चात्र श्रवणस्यैकादशीद्वादशीभ्यां यो
ग एव विष्णुशृंखलयोगो नाम्नेति ॥ तत्र योगवशात्तु द्वादशी निर्णयापरा ॥ निर्णीश्रीसं
यो दृश्याव्यधिकलामात्रमपि श्रवणं सदा पूर्वी द्वादशी श्रवणास्पृष्टा केवला पुण्यतमा ति
थिः ॥ न तु मानेन संयुक्ता तावत्सेव प्रशस्यत इति मात्स्यात् ॥ यत्तु दिवोदासीये रात्रेः प्रथम
पादे चेत् श्रवणं हरिवासरे तदा पूर्वामुपवसेदातर्भाते च पारणमिति ॥ तत्र मूलं चिंत्यं
यदा तु शुद्धाधिका द्वादशी परदिन एवोदये श्रवणयोगवती तदा परा उदयव्यापिनी ग्राह्या ॥
श्रवणद्वादशीव्रत इति ॥ बृहन्नारदीयोक्तेः ॥ द्वादश्यां श्रवणयोगाभावे पूर्वाभ्यासान प्राप्य
ते ॥ कृष्णं द्वादश्यां वैष्णवं कुविता ॥ एकादशी नरो योष्या पापाप्यश्रवणान्विते ति नारदीयात् ॥
तत्र शक्तस्यैकादशीद्वादश्योर्द्वयोरुपवासः ॥ तन्वैकादशीपारणाविधिलोपप्रसंगात्र द्वि
पारणया द्वादश्युपवासस्याप्युपपत्तेः ॥ आपो वा अशितमनशितमिति श्रुतेः ॥ एका
दशीमुपोष्यैव द्वादशीं समुपोषयेत् ॥ न चात्र विधिलोपः स्यादुभयोर्दैवतं हरिरिति स्मरणात्
भविष्योक्तेर्वा ॥ अशक्तस्य तु द्वादश्युपवास एवोक्तं च ॥ दिवोदासीये भविष्ये ॥ उपवास
द्वयं कर्तुं न शक्नोति नरो यदि ॥ प्रथमे हि फलाहारी निराहारी परेऽहनीति ॥ अत एवेदं व्रतं
काम्यं यैवेति ॥ मदनरत्ने गौडाग्रस्तका ॥ यत्तु शृणु राजन् परं काम्यं श्रवणद्वादशीव्रतमिति सा
द्विवचस्तस्याद्ग्निहोत्रवदुभयरूपत्वमस्तु ॥ अथास्य कृत्यं विष्णुधर्मोत्तरे ॥ तस्मिन् दिने
तथा स्नानं यत्र क्वचन संगमा ॥ तथा दध्योदनं पुतं न स्यात् उरूणा सह द्विजातेश्च संवे

105

ष्टितं दत्त्वाथ श्रोपानहमेव च वानदुर्गतिमवाप्नोति गतिमग्र्यां च विंदति। तत्र मंत्रः। नमो नम
स्ते गोविंद बुध श्रवणसंज्ञक। अघौघसंक्षयं कृत्वा सर्वसौख्यप्रदो भव। प्रीयतां देवदेवे
त्राणमयसंज्ञायनात्रानमिति। अथ पारणनिर्णयः नारदीये। तिथिनक्षत्रसंयोग उपवासो
यदा भवेत् पारणं तु न कर्त्तव्यं यावन्नैकस्य संक्षयः। अस्यापवादो विष्णुधर्मोत्तरे। याः काश्चि
तिथयः प्रोक्ताः पुण्या नक्षत्रयोगतः। ऋक्षांते पारणं कुर्याद्विना श्रवणरोहिणीमिति। मदनरत्ने
एतेन श्रवणद्वादश्योरंत इति मुख्यः पक्ष उक्तः। अन्यतरांते तत्तु कल्पः। परं तु केवलं पुराणे
पारणं तिथिवृद्धौ तु द्वादश्यामुडुसंक्षयात्। उडुवृद्धौ त्रयोदश्यां तत्र दोषो न विद्यत इति।
इति श्रवणद्वादशी। अत्रैव दुग्धव्रतं संकल्पयेत्। अथ भाद्रशुक्लचतुर्दश्यामनंतव्रतं।
तत्र मध्याह्नव्यापिनी चतुर्दशी कार्या। मध्याह्ने भोज्यवेलायां मिस्रां दिनाके थायामुक्तेवा
दिति प्रतापमार्तंडायः। वस्तुतोऽप्यत्र गणेशचतुर्थ्यामिव मध्याह्ने पूजयेदिति। श्रूयते विधिः
नापि लिंगकल्पः। मध्याह्न इत्यधिकरणकारकस्य दर्शनादिति। प्रधानक्रियायामेवान्वये वेप
तमिति। लट्प्रत्ययस्य वर्त्तमानसामीप्ये वर्त्तमानवद्वेत्यनुशासनवशेनानिश्चितकालार्थ
तया मध्याह्न इति। मूलार्थवाहगतस्य लिंगस्यान्यथाप्युपपादयितुं शक्यत्वेनाकिंचित्करत्वा
दुदयव्यापिनी ग्राह्येति। माधवाचार्योक्तमेव न्याय्यं। तृतीयैकादशी षष्ठी शुक्लपक्षे चतुर्दशी।
पूर्वविद्धा न कर्त्तव्या कर्त्तव्या परसंयुतेति नारदीयोक्तेः। निर्णयामृते। नविद्धापि तथा
इपदस्यां ते चतुर्दश्यां हि जोत्तम। पौर्णमास्याः समायोगे व्रतं चानंतकं भवेदिति। यत्तु स्कांदे
मुहूर्त्तमपि चेद्भाद्रे पूर्णिमायां चतुर्दशी। संपूर्णां तां विदुस्तस्यां पूजयेद्विष्णुमव्ययमिति। तन्न
त्रिमुहूर्त्तस्यैव वैश्वानराधिकरणन्यायेन स्तावकं। इत्यनंतचतुर्दशी। अथागस्त्यार्घ्यः। सच

संगस्त्योदये सति सप्तदिनमध्ये प्रभातसमये देयं॥ अगस्त्योदयस्तु॥ सिंहसंक्रमाते
कविंशतितिदिनोत्तरं भवति॥ तत्र द्विजातिभिरगस्त्यः स्वनमानदुति॥ वैदिकमंत्रेणार्घ्यो
देयः॥ शूद्रस्य पौराणिको मंत्रः॥ काशपुष्पप्रतीकाश वह्निमारुतसंभव॥ मित्रावरुणयोः
पुत्र कुंभयोने नमोस्तुते॥ विंध्यवृद्धिक्षयकर मेघतोय विषापह॥ रत्नवल्लभ देवेश लं
कावास नमोस्तुते॥ वातापिर्भक्षितो येन समुद्रः शोषितः पुरा॥ लोपामुद्रापतिः श्रीमान्
योसौ तस्मै नमोस्तुते॥ येनोदितानि पापानि विलयं यांति चाधमात्॥ तस्मै नमोस्त्वगस्त्याय
सशिष्याय सपुत्रिणे॥ इति॥ अथ लोपामुद्रार्घ्यमंत्रः॥ राजपुत्री महाभागे ऋषिपत्नि वरान
ने लोपामुद्रे नमस्तुभ्यं अर्घ्यं मे प्रतिगृह्यतामिति॥ अर्घ्यदानस्य फलमुक्तं भविष्ये॥ दत्वा
र्घ्यं सप्तवर्षाणि क्रमेणानेन पांडव॥ ब्राह्मणस्याच्चतुर्वेदः क्षत्रियः पृथिवीपतिः॥ वैश्यो
धान्यं निध्यति शूद्रश्च धनवान् भवेत्॥ पावदायुः अयं कुर्यात् स परं ब्रह्म गच्छति॥ अ
गस्त्यस्य काशपुष्पमयीं प्रतिमां संपूज्य ब्राह्मणाय दद्यादिति हेमाद्रिनिबंधे दृ
ष्टव्यं॥ अथ भाद्रपौर्णमास्यां विशेषः॥ श्राद्धे नांदीमुखानां प्रत्यब्दं कन्यागते रवौ
पौर्णमास्यां तु कर्त्तव्यं वाराहवचनं यथेति॥ नांदीमुखत्वं चात्रैवोक्तं॥ पिता पितामहश्चै
व तथैव प्रपितामहः॥ त्रयो ह्यश्रुमुखा ह्येते पितरः संप्रकीर्त्तिताः॥ तेभ्यः पूर्वे त्रयो ये तु ते तु
नांदीमुखाः स्मृता इति॥ यत्तु ये स्युः पितामहादूर्ध्वं ते स्युर्नांदीमुखास्त्रयः॥ प्रसन्नमुखसंज्ञा
स्तु मंगलीयायनस्तु नरा इति॥ तत्र पितामहशब्देन प्रपितामहो लक्षणीय इति हेमाद्रि
निर्णये चैवं॥ प्रसव इति वचनात् मासतु वदंति॥ अत्र मातामहा अप्यावश्यकाः॥

पितरो यत्र पूज्यंते तत्र मातामहा अपि इति॥ धौम्योक्तेः॥ पितृव्यादेरपि पितृभा
वापन्नमात्रपरत्वात्॥ जनकपरत्वे बहुवचनासामंजस्यादिति॥ तत्र पितृशब्द
स्य जनकपरत्वात्॥ न चैवं बहुवचनासंगतिः छत्रिन्यायेन तदुपपत्तेः॥ इति प्रो
ष्ठपदीश्राद्धनिर्णयः॥ अत्रैव विशेषांतरं विष्णुधर्मोत्तरे॥ गोदानं प्रोष्ठपद्यां वा पौ
र्णमास्यां महाफलमिति॥ तथा काशीखंडे॥ नभस्यपंचदश्यां च कुलस्तंभे समर्पयेत्
हुरवंदइ पितृणां बलेन भवेत्तस्य पूजनात्॥ पंचदश्यां तु नवम्यामिति॥ पाठस्तदा सामान्
पौर्णमासीमात्रे यां पसन त्कौमारीकुलस्तंभस्य मूले दद्यादामलकोन्मितं॥ नरलो
केषु ग्रोधेषु सुधया नैव पीड्यते॥ इति श्रीमत्सामंतचूडामणिजसवंतभास्करे भाद्र
मासप्रकाशः॥ अथाश्विनः॥ अत्र दानमुक्तं॥ तत्रैवाश्विने घृतदानेन रूपवान्
भिजायत इति॥ तथा वामनपुराणे॥ तिलांस्तुरंगवृषभं दधिसान्नायसापकं प्रीत्यर्थं प
द्मनाभस्य देयमाश्वयुजे नरैरिति॥ अथात्र कन्यासंक्रमणस्य षोडश्य इति मुख्यत्वान्मु
हूर्त्तत्रये पुण्यतमा॥ तत्र दानमाह॥ विश्वामित्रः॥ कन्याप्रवेशे वस्त्राणां वेश्मनां दानमेव
च इति॥ इषपक्षोर्त्तमश्वा॥ ग्रासस्याच्छन्ने इति स्कन्दे तेनतारत्वा इन्त विष्णुधर्मोत्तरे॥ स्त्रीवस्त्रादि
दानमपि कर्त्तव्यं॥ अथ महालयः॥ आदित्यपुराणे॥ कन्यागते सवितरि यान्यहानि तु
षोडश क्रतुभिस्तानि तुल्यानि पितॄणां दत्तमक्षयमिति॥ इंदुमतुरपि॥ मध्ये वा यदि
वाप्यंते पत्र कन्यां रविभ्रमेत्॥ सपक्षः सकलः पूज्यः श्राद्धषोडशकं प्रति इति॥ कन्यागते
कन्यां सोतिः प्राक्प्रसायाः॥ अत एवादित्यपुराणे॥ आषाढीमवधिं कृत्वा पंचमं पक्ष

५५

108

माश्विनम॥ ६ श्राद्धं तत्र प्रकुर्वीत कन्यां गच्छतु वा न वेति॥ षोडशश्राद्धसंख्या च शुक्लप्र
तिपदासह ज्ञेया॥ यदाह देवलः॥ अहःषोडशकं यत्तु शुक्लप्रतिपदा सह॥ चंद्रक्षयाविशेषे
ण सापि दर्शात्मिका स्मृतेति॥ अत्र पंच पक्षा उक्ताः॥ तत्राद्यो॥ अश्वयुक्कृष्णपक्षे तु
श्राद्धं कार्यं दिने दिने॥ त्रिभागहीनं पक्षं वा त्रिभागं त्वर्द्धमेव चेति॥ दर्शपक्षः पंचम्यादि
ष्टम्यादिरिति॥ विस्तारः पक्षाः॥ पंचमस्तु नागरखंडे॥ पितरस्त्वभिवांछंति [illegible] आषाढ्याः
पंचमे पक्षे कन्यासंस्थे दिवाकरे॥ यो वै श्राद्धं नरः कुर्यादेकस्मिन्नपि वासरे॥ तस्य संवत्सरं
यावत्तृप्ताः स्युः पितरो ध्रुवं॥ अत्र शातातपवृद्धः॥ अत्र कथंचिद्विघ्नसंभवे कर्त्तव्यतायाः
कालावधिस्तु॥ ब्राह्मे॥ आषाढ्यावध्यकन्यां तुल्ययोः क्रमादास्ते दिवाकरः॥ तावच्छ्राद्धस्य कालः स्या
च्छून्यं प्रेतपुरं तदेति॥ तथा सुमंतुनापि॥ कन्याराशौ महातेजा यावत्तिष्ठेद्विभावसुः॥ तस्मा
त्कालं तु वै दद्यात् वृश्चिकं यावदागमः॥ सेयं दीपान्विता राजन् ख्याता पंचदशी तु या॥ त
स्यां दद्यान्न चेद्दत्तं पितॄणां वै महालयं इति॥ निसंचरं महालये [illegible] दुक्तं श्राद्ध
ततो वृश्चिकसंप्राप्ते निराशाः पितरो गताः॥ पुनः स्वभुवनं यांति शापं दत्त्वा सुदारुण
मिति॥ अकरणे प्रायश्चित्तं [illegible] मुक्तं [illegible] ग्निधाने॥ [illegible] अश्वस्य मंत्रेण च दत्त्वा वारं
द्विमासयोः॥ महालयं परान्नेन तद्दासं पूर्णमेति॥ तद्दिति॥ फलमुक्तं कार्ष्णाजिनिना॥
पुत्रानायुस्तथारोग्यमैश्वर्यमतुलं तथा॥ प्राप्नोति पंचमे दत्त्वा श्राद्धं कामांश्च पुष्कला
निति॥ एतत्सामेन न कार्यमिति॥ स्मृतिदर्पणे दोषा [illegible] मातामहानां च सपिंडनं च
गयाश्राद्धं महालयं॥ अपुत्रोऽपि न कुर्वीत श्राद्धमामेन कर्हिचिदिति॥ किंतु सिद्धान्नेने
ति ज्ञेयं॥ मलं सन्ध्येनेन कार्यमिति॥ केचित्तु॥ अप्यनुग्राकमहालाभे पितॄन्कन्या

गतेर्वर्ज्ये इति वचनविरोधात्। अत्र महालये पञ्च्यांतिथ्याद्याह वसिष्ठः। नंदायां भा-
र्गवदिने चतुर्दश्यां त्रिजन्मसु। एषु श्राद्धं न कुर्वीत गृही पुत्रधनक्षयात्। जन्मभं तस्-
वीत्तरे चेति त्रीण्येतानि त्रिजन्मपदवाच्यानि। पाराशरमाधवीये मदनपारिजा-
तपृथ्वीचंद्रोदयपद्धत्योर्वा वस्तुतो जन्मतारा दशमी एकोनविंशतिश्चेति नक्षत्रत्रयं
त्रिजन्मपदवाच्यं स्वरसतः प्रतीयते। सकृन्महालयविषयोयं निषेधः। सराह नारदः।
सकृन्महालये काम्ये पुनः श्राद्धे स्विलेषु वा। अतीतविषये चैव सर्वमेतन्न चिंतयेदि-
ति। अस्यापवादः। अमापाते भरण्यां च द्वादश्यां पक्षमध्यके। तथा तिथिं च नक्षत्रं वा-
सं च न विचारयेदिति। संपूर्णपक्षश्राद्धकरणे तु नंदादि न वर्ज्यं। तत भस्यापरपक्षे तु
श्राद्धं कुर्याद्दिने दिने। नित्यं नंदादि वर्ज्यं स्यान्नैव वर्ज्या चतुर्दशीति। कार्ष्णाजिनिव-
चनात्। एकप्रयोगपरं चेदं। प्रतिप्रयोगभेदेन श्राद्धकरणे तु चतुर्दशीमात्रं वर्ज्यं
न तु नंदाद्यपि। यदाह याज्ञवल्क्यः। प्रतिपत्प्रभृतिष्वेकां वर्जयित्वा चतुर्दशीमिति॥
यत्तु सकृन्महालयो मृताहदिन एव कार्य इति। निर्णयदीपिकादावुक्तं। या तिथिर्यस्य
मर्त्यस्य मृताहे तु प्रवर्तते। सा तिथिः पितृपक्षे तु पूजनीया प्रयत्नतः। तिथिच्छेदो न क-
र्तव्यो विनाशौचं यदृच्छया। पिंडश्राद्धं च कर्तव्यं विच्छित्तिं नैव कारयेत्। अत्रोक्तः पक्ष-
मध्ये तु करोत्येकं दिने यस्तु। निषिद्धेपि दिने कुर्यात्पिंडदानं यथाविधीति कात्यायनोक्तेः।
नंदादिनिषेधोप्यत्र नावतरतीति। आचारोप्येवमिति। तत्र कात्यायनवचसो महानि-
बंधेष्वदर्शनान्मूलं मृग्यं। यत्तु स्मृत्यर्थसारे तूक्तं॥ विवाहव्रतचूडासु वर्षमर्द्धं त-
दर्द्धकं। पिंडदानं मृदास्नानं न कुर्यात्तिलतर्पणमिति। तस्यापवादमाह हेमाद्रिनिबंधे

ज्योतिःपराशरः। महालयेगयाश्राद्धे मातापित्रोः क्षयेऽहनि। यस्य कस्यापि कर्त्त
व्यं सपिंडीकरणे कृते। ऊर्ध्वं द्वाहोपि प्रकुर्वीत पिंडनिर्वपणं सदेति। हारीतो व्यासो
बृहस्पतिश्च। यस्य कस्यापि संवत्सरे प्रेते पितृयोगे महालये। पिंडदानं प्रकुर्वीत युगा
दिष्वपि मघासु। महालये गयाश्राद्धे मातापित्रोर्मृतेऽहनि। कृतोद्वाहोपि कुर्वीत पिंडनि
र्वपणं सदेति। अथ महालयदेवताः। तत्र विश्वेदेवा धुरिलोचनसंज्ञाः। तदुक्तं श्रा
द्धसपुराणे। अपि कन्यागते सूर्ये श्राद्धे च धुरिलोचनाविति। एतच्च काम्यश्राद्धोपल
क्षणं। काम्ये च धुरिलोचनाविति। बृहस्पत्युक्तेः। अथ पितरः वोपदेवीयसंग्रहे॥
तातांबात्रितयं सपत्नजननी मातामहादित्रयं सस्त्रिस्त्रीतनयादितातजननी
स्वभ्रातरः सस्त्रियः। ताताम्बात्मभगिन्यपत्यधवयुक् जायापिता सद्गुरुः। शिष्या
प्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे इति। अत्र सपत्नमातृश्राद्धे विशे
षः स्मृतिदर्पणे गालवेनोक्तः। अनेकमातरो यस्य श्राद्धे चापरपक्षके। अर्घ्यदानं पृथ
क्कुर्यात् पिंडमेकं तु निर्वपेत् इति। जीवन्मातृकस्य सपत्नमातुरेकोद्दिष्टमेव कुर्यात्
यत्तु वृहन्मनुः। अन्वष्टक्यं च यन्मातुर्गयाश्राद्धं महालयं। पितृपत्नीषु चान्यासु श्रा
द्धं सर्वं पार्वणं भवेदिति। तन्मृतमातृकाविषयं। आचारोप्येवं। मातामहादित्रयस्य
सस्त्रीति विशेषणात्र मातामह्यादिपार्वणं पृथक्। अत एव धर्मः। महालये गयाश्रा
द्धे वृद्धौ चान्वष्टकासु च। नवदैवतमंत्रेष्टं न्यूनं स्यात्पौरुषं विदुः। न्यूनं षोडशश्राद्धादि
व्यतिरिक्तं। अनुकल्पश्चायं सति संभवे तु पृथक् कार्यं। यदुक्तं निगमे। महालये गया

श्राद्धे दृष्टो वान्वष्टकासु चा॥ लियं द्वारद्वारे वसंतीर्थे प्रोष्ठमघासु चेति॥ जायापितृव्यगुरुः इ
ति संग्रहवाक्यार्थः॥ अथ निमंत्रणीयब्राह्मणसंख्या॥ गौतमः॥ नवावरानुभोजयेदयुजो वा यथो
त्साहं मूर्ध्वं त्रिभ्यो गुणवंतमिति॥ एकैकस्य स्थाने नव सप्त पंच पंच त्रयस्त्रय एक एको वा ब्रा
ह्मणाः भोज्या अतिसमृद्धेनापि न बह्वधिकाः॥ अथ उत्साहनूत्तस्या भोज्याः॥ पित्रादित्रयार्थे
गुणवान् भोज्य इत्यर्थः॥ आश्वलायनं प्रति तु मनुराह। द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वेति
पक्षे एकैकस्य पित्रादेः स्थाने॥ एकैकमिति॥ मेधातिथिव्याख्यातरध्याहारप्रसंगादुपेत्य आ
लएव हेमाद्रिः॥ एकं दैवे॥ एकं पित्र्ये इत्यर्थ इति॥ ग्रंथे नैकैकमथ वा॥ द्वौ त्रीनित्यादि वृहस्प
तिवचो व्याख्यातम्॥ याज्ञवल्क्यः॥ द्वौ दैवे प्राक् त्रयः पित्र्ये उदगेकैकमेव वा॥ मातामह
नामप्येवं वा तंत्रं वा वैश्वदेविकं॥ भूरिश्रवाः॥ भोजयेदथवाप्येकं ब्राह्मणं पंक्तिपावनमिति॥
तथा॥ चतुर्विंशतिमते। एकस्मिन्ब्राह्मणे सर्वानाचार्यादीन् प्रपूजयेत् इति॥ एकस्यापि
स्या ब्राह्मणस्यालाभे तु कस्य उक्तः॥ प्रभासखंडे॥ अलाभे ब्राह्मणस्यैव कौशः कार्यो बटुः॥ प्रिये
इति॥ कौशान्कुशमयान् बटून् मनुष्यप्रतिकल्पितान्॥ तथा हे देवलः॥ निधाय वा दर्भबटूनास
नेषु समाहितः॥ प्रैषानुप्रैषसंयुक्तं विधानं प्रतिपादयेत्॥ इति॥ तत्र संकल्पितस्यान्नस्य
पक्तर्तव्यं॥ तदाह स एव॥ पात्राभावे परं कृत्वा पितृयज्ञविधिं नरः॥ निर्दिश्यापत्रमुद्दिश्य
त्पात्रं तदा गति॥ पात्राभावे क्षिपेदग्नौ गवे दद्यादथाप्सु वेति॥ इति कुमारचन्द्राद्यनुक
ल्याः॥ अथ विधवाकर्तृकमहालये विशेषः॥ स्मृतिसंग्रहे॥ दत्वा रिक्तं ब्राह्मणानीह विधवायाः
सदैव हि॥ स्वभर्तृश्वशुरादीनां मातापित्रोस्तथैव च॥ ततो मातामहानां च श्राद्धदानमुप
क्रमात्॥ श्वश्रूणां च विशेषेण मातामह्यास्तथैव च इति॥ श्राद्धकौतु स्मृतिरत्नाव

स्यां। स्वभर्तृप्रभृति त्रिभ्यः स्वपितृभ्यः स्तथैव च। विधवा कारयेच्छ्राद्धं यथाकालमतंद्रिते
ति। स्वयं संकल्पं कृत्वान्यब्राह्मणद्वारा कारयेदिति। प्रयोगपारिजाते स्थितं। संन्यस्तपितृ
कोपि महालयश्राद्धं कुर्यात्। वृद्धो तीर्थं च संन्यस्ते ताते च पतिते सति। येभ्य एव पिता दद्या
त्तेभ्यो दद्यात्स्वयं सुतः॥ इति। कात्यायनोक्तेः। पित्तु कौडिन्यादृष्टिश्राद्धं गयाश्राद्धं श्राद्धं वा
परपक्षिकं। न जीवत्पितृकः कुर्यात्तिलैस्तर्पणमेव चेति। तत्केवलकाम्यश्राद्धविषयं। श्रा
त्र केविदाहृत। पिंडरहितमेतच्छ्राद्धं कार्यं। मुंडनं पिंडदानं च प्रेतकर्म च सर्वशः। न जीवत्पि
तृकः कुर्याद्गुर्विणीपतिरेव चेति। वृद्धोक्तेरिति। तत्र रक्षवाक्यस्य निर्मूलत्वात्। समूलत्वे
पि विधिस्पृष्टे निषेधानवकाश इति। न्यायेन रागप्राप्तिपिंडदानादिविषयता। पाउ विम
त्वात्। अत्र पक्षश्राद्धकरणे प्रसंगं निषिद्धाहे पितस्मिन्नेव दिने। दुर्गो जनोत्तरं तर्पणं क
र्यं सकृन्महालये तु परदिने। हेमाद्रौ मात्यदेमासिश्राद्धं प्रतिदिनं भवेत्। पितृणां श्रय
हं कार्यं निषिद्धाहे पितर्पणं। सकृन्महालये श्वस्मारप्रकास्वं तएव हि। इति। प्रयोगपारिजा
ते गर्गोक्तेः। अस्मिन्पक्षे मरणश्राद्धस्य गयाश्राद्धफलमुक्तं। मात्स्ये। भरणीपितृपक्षे
तु महतीपरिकीर्तिता। तस्यां श्राद्धं कृतं येन सगयाश्राद्धकृद्भवेत्। इति महालयप्रपंचः॥
अथ तिथिषु विशेषः। आश्विनकृष्णतृतीयायां ललितादेवीयात्रा काशीखंडोक्ता की
र्तिता। व्रतोपवासयोः। अथाश्विनकृष्णषष्ठीयोगविशेषेण। कपिलोक्ता। वाराहे। न
भस्यकृष्णपक्षे तु रोहिणीपातभसुतैः। युक्ताः षष्ठी पुराणज्ञैः कपिलाः परिकीर्तिताः। व्रतोप

वासनियमैर्भास्करं तत्र पूजयेत्। कपिलां च द्विजाग्र्याय यो दत्वा क्रतुफलं लभेदिति। अ
त्र नभस्य शुक्लपक्षादिमासाभिप्रायं। प्राती व्यती नियमैर्भास्करं तत्र पूजयेत्। कपिलां च द्वि

जाग्माय इत्यातिपातः भसुतो भौमवारः॥ अत्र हस्तार्कयोगोपि पुराणसमुच्चये उक्तः भाद्रेमा
मास्यसिते पक्षे भानौ हस्ते व करे स्थितौ। पाते कुजे च रोहिण्यां सा षष्ठी कपिला स्मृता॥ संयोगे तु
व तुर्णं च निर्दिष्टा परमेष्ठिने ति॥ एवमेव चंद्रषष्ठी चंद्रोदयव्यापिनी सा ग्राह्या॥ उभयत्र चंद्रो
दयव्यापित्वाभावे पूर्वेति निर्णयामृते स्थितं॥ आश्विनकृष्णाष्टम्यां महालक्ष्मीव्रतमुक्तं पुरा
णसमुच्चये अश्विन्योरर्चनं भाद्रपदे सिताष्टमीमारभ्य कन्यागते ... च सूर्ये समापयेत्॥ तत्रेति
थौ च यावत्सूर्यस्तु पूर्वार्द्धं गतो भवेत्स्यादिति॥ तत्राष्टमी चंद्रोदयव्यापिनी ग्राह्या॥ चंद्रोद
यथसंप्राप्ते इत्यादीनां कथायां भृगूक्तेः॥ परदिने चंद्रोदयादूर्ध्वं त्रिमुहूर्तव्यापित्वे तु नरे
व नवमीविद्धेति वचनस्तु परदिने चंद्रोदयादर्वाक् अष्टम्यां सत्यां तेषां अथवा ... त्र चंद्रार्घ्य
मंत्रः॥ नमोस्तु ते निशानाथ लक्ष्मीभ्रातर्नमोस्तु ते अमृतसंपूर्णतोयाल्लुगृहाणार्घ्यं विधो म
मा॥ अत्र कन्यागते सूर्ये आरभ्य कर्त्तव्यं मश्विन्योरर्चनात् हस्तभांतरलसंक्रे तद्व्रतं न समा
पयेत्॥ इत्यादयो निषेधाः॥ प्रथमारंभविषया इति सिद्धांतः॥ इति महालक्ष्मीव्रतनिर्णयः॥
अत्रैव श्राद्धस्य गयाश्राद्धफलमुक्तं॥ पृथ्वीचंद्रोदये ब्राह्मे॥ आषाढ्याः पंचमे पक्षे गतानाम
ध्याष्टमी स्मृता॥ त्रयोदशी गजच्छाया गयातुल्या तु पैतृके॥ अथाश्विनकृष्णनवम्यन्वष्ट
का॥ अष्टकामनु जातान्वष्टकेति॥ ब्रुसने गएलनपक्षगता॥ अष्टम्याः अष्टकालं प्रौष्ठपद्यष्टकाण
पः पितृलोके प्रविष्यसीति॥ पाशेनु स्मृति श्राद्धकासायनः॥ अन्वष्टकासु नवमिः पिंडैः श्राद्ध
मुत्राद्धं॥ पित्रादिमातृमध्यं च ततो मातामहांतकमिति॥ सत्तु श्राद्धे॥ अन्वष्टकासु क्रमशो
नात् पूर्वं तद्दिष्यतद्इति॥ तज्जीवत्पितृकविषयं उक्तं च मैत्रायणीयपरिशिष्टे॥ अन्वष्टम्यं
गयाप्राप्तोसस्सांयत्र्यमने हनि॥ मातुः श्राद्धं सुतः कुर्यात्पितर्यपि च जीवति॥ जीवन्मात
कोपि॥ सपत्नमातृश्राद्धं कुर्यात्॥ सर्वासामेव मातॄणां श्राद्धं कन्यागते रवौ॥ नवम्यां दि

प्रदातव्यं ब्राह्मणलब्धवरायपलइति। स्मृतेः॥ अत्र सर्वासां नाम निर्दिश्ये नैको ब्राह्मणोऽर्घ्य॥
पिंडश्च॥ नामैकोद्दिवचनादि प्रयोग इति॥ नारायणवृत्तिकारः॥ अत्र श्राद्धदीपकलि
कायां विशेषः॥ आह॥ पितृमातृकुले सन्त्याः याः काश्चित्तु मृताः स्त्रियः। श्राद्धं दौमात
रो ज्ञेयाः॥ श्राद्धं तत्र प्रदीयत इति। इदं च जीवत्पितृकोपि सपिंडकं कुर्यात्॥ यस्तु न जी
वत्पितृकः कुर्यादिति॥ तद्भागप्राप्तविषयमिस्क्तं। उक्तं च विष्णुधर्मोत्तरे। अन्वष्टकास्वि
ष्टकृत्पक्षम्य पिंड निर्वपणं कार्यं तस्यैव पितृवत्त्रयेति। एतेन जीवत्पितृकत्व प्रयुक्त निषेध
स्थले पिंडदानस्य प्रतिप्रसवोयमिति। परास्तं॥ अत्र सुवासिन्यपि भोज्याः। मातुः श्रा
द्धे तु संप्राप्ते ब्राह्मणैः सह भोजनं। सुवासिन्यै प्रदातव्यमिति नृणां तातपोऽब्रवीत्। भर्तुरग्रेम
ता नारी सहदाहेन वा मृता। तस्याः स्थाने नियुंजीत विप्रैः सह सुवासिनीमिति। मार्कंडेय
पुराणे तु॥ अत्रैव मदालसा वाक्यं। स्त्री श्राद्धे पुत्र देयास्तु रत्नं कारश्च यो चित। मंजीर मे
खला हार नमणिकाकंकणस्य इति। एतच्च श्राद्धे निसंइति। मातृनवमी॥ आश्विन कृ
ष्णाहार रेणां संन्यासिनां श्राद्धं मुक्तौ। पृथ्वीचंद्रोदये॥ संग्रहे यतीनां विहितं श्राद्धं कृष्णपक्षे वि
शेषतः इति। एतच्च पार्वणं तथा च प्रायवीये संन्यासिनोऽप्याब्दिकादि पुत्रः कुर्याद्यथाविधिः
महालये तु यत्श्राद्धं द्वादश्यां पार्वणेन तु तदिति॥ अथ त्रयोदशी तत्र मनुः यत्किंचिन्मधुना मि
श्रं प्रदद्यात्तु त्रयोदशी॥ तदप्यक्षयमेव स्याद्वर्षासु च मघासु चेति एतच्चाविभक्तैरपि
पृथक् कार्यं विभक्तैर्वा अविभक्तैर्वा कुर्युः श्राद्धं पृथक् सुताः। मघासु च ततोन्यत्र नाधिकारः
पृथग्विनेति वचनात्॥ अत्र गजच्छायायोग उक्तो परार्के वा पर्वीये हंसे करस्थिते यानु
मघायुक्ता त्रयोदशी। तिथिर्वैवस्वती नाम सा छाया कुंजरस्य चाद इति। अत्र श्राद्धम

115

पिंडकं नित्यं च॥ अस्यायुगादित्वेन पिंडदाननिषेधात्॥ प्रोष्ठपद्यामतीतायां तथा॥
कृष्णत्रयोदशी॥ अष्टकान्वष्टकास्वेव वर्षासु च नृपोत्तम। एतानि श्राद्धकालानि नि
त्यान्याह प्रजापतिः। श्राद्धमेतेष्वकुर्वाणो नरकं प्रतिपद्यते इति। विष्णुधर्मोत्तरोक्तेश्च
ये तु गृहीत्रयोदश्यां श्राद्धं न कुर्यात्। पुत्रवानपीत्यादिनिषेधास्ते पिंडदानमात्रं निषे
धंति। न तु ब्राह्मणभोजनमपि। श्राद्धशब्दस्य कर्कमते पिंडदानमात्रवाचकत्वात्। तत्रा
पि महती पूजा कर्तव्या पितृदैवतेष्वकृते पिंडदानं त्वित्यादिने मात्र योदशीं प्रक्रम्य स्कांदे वीपु
राणे॥ विशेषविहितेन पिंडदाननिषेधेन पिंडदानमात्रे आग्नेयवायव्यकोणगे पमा
त्रे पुरोडाशस्यैपस्यैवोपसंहारात्। श्राद्धमेवाभिप्रेतं मात्र योदशीं प्रक्रम्य स्कांदे नागर
खंडेप्युक्तं। अतः श्राद्धं विना देयं तद्दिने मधुपायसखड्गमांसं कालशाकमांसं वार्ध्रीण
सस्य च। तस्याभावेऽपि दौहित्रं क्षीरोदनं मनुत्तमाः। तस्मिन्नहनि विप्रेभ्यः पितॄणां तुष्टये
नपेति। यत्तु हरिहरेणोक्तं। माङ्कृष्णत्रयोदश्यां त्रयोदश्यां विषयाद्येमे निषेधा इति।
तत्र अद्यप्रभृति यः श्राद्धं त्रयोदश्यां करिष्यति। कन्यासंस्थे सहस्रांशौ गौणेनस्यसा
हि न्यासक्षयइसाद्यिः। नागरखंडोक्तः। माङ्कृष्णत्रयोदशी विषयस्यापि निषेधस्य हेमा
द्रिणा दाहृतत्वात्। अत्र श्राद्धे मघादिकलौ निषिद्धमपि देयं। श्राद्धे मांसं तथा मध्यति
निषेधस्य विशेषविहितेन मघादावनवतारात्। मलमासेप्येतन्न कार्यमिति प्रागुक्तं॥ इति
त्रयोदशीनिर्णयः॥ अथ चतुर्दशी॥ अत्रापमृत्युहतानामेव श्राद्धं कुर्यात्। श्राद्धं शस्त्र
हतस्यैव चतुर्दश्यां महालये इति स्मरणात् दैवयुक्तं मेकोद्दिष्टं कार्यं। यदुक्तं प्रयो
गपारिजाते। प्रेतपक्षे चतुर्दश्यामेकोद्दिष्टविधानतः। दैवयुक्तं तु नो श्राद्धं पितॄणामक्ष

५९

118

यंभवेदित्यादि पितामहे पितृव्यस्य हते तेलेकोद्दिष्टद्वयोश्च पितामहे पितृव्यस्यादि हते नितु
पार्वणमेवा पित्रादयः शस्त्रयो यस्य शस्त्रघातादिभिर्हताः सपूते पार्वणं कुर्यादि
कानिष्ठ्यगिति। बृहस्पतिः शास्त्रोक्ते। उद्दिष्टं द्वादशेऽहि माद्यादि निबंधेष्वेवं। यस्य न त्रैव
शस्त्रहतस्य मृताहदिनं तस्य वार्षिकमेव कार्यं तेनैवास्यापि प्रसंसिद्धेः। शस्त्रहतस्य
दिनांतरे तु पार्वणं भवत्येव॥ अथामावास्या॥ अत्रापि योगविशेषाद्गजच्छायामाहात्म्यं यतः
हंसे करस्थिते या तु अमावास्या करान्विता॥ सा ज्ञेया कुंजरच्छायेति बौधायनोऽब्रवीत्॥
अन्यत्र हेमाद्रिनिबंधे सैंहिकेयो यदा सूर्यं ग्रसते पर्वसंधिषु गजच्छाया तु सा प्रोक्ता त
स्यां श्राद्धं प्रकल्पयेत्॥ सैंहिकेयो राहुः॥ तत्र विशेषो विष्णुधर्मोत्तरे। यां दर्शे नरो हाः खड्ग
मांसेन योगिनां भोजयेत्तु कुलेऽस्माकं छायायां कुंजरस्य च। आकल्पकालिकी तृप्तिस्तेन
स्माकं भविष्यति॥ दाता सर्वेषु लोकेषु कामचारी भविष्यति॥ पदत्तसंचकं न स्यादेकेनापि
वयं तद्वात्तलिं प्राश्नुमनस्तज्जेन छायायां हस्तिनः दद्यो वैश्वदेवयाद्धादुनगोचतीति
काटककेलावपि॥ एतदेव पितृणामयनं यद्धस्तिश्राद्धं तस्मा छायायां श्राद्धं दद्यादिति
महाभारतेपि॥ अजेन सर्वलोहेन वर्षासु नियतं फलः॥ हस्तिछासु विधिवत्कर्णव्यजवी
जिनतः इति श्राद्धं दद्यादिति शेषः॥ अत्र श्राद्धे भोक्तुर्दोष उक्तः॥ स्मृत्यंतरे गजच्छायाश्रि
तां भुक्त्वा नभक्ष्यः पुरुषोत्तमो वेदिति॥ आहतोपि। मूलके सत्तके चैव राहुग्रहे च दुःसर्ययां छायायां
कुंजरस्याथ भुक्त्वा तु नरकं व्रजेदिति॥ प्रसक्ष गजच्छायायामेवायं निषेध इति केचित्तत्र
नियमेऽभावात्॥ अथाश्विनस्य कृष्णप्रतिपदि दौहित्रो मातामहश्राद्धं कुर्यात्॥ तत्तु केचित्
नियमेऽभावात्॥ अथाश्विनस्य कृष्णप्रतिपदि दौहित्रो मातामहश्राद्धं कुर्यात्॥ पस्तु केचित्
अनुपनीतस्यापि दौहित्रस्याधिकारः। जातमात्रोपि दौहित्रो विद्यमानेपि मातुले॥

कुर्यान्मातामहश्राद्धं प्रतिपद्याश्विने सिते इति संग्रहकोक्तेरिति। तन्न। जातः पुत्रः क्र
सकेऽग्नीनादधीतेति च जातमात्रोपि दौहित्रस्याप्यधिकारी जात इत्यर्थः। न त्वनुपनीतस्या
धिकारिता। उपनयनोत्तरमेव स्मार्ताधिकारस्य स्पष्टे सिद्धोतितत्वात्। यद्यपि निर्णयदीपि
कादिषूक्तं। जीवत्पितृकस्यैवात्राधिकारः। प्रतिपद्याश्विने शुक्ले दौहित्रस्त्वेकपार्वणं
श्राद्धं मातामहे कुर्यात्सपिता संगवे [illegible]ते इत्यादिवचनात्। अत एवात्र प्रतिपत्संगवव्या
पिनी ग्राह्येति चेत्तर्हि पिना प्रतिपद्याश्विन इत्यादिवचनस्य निर्मूलत्वात्। अत एव हि निर्ण
शाचारा सार्वणविधिनं समाचरणीयमिति। मधुकामे निजमते हेमाद्रिराजमार्गो यद
पिमुंडनं। पिंडदानं चेति। वचनात् पिंडकमेतदिति। तदपि न तद्वचनस्य निर्मूलतायास्म
मूलत्वेपि रागप्राप्तविषयतायाः प्रागुक्तत्वात्। तस्मात्पराह्णव्यापिन्यां प्रतिपद्युपनीतेन
मृतपितृकेणापि दौहित्रेण सपिंडकमिदं कार्यमिति सिद्धं। परं त्वेतद्दाक्षिणात्यानामाचा
रान्न तु गुरुणां। एतच्छ्राद्धं मलमासे सति शुद्ध एव कर्त्तव्यमपराह्णमाधवीयो ज्योतिः पितामहः
मासः कन्यागते भानाव संक्रांतो भवेद्यदि। दैवं पित्र्यं तथा कर्म तुलास्थे कर्तुरक्षयमिति दै
वं नवरात्रदुर्गार्चनादि पित्र्यं दौहित्रकर्तृकश्राद्धादि। इति दौहित्रप्रतिपन्निर्णयः। अत्रै
व च नवरात्रारंभः। तत्र प्रतिपत् पराग्राह्या। सोमांह्नजपते निसंद्धितीयाद्विगुणान्विता
प्रतिपच्छारदी ज्ञात्वा सोष्के तेसुखमव्ययमिति। रुद्रयामलात्। अमायुक्ता न कर्त्तव्या प्रति
पच्चंडिकार्चने इति। देवीपुराणाच्च। आपरात प्रतिपन्मुहूर्त्तत्रयान्यूना परेदिने तदामाविद्धा
पि पूर्वैव। अमायुक्ता प्रकर्त्तव्या प्रतिपच्चंडिकार्चने। तेया ह्यापरसंयुक्ता शुद्धसंतानकां
क्षिभिरिति स्यादिति सिंह[illegible]प्रसादोदाहृतवचनेन निर्णयामृते द्वितीयायुक्तानिषेधक

६०

118

पचने भक्ष्यतानि तुल्यल्लवः ॥ द्वितीयायोगसंयुक्ता प्रतिपच्चंडिकार्चने मोहादर्थेपि रेत्राद्वा
कर्तुं पुत्रविनाशकृत् । आरंभे नवरात्रस्य द्वितीयायुतिसंयुता न केवलं विधिं हंति वंधांसो
पुत्रसंपदमिति । धवलनिबंधे देवीवचनः । प्रतिपच्छेषसंयुक्त द्वितीयायां ममार्चनं । कृतं
धर्मनाशमंतिसंततीपुत्रपौत्रिकी । अमायुक्तैव सा ग्राह्या प्रतिपत्तु ममार्चने । अन्यथा
रणलाव द्राज्यभंगः प्रजायतइ त्यिस्मादीनी प्राचीने लिखितानि । यानि तु पुत्रकर्तृमात्रा
कर्तव्या द्वितीयादिगुणान्विता । तथा नरसिंहं कलया युक्ता प्रतिपच्चंडिकार्चने । उदये द्विमु
हूर्त्तापि ग्राह्या सोदयकारिणी इति । तानि त्रिमुहूर्त्तविधमेव स्तुवंति । यत्तु वदंति यद्विमु
हूर्त्तवचसां द्विमुहूर्त्तेस्तावकर्तृत्वं । न तु मुहूर्त्तवचस स्त्रिमुहूर्त्तस्येति तन्न । प्रमाणाभावात् ॥
द्विमुहूर्त्तापिस्य पित्रोऽस्य यलेनापि वेदांतरंगत्वाइत्यत्रैव द्विमुहूर्त्तादेस्तात्पर्यतासयभाव
स्य निर्णयात्मात् किंवेश्वानराधिकरणो शाकपालादिकास्कृतिर्नव कपालस्यैव नद्वाद
शाकपालस्येतियुक्तिमत्वात् । सदा तु पूर्वेद्युनेष्टुद्वा तदा पूर्वैव तिथिसंदिग्धा । अत्रोपवासा
युक्तं न विष्यो । एवं च विंध्यवासिन्यां नवरात्रोपवासतः । एकभक्तेन नक्तेन तथैवायाचि
तेन वा पूजनीया जनैर्देवी स्थाने स्थाने पुरे पुरे । स्नातैः प्रमुदितैः हृष्टैः ब्राह्मणैः क्षत्रियै
र्नृपैः वैश्यैः शूद्रैर्भक्तियुक्तैर्म्लेच्छैरन्यैश्च मानवैरिति । अत्र रात्रिग्रहणं तिथिपरः अ
तएवाहुः । तिथिवृद्धौ तिथिह्रासे वा रात्रेयथार्थकं अष्टरात्रे न दोषायं नवरात्रेति
थिक्षयात् । अत्र त्रयू त्रिंजेव प्रधानमुपवासादिसंगसिति । हेमाद्र्यादि निबंधे स्थितं
तथा रुद्रयामले । स्नानं मांगलिकं कृत्वा ततो देवीं प्रपूजयेत् । शुभ्राभिर्मृत्तिकाभिश्च पू
र्वे कृत्वा तु वेदिकां । यवानेवापयेत्तत्र गोधूमैश्चापि संयुतान् । तत्र संस्थापयेत्कुंभं विधि

नामंत्रपूर्वकं॥सौवर्णेराजतंवापिनाम्नामन्मयजंतुवेति॥पूजामंत्रस्तु॥जयंतीमंगला
कालीभद्रकालीकपालिनी॥दुर्गाक्षमाशिवाधात्रीस्वाहास्वधानमोस्तुते॥इति॥अत्र विशे
षोदुर्गोत्सवोप्रतिपद्याश्विनेमासिभवेवेधवर्जिते॥चित्रयोगःअत्रपादोपरिसज्यप्रारंभे
नवरात्रकमिति॥कात्यायनोक्तः॥भविष्ये॥चित्रावैधृतिसंयुक्ता प्रतिपच्चेद्भवेन्नृप॥त्याज्या
[illegible]स्त्रयस्त्वाद्यास्तुरीयांशेतुपूजनमिति॥तथामात्स्ये॥नरात्रेस्थापनंकार्यंनचकुंभा
भिषेचनमिति॥तथारुद्रयामले॥एकोत्तराभिवृद्ध्यातुनवमीयावदेवहि॥चंडीपाठंजपेच्चै
वजापयेद्वाविधानतइति॥अत्रनवरपारायणं॥कुमारीपूजादिनिबंधांतरेदृष्टव्यं॥इति
नवरात्रेप्रतिपन्निर्णयः॥आश्विनशुक्लपंचम्यां॥उपांगललितावृतं॥महाराष्ट्रेषुप्रसिद्धं॥
तत्रपंचमीमध्यान्हव्यापिनीग्राह्या॥पूजाव्रतेषुसर्वेषुमध्यान्हव्यापिनीतिथिरितिस्मरणात्॥
दिनद्वयेतत्सत्वेऽसत्वेवापूर्वासामान्यनिर्णयात्॥आश्विनशुक्लपक्षेमूलनक्षत्रेपुस्तकस्था
पनमुक्तं देवीपुराणे॥मूलेपुस्थापनंदेव्याःपूर्वाषाढासुपूजनं॥उत्तरासुबलिंदद्यात्श्रव
णेन विसर्जयेदिति॥अत्र विशेषोरुद्रयामले॥[illegible]नाध्यापयेन्नैवलिखेन्नाधीयीतकदाच
न॥पुस्तकेस्थापितेदेवीविद्याकामोद्विजोत्तमइति॥अत्रमुहूर्ताष्टमीसप्तमीवर्जनप्रयो
जिकाप्यथमहाष्टमी॥सापरा॥हारन्महाष्टमीपूजानवमीसंयुतासदा॥सप्तमीसंयुतानित्यं
शोकसंतापकारिणी॥संग्रहोक्तेः॥अत्रत्रिमुहूर्ताष्टमी॥सप्तमीवर्जनप्रयोजिका॥नतुततो
न्यूनायत्तुस्मृतिसमुच्चये॥सप्तमीस्वल्पसंयुक्तावर्जनीयासदाष्टमी॥स्तोकापिसामहापु
ण्यायस्यांसूर्योदयोभवेदिति॥तदप्यवयवद्वारात्रिमुहूर्तस्तोकेति॥यदातुमुहूर्तत्रयान्न्यूना
ष्टमीतदासप्तमीयुतापिपूर्वैव॥तथाचमदनरत्नेवचनं॥महाष्टम्याश्विनेमासिशुक्लाक
ल्याणकारिणी॥सप्तम्यापियुताकार्यापूजनेतुविशेषतइति॥परातुश्रीसूर्योदयव्याप्टम्य

मावस्यहापूर्वेति तिलसंदिग्धमे वा ॥ अत्र विशेषः कालिकापुराणे ॥ सप्तम्यां पत्रिकापूजाष्ट
ष्टम्यां चाप्युपोषणं ॥ पूजा च जागरश्चैव नवम्यां विधिवद्बलिरिति ॥ पुत्रवतस्तूपवासः
उपवासो महाष्टम्यां पुत्रवान्न समाचरेत् ॥ तन्त्रे चोक्तं ॥ अथात्र राज्ञां लोहाभिसारिकं कर्म
कार्यं ॥ यच्च यथा भविष्ये ॥ मागुरुकुंकुमवर्णो देवोपताकाभिरलंकृतं ॥ मंडपं कारयेद्दिव्यं नवसप्त
वं पदं ॥ अग्नेयां कारयेत्कुंडं हस्तमात्रं सुशोभितं ॥ मेखलात्रयसंयुक्तं योन्याश्वत्थदलाभय
राजचिन्हानि सर्वाणि ॥ शस्त्राण्यस्त्राणि यानि च ॥ आनीय मंडपे तानि सर्वाण्यत्राधिवास
येत्ततस्तु ब्राह्मणः स्नातः शुक्लांबरधरः शुचिः ॥ ॐकारपूर्वकैर्मंत्रैः स्वलिंगैर्जुहुयाद्घृतं
आहुत्या स्वमंत्रेण होतव्यं पायसं घृतसंयुतं ॥ कृतत्रोषं तुरंगाणां राजा नमुपहारयेत् ॥ लोहाभि
सारिकं कर्म तेन तत्र ऋषिभिः स्मृतं ॥ घृतपायसयतानश्वावाजान्समलंतान्नात्वाम्येन्नगु
रे नित्यं नंदीघोषपुरःसरान् ॥ सहैन्नृपतिः स्नातः संपूज्यपितृदेवतां ॥ पूजयेद्राजचिन्हानि
फलमाल्यविलेपनैः ॥ कृतत्रोषं प्रदाल्यमेपिनाथनिकेगजंतस्याभिसरणाद्वाजे विजयः
समुदाहृतः पूजामंत्रान्प्रवक्ष्यामि पुराणोक्तान्नृहं तवे ॥ येः पूजिताः प्रयच्छंति कीर्तिमायुर्य
शोबलमिति ॥ तत्र छत्रस्य पूजायां मंत्राः ॥ यथाचंद्रश्छादयति त्रिवामेमां वसुंधरां ॥ तथाच्छादय
राजानं विजयारोग्यवृद्धये ॥ चामरस्यापि मंत्राः ॥ शशांककरसंकाशं क्षीरडीडीरपांडुरा ॥ प्रोत्सारयाशु
दुरितं चामरामरदुर्लभा ॥ अश्वस्यागंधर्वकुलजातस्त्वं माभूयाः कुलदूषकः ब्राह्मणः सत्यवाक्ये
न सोमस्य वरुणस्य च ॥ प्रभावाच्च हुताशस्य वर्द्धय त्वं तुरंगमान् ॥ तेजसा चैव सूर्यस्य मुनी
नां तपसा तथा ॥ रुद्रस्य ब्रह्मचर्येण पवनस्य बलेन च ॥ स्मर त्वं राजपुत्रस्य कौस्तुभं च मणिं
स्मर ॥ यां गतिं ब्रह्महा गच्छेन्मातृहा पितृहा तथा ॥ भूमिहानृतवादी च क्षत्रियश्च पराङ्मु
खः ॥ सूर्यचंद्रमसौ वायुर्यावत्पश्यंति दुष्कृतं ॥ व्रज त्वं तां गतिं क्षिप्रं तच्चैव पापं भवेत्तव ॥ विक्र

तिंयह्निगच्छेलाः पुच्छाध्वनितुरंगमा॥ रिपुविजियसमरे सहस्रंत्री सुखीभव॥ ध्वजस्याग्रेकि
केतो महावीर्य श्यामवर्णार्चयाम्यहं॥ यात्रेराजनमस्तेस्तु तथा नारायणध्वजा॥ क्रूपपेपेघ्न
रणभ्रातर्वाणरे विष्णुवाहना॥ अप्रमेय उराधर्षरणे देवारिसूदन॥ गरुत्मन्मारुतगति स्त्वयि
सन्निहितोयतः॥ सामरेयस्य सुधान्नरक्षस्त्वं च रिपून्दह॥ मानकर्णाः कृतभुजः सर्वोरुद्राः वासुः सो
मो महर्षयः नागकिंनरगंधर्वयक्षभूतगणाः ग्रहा॥ प्रथमस्कंधे हरेरोर्भे तेज्ञाः मातृभिः सह
शक्रः सेनापतिः स्कंदो वरुणश्चाश्रिवतस्त्वयि॥ प्रदहंतु रिपून्सर्वान् राजा विजयमृच्छतु॥ यानि प्र
युक्तान्यरिभिर्भूषणानि समंततः पतंतु परि रीन्वाग्रेण हतानि तव तेजसा॥ हिरण्यकशिपोर्युद्धे
युद्धे देवासुरे तथा॥ कालनेमिवधे यद्वद्यद्वत्रीपुरघातने॥ शोभितासि तथैवाद्य शोभयास्मांश्च
संस्मर॥ नीलान्स्वेतानिमान्दृष्ट्वा नश्यंत्वाशु नृपारयः॥ व्याधिभिर्विविधैर्घोरैः शस्त्रैश्च यु
धिनिर्जिताः॥ सद्यः स्वस्थाम्वं वैलस्मा त्वद्धालेनोपमार्जिताः॥ पूतनारेवती लाम्ना कालरा
हं त्रिश्च याः स्मृता॥ दहंत्वाशु रिपून्सर्वान् पताके त्वमपाविता॥ गजस्य कुमुदैरावणाप
द्मः पुष्पदंतोथ वामनः॥ सुप्रतीकोंजनो नीलएते ह्यष्टौ देवयोनयः॥ तेषां पुत्राश्च पौत्राश्च व
नान्यष्टौ समाश्रिता॥ भद्रो मंद्रो गतश्चैव राजा संकीर्ण एव च॥ वने वने प्रसूतास्ते स्मर
योनिमहागजाः॥ पातु त्वां वसवो रुद्राः आदित्यास मरुद्गणा॥ भर्त्तारं रक्ष नागेंद्र स्वामि
वत्प्रतिपाल्यतां॥ आभुवन विजयं युद्धे गमने स्वस्तिनो श्रीतो ज श्रीस्ते सोमाद्वलिं
विस्मोस्तेजः सूर्यात्जवो निलात॥ स्थैर्यं मेरोर्जयो रुद्रा घशो देवात्पुरंदरात्॥ युद्धे रक्षं
तु नागास्त्वां दिशाश्च सह दैवतैः॥ अश्विनौ सह गंधर्वैः पातु त्वां सर्वतः सदा॥ वर्मणः॥ म्रा
मंप्रदस्त्वं समरे वर्म सर्वायसो हृदि॥ रक्ष मां रक्षणीयोहं नहं तव्योनमोस्तुते॥ खड्गस्यं॥
अग्निर्विन्नासनः खड्गस्तीक्ष्णधारो दुरासदः॥ श्रीगर्भो विजयश्चैव धर्मधारस्तथैव च॥

६२

एतानि तस्य नामानि स्वयमुक्तानि वेधसा॥ नक्षत्रं कृत्तिका नेतुर्गुरुर्देवो महेश्वरः॥ रो-
हिण्यश्वत्थारी वैरं तैर्देवसं च जनार्दनः॥ पिता पितामहो देवस्त्वं मां पालय सर्वदा॥ नील-
जीमूतसंकाशस्तीक्ष्णदंष्ट्रः सुरोत्तमः॥ भावशुद्धो मर्षणश्च प्रतिष्ठेजाः स्थैर्येव च दुर्य-
येन धृता क्षोणी हतश्च महिषासुरः॥ तीक्ष्णधाराय शुद्धाय तस्मै खड्गाय ते नमः॥ छुरीकायाः॥
सर्वायुधानां प्रथमे निर्मितासि पिनाकिना॥ शूलायुधाद्विनिष्कृष्य कृत्वा मुष्टिग्रहं शुभं॥
चंडिकायाः प्रदत्तासि सर्वदुष्टनिवर्हणी॥ तया विस्तारिता चासि देवानां प्रतिपादिता॥ सर्व-
सत्त्वांगभूतासि सर्वाशुभनिवर्हणी॥ क्षुरिके रक्ष मां नित्यं शांतिं यच्छ नमोस्तु ते॥ कटारकस्य॥
रक्षांगानि गजान्नरक्षत्र सर्वाजिनि धापयेत्॥ ममेदं सदा रक्ष कटारक नमोस्तु ते॥ धनुषः॥ सर्व-
युध महामात्र सर्वायुधनिषूदन॥ त्रिविक्रम सिपसेन्यानां तथा विजयवर्द्धन॥ त्वापमां समरे रक्ष स-
कंटारव वैरिहा॥ धृतं कृष्णेन रक्षार्थं संहाराय हरेण च॥ त्रयी मूर्त्तिंगतं देव धनु-
स्ते नमाम्यहं॥ कुंतस्य॥ कुंत पातय शत्रून् त्वं मनयो नाकमापय॥ हरहाणजीवितं नेपां
मम सैन्यं च रक्षयतो॥ चर्मणः॥ चर्म प्रदत्तं समरे चर्म सैन्ये यशो ध्यमे॥ रक्ष मां रक्षणी-
यो हं तायनेय नमोस्तु ते॥ कनकदंडस्य॥ प्रोत्सारणाय दुष्टानां साधूनां रक्षणाय च॥
ब्रह्मणा निर्मितश्चासि व्यवहारप्रसिद्धये॥ यशो देहि सुखं देहि जयदो भव भूपतेः॥ ता-
डयस्व रिपून् सर्वान् हेमदंड नमोस्तु ते॥ दुंदुभेः॥ दुंदुभे त्वं सपत्नानां घोरो हृदयकंपनो
सुद्धावहा॥ यथा जीमूतघोषेण स्त्रीणां त्रासो निसमतः शांतिप्रदो भव॥ सिंहासनस्य॥
विजयो जयदाजेता रिपुघाति शुभंकरः॥ दुःखहा धर्मदः शांतः सर्वारिष्टविना-
शनः॥ एते हि संनिधौ यस्मात्तव सिंहा महाबलाः॥ तेन सिंहासने तितं वेदमंत्रै-
श्च मीयते॥ त्वयि स्थितः शिवः शांतः स्वयं शक्रः सुरेश्वरः॥ सावित्त्वयि स्थितो॥

123

हरिर्देव स्वरथं तथ ते तपः॥ नमस्ते सर्वतोभद्र भद्रदो भव भूपतेः त्रैलोक्यज
यसर्वस्व सिंहासन नमोस्तु ते॥ अनयैव कर्मविन्यासानि पूज्यानि शिल्पिभिः॥
लोहाभिसारिकं कर्म कृत्वैवं मंत्रपूर्वकमिति॥ एवं कृत्वा तथाष्टम्यां पूर्वाह्णे स्नान
माचरेत्॥ ततः कुंकुमचंदनादिभिः र्बल्युपहारैश्च देवीं पूजयेत्॥ ततः खड्गं नमस्कुर्या
च्छत्रूणां वधसिद्ध्यर्थमुद्धृत विजयैराज्यं सुभिक्षं चात्मने नृपः पुनः पुनः प्रणम्यार्थं संस्म
रन्हृदये मम घातयेन्महिषानेषानघ्नतो नतकंधरान्॥ ज्ञातमद्य मतेवापीतरथं वा यथे
च्छया सुरासर्वमतैः कुंभैः स्तर्पयस्व रमेश्वरी॥ कापालिकेभ्यः स्तद्देयं जलडिंडीपरैस्तकैः॥
कस्थित्क्रोधयोषितो धीरो विधृतोन्येन खड्गवान्॥ तेभ्यस्तु बलिं दद्यान्मंत्रेणानेन सामिषं
सरक्तं सजलं चान्नं गंधपुष्पाक्षतैर्युतं॥ त्रीस्त्रीन्वारानुसमृक्षेन दिग्विदिक्षु किरेद्बलिं त
त्र मंत्रः॥ बलिं गृण्हंतु मे देवा आदित्या वसवस्तथा॥ मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा
ग्रहाः॥ असुरा यातुधानाश्च पिशाचोरगराक्षसाः॥ डाकिन्यो यक्षवेतालाः योगिन्यः पूतनाः शिवाः॥
जंभकाः सिद्धगंधर्वा माला विद्याधरा नगाः॥ दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः॥
जगतां शांतिकर्त्तारो ब्रह्माद्याश्च महर्षयः॥ मा विघ्नं मा च मे पापं मा संतु परिपंथिनः॥ सौम्या
भवंतु तृप्तिश्च भूतप्रेताः सुखावहा इति॥ महानवम्यां संपुष्टाः कृत्वा दुर्गामहोत्सवं॥ ते सर्वे
पापनिर्मुक्ताः यांति भागवतीं पुरीं॥ इत्येतत्ते समाख्यातं दुर्गार्चा महोत्सवं॥ पठतां शृण्व
तां वापि सर्वशुभवारणमिति॥ इति महाष्टमी॥ आश्विनशुक्लनवमी॥ महानवमी॥ दुर्गापू
जासु नवमी मूलनक्षत्रयान्विता॥ महती कीर्तिता तस्यां दुर्गा महिषमर्दिनीमिति॥ हृद्दौ
ले: अत्रैव दुर्गापूजनं लैंगात्॥ सा पूर्वविद्धा श्रावणी दुर्गनवमी दुर्गा चैव हुताशिनी॥ पूर्व
विद्धैव कर्त्तव्या शिवरात्रिर्बलेर्दिनमिति ब्रह्मोक्तेः॥ अत्रैव दुर्गापूजनं होमबलिद

६२

125

नादि कार्यमिति। राजमार्तण्डे। नवम्यां च जपं होमं समाप्य विधिवद्बलिमिति। केचित्तु प्र
हम्यामारभ्य नवम्यां समापयंति। तत्र मूलं शिष्टाचार एव। अत्र होमे विनियोगो रुद्रयामले
प्रधानं देवमुद्दिश्य पायसान्नं तिलास्तथा। किंशुकैः सर्षपै राजार्द्धिदूर्वांकुरैरपि। एवं वा
श्रीफलैर्दिव्यैर्नानाविधफलैरपि। रक्तचंदनखंडैश्च गुग्गुलैश्च मनोहरैः। प्रतिश्लोकं च
जुहुयात् सर्वद्रव्याणि चाक्रमात्तु इति। तिलाश्च हविष्युक्ताः। पायसं सर्पिषा युक्तं तिलैश्च यु
रिति डामरतंत्रात्। अथ पारणानिर्णयः। अत्र केचित् प्रारंभो नवरात्रस्य स्याद्दोनवरात्रप
दस्य कर्मपरत्वान्नवम्यां पारणं कार्या। अष्टम्यां जागरं कार्यं नवम्यां पारणे तथेति रुद्रया
मलात्। तथा। नवम्यां पालिता देवी कुलवृद्धिं प्रयच्छति। दशम्यां पालिता देवी कुलना
शं करोतीत्युक्तेः। इति। इत्याहुः। अन्ये तु दशम्यां पारणं कार्यं। एवं च विंध्यवासिन्यो नव
रात्रोपवासतत्परेति। नवरात्रसमाप्त्यावलात्रव तिथीनामुपोष्यतावगमादित्यापु
तत्र देशाचारतः कुलपरंपरतो वा व्यवस्था दृश्यते मुभयथापि शिष्टाचारात्। सूतके
पि च पारणं कार्यं। सूतके पारणं कार्यं नवम्यां होमपूर्वकमिति रुद्रयामलात्। एवं स्त्रीर
(margin: या) जोदर्शनमध्ये एवं सविधवास्त्रिया पारणं कार्यं। प्रारंभे तु दीर्घतपसां नारीणां यदि रजो
भवेत् तदा। न तत्रापि व्रतस्य स्यादुपरोधः कथंचनेति सत्यव्रतोक्तेः। विधवया तु पंचमेह्
नि कार्यं। यद्यपि विधवाया रजोदर्शनमध्ये त्रिरात्रे भोजननिषेधो निर्मूलस्य मूलत्वे पि
परागताख्या। स विषयस्तथापि नियमस्थाः सदा नारी संपश्येद्यदि तदा रजः उपोष्येव तु ना
रात्रिः स्नात्वा पंचमे दिवसे तत्र स्यं गिरेव च सस्तथाचारानुसारात् विधवापरत्वमप्युपपं
(margin: विजयादश) द्यते इति पारणानिर्णयः। आश्विनशुक्लनवमी मन्वादिः। तथाश्विनशुक्लदशमी। विज
(margin: मी शास्त्रार्थः) याद्दशमी स्मृता। सा च दशमी पूर्वाह्ने नक्षत्रोदयव्यापिनी ग्राह्या। उपसंध्यात्र

तारका। विजयो नाम कालोयं सर्वकार्यार्थसाधकः इति रत्नकोशात्। दिनद्वये तत्र सत्त्वे
पूर्वा। तदुक्तं स्कांदे। या पूर्णा नवमीयुक्ता तस्यां पूज्याऽपराजिता। क्षेमार्थं विजयार्थं च पू
र्वोक्तविधिना नरैः। नवमीशेषयुक्तायां दशम्यामपराजिता। ददाति विजयं देवी पूजिता जो
पवर्द्धिनी॥ तथा॥ आश्विने शुक्लपक्षे तु दशम्यां इति। एकादश्यां न कुर्वीत पूजनं चापराजित
इति। श्रवणे तु एकादश्यां मुहूर्त्तोपि विजयः परिकीर्त्तितः। तत्र सर्वं विधातव्यं छायापि वि
जयकांक्षिभिरिति। नरगुरूक्तो। यदा तु परदिने अल्पापि श्रवणयुक्ता तदापि यात्रायां परैव
उदये दशमी किंचित्संपूर्णैकादशी यदि। श्रवणर्क्षं यदा काले सा तिथिर्विजयाभिधा। श्र
वणर्क्षे तु पूर्णायां काकुत्स्थः प्रस्थितो यतः। उल्लंघयेयुः सीमानं तद्दिनर्क्षे ततो नरा इति।
कश्यपोक्तेः। अत्र विशेषो भविष्ये। शमीयुक्तं नगं गत्वाथ भक्तानामपर्यंकशः। अर्च्चयेत् पि
शमी वृक्षमर्च्चयेच्च पुनः पुनः। शमीमंत्रस्तु गोपथब्राह्मणे। अमंगलानां शमनीं शम
नीं दुष्कृतस्य च। दुःस्वप्ननाशनीं धन्यां प्रपद्येहं शमीं शुभां। तथा भविष्ये। शमी सलक्ष्म
णोपेता मी रामानाम्ना प्रतिष्ठिता। संप्रार्थ्यतां च संपूज्य त्विशानीं संमुखो भवेत्। शमी श
मयते पापं शमी लोहितकंटका। धारिण्यर्जुनबाणानां रामस्य प्रियवादिनी। करिष्यमाण
यात्रायां यथाकालं सुखं मया। तत्र निर्विघ्नकर्त्री त्वं भव श्रीरामपूजिते। गृहीत्वा साक्षत
मार्द्रां शमीमूलगतां मृदं। गीतवादित्रनिर्घोषैरानयेत्स्वगृहं प्रति। ततो भूषणवस्त्रादि
धारयेत्स्वजनैः सह इति। इति विजयादशमी॥ आश्विनस्य कृष्णद्वादश्यां रकव्रतं संकल्पयेत्
अथाश्विनपौर्णमास्यां विशेष उक्तः तिथितत्त्वे लैंगे। आश्विने पौर्णमास्यां तु चरेज्जागरणं
निशि। कौमुदी सा समाख्याता कार्या लोकविभूतये। कौमुद्यां पूजयेल्लक्ष्मीमिंद्रमैरावत
स्थितं सुगंधिर्निशि सद्वेव अक्षैर्जागरणं चरेत्। तथा। निशीथे वरदा लक्ष्मीः कोजाग

स्या

दीति भाग्यर्णी॥ तस्मै वित्तं प्रयच्छामि अस्रोः क्रीडां करोति या॥ नारिकेलैश्च पिरकैः पित
न्हैवानुसमर्चयेत्। तेन स्वयं नरहत्यानोपभवेदिति॥ मस्तनरले नारिकेलोदकं पीत्वा अक्षैर्जाग
रणं निर्मोसादि॥ अत्रैवाश्वयुजीकर्माश्वलायनोक्तं कार्यं॥ तत्र पूर्वाण्हव्यापिनी पूर्णिमा
ग्राह्या दैविककर्मत्वात्॥ अत्रैव चवदानविशेषो विष्णुधर्मोत्तरे॥ आश्वयुज्यां कांस्यपात्रे घृ
तपूर्णं द्विजातये। ससुवर्णं तथा दत्वा दीप्तौजाः स्विह जायते इति॥ इति श्रीसामंतमहाराजा
धिराजश्रीजसवंतसिंहप्रेरिताग्निहोत्री भास्करकृते जसवंतभास्करे आश्विनमासप्रका
शः॥ अथ कार्तिकः॥ तत्र विशेषो विष्णुरहस्ये॥ मारभ्यैकादशीं शुक्लामाश्विनस्य तु मानवः
प्रातःस्नानं प्रकुर्वीत यावत्तु कार्तिके भास्कर इति॥ तथा विष्णुस्मृतौ॥ कार्तिकं सकलं मासं
नित्यस्नायी जितेंद्रियः जपन्हविष्यभुक् सर्वपापैः प्रमुच्यते॥ दक्षिणास्या वारोपणे वै तुला
मकरमेषस्थिते॥ सौरमासोपि ग्राह्य उक्तः॥ तत्रैव च प्राच्याः स्नाति॥ अत्र कार्तिकस्तु पंचनदे स्ना
नमिति प्रशस्तं॥ त्रातं समाप्य स्तयस्तएवा कृतेयस्याप्यनेफध्यं॥ तत्कार्तिके पंचनदे सकृत्स्ना
नेन लभ्यते तुल्यादिकार्तिके स्नात॥ तथा तत्रैव॥ कार्तिके मासि मेयात्रायैः कृता भक्तिनरैः
बिंदुतीर्थे कृतस्नानैस्तेषां मुक्तिर्नदूरत इति॥ स्नानमंत्रस्तत्रैव॥ कार्तिकेहं करिष्यामि प्रात
स्नानं जनार्दन। प्रीत्यर्थं तव देवेश दामोदर मया सह॥ इमं मंत्रं समुच्चार्य मौनी स्नायाद्व्रती
नर इति॥ अर्घ्यमंत्रोपि॥ व्रतीनः कार्तिके विधिवन्मम॥ दामोदर गृहाणार्घ्यं
दनुजेंद्रनिषूदन॥ स्नाननैमित्तिके कृत्वा कार्तिके पापशोधनी॥ गृहाणार्घ्यं मया दत्तं
राधया सहितो मम भवानिति॥ अत्राद्यसंज्ञाने पृथ्वीदान फलं भवतीस्यत्र दृष्ट्यं॥ तथा
पाद्मे॥ कार्तिके नार्चितो येस्तु कमले कमलेक्षणः॥ जन्मकोटिषु विप्रेंद्र न तेषां कमला गृहे॥
तथा तुलसीदललक्षेण कार्तिके योर्चयेद्धरिं॥ पत्रे पत्रे मुनिश्रेष्ठ लभते मौक्तिकं फलमिति

तथा स्कांदे ॥ कार्त्तिके मासि विप्रेंद्र धात्रीवृक्षोपशोभिते ॥ वने दामोदरं विष्णुं चित्रान्नै
स्तोषयेद्द्विज ॥ मूलेन पायसेनाथ होमं कुर्याद्द्विजोत्तम ॥ ब्राह्मणान्भोजयेच्छक्त्या स्वयं
भुंजीत सबंधुभिरिति ॥ तथा धात्रीच्छायेत तः कुर्यात्पिंडदानं महामुने ॥ मुक्तिं प्रयांतु पि
तरः प्रसादान्माधवस्य त्विति ॥ धात्रीफलविलिप्तांगो धात्रीफलविभूषितः ॥ धात्रीफलकृ
ताहारो नरो नारायणो भवेदिति ॥ अथ कार्त्तिकव्रतानि ॥ नारदीये ॥ कार्त्तिके कृच्छ्र
सेवी यः प्राजापत्यपरोथवा ॥ एकांतरोपवासी वा त्रिरात्रोपोषितोथवा ॥ षड्द्वादशम
पक्षं वा मासं वा चरवर्णिनि ॥ एकभक्तेन नक्तेन तथैवायाचितेन च ॥ उपवासेन
चैकेन लभते परमं पदमिति ॥ भारते ॥ कार्त्तिकीं मुनिभुंजीय ॥ सोऽश्नास्यमन्तमेव छि
सघंटां सतिलां भोनीं सहिरण्यां प्रदापयेत् ॥ कार्त्तिके लवणं सक्तून्येन यद्वलवतां सदा
स्त्रकाः सर्वे रसास्तेन तस्यागी गांप्रदापयेत् ॥ इमं कार्त्तिके कुर्वीत नूनं भवं संस्पृशेद्वृती
पर्यंकमृष पर्व ईश्या सतूलं सोपसाधनमिति ॥ तथा कारी खंडोद्भुर्जे पवान्नमश्नीया
नूदेवान्नमथवा पुनः ॥ हृत्वा कंसारणान्वेव भुक्तिं श्रीश्वर्त्तये दिति ॥ तथा नारदीये का
र्त्तिके वर्जयेत्तैलं कार्त्तिके वर्जयेन्मधु ॥ कार्त्तिके वर्जयेत्कांस्यं कार्त्तिके शुक्तसंधितं ॥ शु
क्तं निष्ठुरवाक्यमिति केचित् ॥ पर्युषितं मिरयन्ये यद्वा ॥ मनम्लृद्रा कालवङ्गाद्भ्यांतर
संयोगाद्यम्लतां गतं तच्छुक्तमिति तुच्छुक्तानि चैव सर्वाणीइति ॥ मनुस्मृतिमुपादाय ना
रायणोव्याख्यात ॥ श्राद्धकांडे हेमाद्रिण्येवं तथा ॥ अप्रतेन क्षिपेद्यस्तु मासं दामोदर
प्रियं ॥ तिर्यग्योनिमवाप्नोति नात्र कार्या विचारणेति ॥ भारते ॥ वत्सुष्टप्यिंच मासेषु न मास
र्ज्जं प्रतेयद्यि ॥ नरोऽर्ज्जव्रती नाम भाव्यमप्यत्र फलमिच्छतेति ॥ अथ कार्त्तिकदानानि
वामनपुराणे ॥ रजतं कनकं दीपान्मणिमुक्ताफलादिकं ॥ दामोदरस्य प्रीत्यर्थं प्रदद्यात्कार्त्ति

केनरः इति॥ नारदीयेपि॥ कार्तिके विष्णुमुद्दिश्य दीपदानादिकं ते दिनात्। तथा पुष्करपुरा-
णे॥ तुलायां तिलतैलेन सायंकाले समागते। आकाशदीपं यो दद्यान्मासमेकं हरिं प्रति। म-
हतीं श्रियमाप्नोति रूपसौभाग्यसंपदमिति। तन्मंत्रस्तत्रैव। दामोदराय नभसि तुलायां लो-
लया सह। प्रदीपं ते प्रयच्छामि नमोऽनंताय वेधसे। तत्रैव तुलायां तिलतैले सायंकाले समा-
गते। आकाशदीपं यो दद्यात्। अत्र विशेषो हेमाद्रिनिबंधे। दिवाकरेऽस्ताचलमौलिभूते ग-
हाद्दूरे इति रेव पुरुषप्रमाणं। यूपाकृतिं यज्ञियवृक्षदारुमारोप्य भूमावथ तस्य मूर्ध्नि कृत्वा
व तत्राष्टदलाकृतिस्तु यामिमं वदेद्दिशानुसारेण॥ तत्कर्णिकायां तु महाप्रकाशो दीपः
य प्रदेयोऽष्टदलगास्तथाष्टौ। निवेदयेद्धर्महराय भूम्यै दामोदरायाप्यथ धर्मराजे। प्रजापतिभ्यः
स्त्वथ सपितृभ्यः प्रेतेभ्य एवाथ तमस्स्थितेभ्य इति। अत्र तुलासंक्रमणस्य विषुवत्वात्संक्रमु-
हूर्त्ते पुण्यतमो। तत्र स्नानं विश्वामित्र आह। तुलाप्रवेशे तिलानां गोरसानामपि इष्टं श्र-
स्नलिभ्य॥ तत्र कार्तिककृष्णपंचम्यां पुत्रकामः श्राद्धं कुर्यादिति। विज्ञानस्वनिर्णये बोधाय-
कार्तिककृष्णाष्टम्यां विशेषमाह पद्मे। वृंदावनाधिपसंचरंस्तं स्मात् प्रतुष्यता। कृष्णेनात्र का-
कुंडराधाख्यं वनेवने। तत्कुंडे कार्तिकाष्टम्यां स्नात्वा पूज्यो जनार्दनः। सर्वोऽधिन्यां यथा प्र-
नस्तथा प्रीतिरस्त्वेष भवेदिति। आदेवाहो इति। चित्तं मध्ये दंशोप सिध्यत्मिंत्रोदय आपि त्वं
कार्या कथा यांतश्चैवोक्तः। अथ कार्तिककृष्णद्वादशी। गोवत्सद्वादशी सा पूर्वविद्धा-
ज्ञा वत्सं चैव कर्तव्या प्रथमेहनीतिस्मरणात्। तत्र कृत्यमाह विष्णुः सवत्सां तुल्यवर्णां
वत्सोहिनीं गां पयस्विनीं। चंदनादिभिरापिष्य पुष्पमाभिरर्चयेत्। तद्दिने तैलपक्वं च
स्थालीपक्वं युधिष्ठिर। गोक्षीरं गोघृतं चैव दधि तक्रं च वर्जयेदिति। अथ दीपावली
ज्योतिर्निबंधे नारदः। कार्तिके कृष्णपक्षे तु त्रयोदश्यादि पंचसु। तिथिषूक्तः पूर्व

रात्रेन्तु यामिनीराजनाविधिः। नीराजयेयुर्देवांश्च विप्रान् गांश्च तुरंगमान्। ज्येष्ठान्श्रेष्ठानू कनिष्ठांश्च मातृमुख्याश्च योषितः। स्कांदे। कार्त्तिकस्यासितेपक्षे त्रयोदश्यां निशामुखे। यमदीपं बहिर्दद्यादपमृत्युर्विनश्यति। तत्र मंत्रः। मृत्युना पाशहस्तेन कालेन भार्यया सह। त्रयोदश्यां दीपदानात्सूर्यजः प्रीयतां ममेति। कार्त्तिककृष्णचतुर्दशी नरकचतुर्दशी। उक्तं लिंगे। विशेषात्तु कार्त्तिके कृष्णपक्षे तु चतुर्दश्यां दिनोदये। अवश्यमेव कर्त्तव्यं स्नानं नरकभीरुभिरिति। यत्तु आले। अश्वयुक्कृष्णपक्षे तु चतुर्दश्यां विधूदये। तिलतैलेन कर्त्तव्यं स्नानं नरकभीरुभिरिति। तत्तु कृष्णपक्षादिमासमभिप्रेत्य वाक्यतात्। दिनद्वये चंद्रोदये चतुर्दशीसत्त्वे पूर्वदिन एव स्नानं। तदुक्तं पूर्वविद्धा चतुर्दश्या कार्त्तिकस्य सितेतरे। पक्षे प्रत्यूषसमये स्नानं कुर्यात्प्रयत्नतः इति। दिनद्वये तत्रामस्ये चतुर्दश्यां रात्रिचतुर्थयामे स्नानं। तथा कृष्णचतुर्दश्यामाश्विने कार्त्तिकेऽपि वा। यामिन्याः पश्चिमे यामे तैलाभ्यंगो विधीयत इति। सर्वज्ञनारायणोक्तेः। ज्योतिर्निबंधे नारदः। इषासितचतुर्दश्यामिंदुक्षयतिथावपि। ऊर्ज्जादौ स्वातिसंयुक्ते तदा दीपावली भवेत्। इति। अत्र विशेषः। पाद्मे। अपामार्गमथो तुंबीं प्रपुन्नाटमथापरं। भ्रामयेत्स्नानमध्ये तु नरकस्य क्षयाय वै। प्रयत्नाच्च क्रमशः। तत्र मंत्रः। सितालोष्टसमायुक्त सकंटकदलान्वित। हर पापमपामार्ग भ्राम्यमाणः पुनः पुनरिति। अत्रैव यमस्य तिलैस्तर्पणं कुर्यात् दीपोत्सवचतुर्दश्यां कार्यं तु यमतर्पणमिति। एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन्दद्याज्जलांजलीन् इति च मनुः। तर्पणनामानि। आहो। यमाय धर्मराजाय मृत्यवे चांतकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय च। औदुंबराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय वै नम इति। एतानि च प्रणवादिनमोंतानि वाक्यानि

७बी

द्वयेनैतेनाममंत्रैस्तु प्रयत्नतः॥ दिनमोनंतकेरिति रुद्रमनूक्तेः॥ जीवत्पितृकस्यापि जी
वत्पितापि कुर्वीत तर्पणं यमभीष्मयोरिति॥ पाद्मात्॥ तर्पणे विशेषो ऽत्रोक्तो मदनरत्ने(?) पर्वी
तिना कार्यः॥ प्राचीनावीतिनाथवेति॥ जीवन्मृतपितृकयोर्यथासंख्येनेतो विकल्पः॥
देवपितृतीर्थयोरप्येवमिति॥ तन्न॥ वाक्यत्रयोक्तयोर्याम्ये वत्सापितृत्वयोस्तीर्थोपसव्य
योर्व्यवस्थितत्वात्॥ तथा च हेमाद्रिनिबंधे॥ यमे पितृत्वादपसव्येन दक्षिणाभिमुखैः
स्तिलैः देववाद्देवतत्तीर्थेन यमं संतर्पयेद्बुधः॥ इति स्मृत्युक्तेः॥ अथात्र दीपदानमुक्तं स्कांदे
नः प्रदोषसमये दीपान् दद्यान्मनोरमान्॥ ब्रह्मविष्णुशिवादीनां भवनेषु मठेषु चेति
आलेपि॥ अमावास्याचतुर्दश्योः प्रदोषे दीपदानतः॥ यममार्गांधकारेभ्यो मुच्यते का
र्तिके नर इति॥ अथ दीपदानमंत्रः॥ तत्र पाद्मे॥ ब्रह्मा विष्णुमहेशानां त्यानरकछेदकारणः
दीपदानेन ते संतुष्टवरदाः सुखव हुर्निः॥ अन्यत्र च॥ चतुर्वर्तिप्रदीपोत्र नरकप्रीतये
मया॥ चतुर्दश्यां प्रदत्तो ऽयं तेन पापात्प्रमुच्यते॥ तथा॥ शुनकौ श्यामशबलौ भ्रातरौ य
मसेवकौ॥ तुष्टौ स्यातां चतुर्दश्यां दीपदानेन मृत्युजौ॥ इति नरकचतुर्दशी॥ अथ
कार्तिकामावास्या। सापि प्रातरभ्यंगं कुर्यात्॥ यदुक्तं दीपावलीप्रकरणे कल्पपसंस्थि
तायां॥ इंदुक्षयेपि संक्रांते रवौ पाते दिनक्षये॥ तत्राभ्यंगो न दोषाय प्रातः पापाप
नय इति॥ अत्र विशेषो भविष्ये॥ दिवा तत्र न भोक्तव्यमृते बालातुराज्जनात्॥ प्रदो
षसमये लक्ष्मीं पूजयित्वा यथाक्रमं॥ दीपरक्षास्तथा कार्याः श्रद्धया देवगेहेषु च॥ लक्ष्मी
प्रबोधनमंत्रस्तु पाद्मे॥ त्वं ज्योतिः श्रीरविश्चंद्रो विद्युत्सौवर्णतारकाः॥ सर्वेषां ज्यो
तिषां ज्योतिर्दीपज्योतिस्थिते नम इति॥ तथा॥ स्कंदात्तु पार्वणश्राद्धं दधिक्षीरघृ

131

ता दिभिः ॥ दीपान् दत्वा प्रदोषे तु लक्ष्मीं पूज्य यथाविधि ॥ अलंकृतेन भोक्तव्यं नववस्त्रो
पशोभने ति ॥ अत एव च ॥ अमा तत्र प्रदोषव्यापिनी ग्राह्या ॥ दिनद्वये तत्र सत्वे ऽसत्वे वा परा ॥
दैवैकरजनीयोगे दर्शः स्यात्तु परे ऽहनी ति वचनात् ॥ अथ कार्तिकशुक्लप्रतिपत्पूर्वविद्धा
कार्या ॥ पूर्वविद्धैव कर्तव्या त्रिवरात्रिर्बले दिनमिति पद्मात् ॥ अत एव माधवाचार्ये ऽस्तु
सर्वं च पूर्वैव क्षुद्र उपवासवदाचरे ति ॥ अत्रापवादो नित्यः ॥ बलिराज्ये तत्पत्ये वचे ति ॥ दैत्य
वसिष्ठोक्तेः ॥ वत्सु सवस्ताम विघ्याः तत्सेन सर्वमेव हि रात्रौ दैत्यपतेर्बलेः ॥ पूजां कुर्यो
न्नृपः साक्षाद् भूमौ मंडलके शुभे ॥ बलिमालिख्य रेखाभिर्वर्णकैः पंचरंगकैः ॥ गृहस्य म
ध्ये शालायां ॥ विशालायां ततो नृपैः ॥ लोकश्चापि गृहस्यांतः शय्यायां शुक्लतंडुलैः
संस्थाप्य बलिराजानं फलैः पुष्पैश्च पूजयेदिति ॥ पूजामंत्रस्तत्रैव ॥ बलिराज न
मस्तुभ्यं दैत्यदानववंदित ॥ इंद्रशत्रो ऽमराराते विष्णुसान्निध्यदो भव ॥ इति ॥ अत्रैव गो
वर्धनपूजा पुष्कराख्ये ॥ प्रातर्गोवर्धनः पूज्यो द्यूतं चापि समाचरेत् ॥ पूजनीयास्त
था गावः स्याज्ज्येष्ठो दोहनवाहने ति ॥ तत्र गोवर्धनपूजामंत्रः ॥ गोवर्धन धराधार गोकु
लत्राणकारक ॥ बहुबाहुकृतच्छाय गवां कोटिप्रदो भव ॥ इति ॥ स्यादेतत् ॥ द्यूतं ताव
च्छास्त्रप्रमाणं ॥ तन्मूलं प्रवृत्तमेतेरनुपलब्धापराहने मिति ॥ धर्मस्य हि मूल
त्वाद्ग्राह्यमनपेक्षत्वस्यादिति ॥ न च स्वतोक्तौ मूलभूता याः श्रुतेरनुमानमपि सं
भवति ॥ अक्षैर्मा दीव्य इति प्रत्यक्षश्रुतिविरुद्धत्वात् दिक्प्रमाणं तत्स्यहेतोः ॥ कालास्य
याप्रदिष्टत्वात् ॥ अत एव श्लोको दुर्बरी स्पष्टोक्त्या येदिति ॥ प्रत्यक्षश्रुतिविरुद्धयो दु
र्बरी सर्वविष्टितव्ये ति ॥ स्मृत्योक्ताः सर्वे वेष्टनमप्रयाणमिति ॥ भाष्य सिद्धांतः ॥

६७

अत एव भगवान् जैमिनिरपि। विरोधे त्वनपेक्षं स्यादसति ह्यनुमानमिति सूत्र
पदीति। अत एव चोक्तं मीमांसायाम् विरोधाधिकरणे प्रत्यक्षश्रुतिमूलाभिः मन्वा
दिस्मृतिरपि अपिभिः सांख्यस्मृतिर्बाध्यत इत्युक्तम्। अत्रोच्यते। प्रत्यक्षश्रुतिविरोधेऽपि स्मृ
तीनां पुरुषान्तरप्रत्यक्षनानानिगमशाखापठितश्रुतिमूलत्वे संभवति स्वमात्रा
पलंभेन वस्त्वभावस्य निश्चेतुमशक्यतया पुरुषान्तरप्रत्यक्षस्य स्वप्रत्यक्षसाम्या
त्प्रत्यक्षश्रुत्या सह तुल्यबलत्वाद्विकल्प एव युज्यत इति। वार्त्तिककारमते पर्यालो
चने कालविशेषं निपुरस्कृत्य प्रवृत्तेन यद्धुतं चापि समाचरेदिति। विशेषविधिना

स्म

ऽमौर्दिष्ट इति सामान्यप्रत्यक्षश्रुतिरपि बाध्यते। यद्वा विधिस्पृष्टे निषेधानवतारा
दिति न्यायेन प्रत्यक्षश्रुते रागप्राप्तमद्यपानविषयतया संकोचः क्रियते। विरोधे त्विति सू
त्रादिसूत्रं तु शाक्यादिनिर्मितधर्मशास्त्राभासानां प्रामाण्यनिराकरणपरत्वार्थमिति
वर्णितं कान्तरेण वार्त्तिककृता एव प्रपंचितम्। अत एव आलेख्युक्तम्। तस्माद्द्युतं प्रकर्त्तव्यं प्रभा
ते तत्र मानवैः तस्मिन् द्युते जयो यस्य तस्य संवत्सरं जयः। पराजयो विरुद्धस्तु लाभना
शकरो भवेत्। पित्रा मित्रैश्च सहितेन यासां च भवेन्निशेति। अथ गोपूजने तिथिनिर्ण
यं विशेषमाह हेमाद्रौ देवलः। प्रतिपद्दर्शसंयोगे क्रीडनं तु गवां मतम्। परविद्धासु यः कुर्यात्पुत्रदा
रधनक्षयः इति। इदं च पूर्वदिने सायाह्ने प्रतिपत्सत्त्वे द्वितीयदिने चंद्रदर्शने च सत्येवेत्य
पि यदुक्तं पुराणसमुच्चये। त्रियामरणदर्शीतिथिपर्वते चेत्सार्द्धत्रियामा प्रतिपद्द्विवृद्धौ
दीपोत्सवे ते मुनिभिः प्रदिष्टे अतोन्यथा पूर्वयुते विधेयं इति। सार्द्धत्रियामेति चंद्रदर्शना
भावोपलक्षणम्। यदुक्तं तत्रैव गवां क्रीडा दिने यत्र रात्रौ दृश्येत चंद्रमाः। सोमो राजा प
शून्हन्ति सुरभिः पूजकांस्तथेति। दिनद्वये सायाह्नव्यापित्वे तूत्तरेति निर्णयामृते स्थितम्।

133

अथ गोमंत्रः। लक्ष्मीर्या लोकपालानां धेनुरूपेण संस्थिता। घृतं वहति यज्ञार्थे मम पापं व्य
पोहतु। अनेन करसमर्पणमध्येन त्रिःपर्णानि तियावेन कुर्वंति ते सवी॥ इति कार्तिकशुक्लप्रति
पन्निर्णयः। अथ कार्तिकशुक्लद्वितीया। अथ द्वितीयायां सायं पूजायाम् अपराह्णव्यापिनी ग्राह्या॥
ऊर्जे शुक्लद्वितीयायामपराह्णेऽर्चयेद्यमम्। स्नानं कृत्वा भानुजायां यमलोकं न पश्यति॥ कार्
त्तिके॥ अत्र मध्याह्ने यममर्चयेदिति पाठः स त्वयुक्तं ग्रंथविसंवादात्। पक्षद्वये दिनद्वये तत्र स
त्त्वे सत्त्वे वा पूर्वा॥ द्वितीया प्रतिपद्युता स्यात् परतं चोक्ते। हेमाद्रिरप्येवं। तत्र स्कंदे भविष्ये का
र्तिके शुक्लपक्षे तु द्वितीयायां पुनर्यमः पूर्वं भोजितः। स्वगृहे र्चित अतोऽयं मद्वितीये यं त्रिषु लोके
षु विश्रुता॥ अस्यां निजगृहे विप्र न भोक्तव्यं ततो नरैः। स्नेहेन भगिनीहस्ताद्भोक्तव्यं पुष्टिव
र्धनं॥ दानानि च प्रदेयानि भगिनीभ्यो विधानतः। स्वर्णालंकारवस्त्रान्नपूजासत्कारभोजनैः॥
सर्वा भगिन्यः संपूज्या अभावे प्रतिपन्नकाः। सा दशगणमभावे मातुलभगिन्यः पूज्या इत्यर्थः॥
ब्रह्माऽपि पालुभोजयते नारी भ्रातरं युग्मके तिथौ। अर्चयेच्चापि तां वस्त्रैर्न सा वैधव्य
माप्नुयात्॥ भ्रातुरायुःक्षयो राजन्न भवेत्तत्र कर्हिचित्॥ इति यमद्वितीया॥ कार्तिके
शुक्ले चतुर्थी नि कालादर्शे स्थिता॥ तत्र चतुर्थी सामान्यनिर्णयात्परा॥ कार्तिकशुक्ला
ष्टमी गोष्टाष्टमी। तत्र कौर्मे। शुक्लाष्टमी कार्तिके या स्मृता गोष्टाष्टमी बुधैः। तत्र कु
र्यात् गवां पूजां गोग्रासं गोप्रदक्षिणं। गवानुगमनं कार्यं सर्वकामफलाप्तये इति॥
अथ शुक्लपक्षस्थ शुभा कार्या पराष्टमी॥ कार्तिकशुक्लनवमी युगादिः सा पूर्वाह्णव्यापिनी
तिथ्याः उक्तं॥ तत्र विशेषः स्कांदे कार्तिकमाहात्म्ये ब्राह्मे। कार्तिकस्य च शुक्लस्य पक्षे स्यान्नवमी
तिथिः। अक्षयाऽनवमी प्रोक्ता व्यासाद्यैर्मुनिपुंगवैः। तस्यां यत्क्रियते यं स्यात् तच्छृणुष्व क
लिप्रियं स्कंदपक्षेऽम्य नारदं प्रति॥ ब्रह्मोवाच॥ अनंतस्नानीय कूष्मांडं पंचरत्नयुतं शुभं हिरण्य

६८

134

संयुतं कार्यं व कुर्यात्स्वयुतं मुने॥ संकल्परेयं विप्राय प्रीयतामिति सद्योऽस्तु॥ स्वर्गे गृहे कुरुक्षे
त्रे तुलादानस्य यत्फलं नर्मदायां लभेत्पुण्यं तस्य कूष्मांडदानतः॥ इति विप्रहस्ते दद्यात्तथान्नादि
दानतः॥ तथा गवाय प्रतदानं तत्सम्यक् कुर्वीत नमस्कृत्य॥ तत्फलं लभते मर्त्यः कूष्मांडस्य प्रदानतः॥
यात्रितत्र मंत्रः॥ छागहस्ता द्विपापघ्नं अलेणा निर्मितं पुरा॥ कूष्मांडं बहुबीजाढ्यं मतः शांतिप्र
यच्छमे इति॥ कार्तिकशुक्लएकादश्यां होमपंचकं अनेन मुक्तो भवति यो यद्भीष्मपंचकमिति
प्रथितं पृथिव्यामेकादश्यां प्रभृति पंचदश्यां लिनिषिद्धोऽस्तु अन्नभोजनं परस्मिन्नरस्य तस्मिन्नि
ष्टं फलं द्विगुणितं पांडव ज्ञातं ध्वनेन तिथिसमये व एकादश्यां हरिबोधिनी॥ सा तु प्रोक्ता॥ एकादश्यां तु
शुक्लायां कार्तिके मासि केशवः॥ प्रसुप्तं बोधयेद्रात्रौ श्रद्धाभक्तिसमन्वित इति॥ एतु द्वादश्यां
देवबोधनमुक्तं॥ स च निद्रां परित्यज्य कार्तिके मासि केशवः॥ प्रस्कन्न कार्त्तिक्यामिति॥ समस्त वने
न पूर्णिमायां॥ तदेव॥ नवाराधनवत्स्थाप्यं॥ तद्विधिश्च॥ तत्रैव देवदेवस्य स्नपनं पूर्ववद्भवेत्। सदा पु
ष्पालतः कृत्वा देवमुत्थापयेत्सुधीः॥ तत्र मंत्रः॥ ब्रह्मेन्द्ररुद्राग्निकुबेरसूर्यसोमादिभिर्वंदितवंद
नीय॥ बुध्यस्व देवेश जगन्निवास मंत्रप्रभावेन सुखेन देव॥ उत्तिष्ठोत्तिष्ठ गोविंद त्यज निद्रां
जगत्पते॥ त्वयि सुप्ते जगन्नाथ जगत्सुप्तं भवेदिदं॥ उत्थिते चेष्टते सर्वमुत्तिष्ठोत्तिष्ठ माधव॥ गंगा
मेघा वियच्चैव निर्मलं निर्मला दिशः॥ शारदानि च पुष्पाणि गृहाण मम केशव॥ इदं विष्णुरिति
प्रोक्तो मंत्र उत्थापने हरेरिति॥ तत्तु गरं सम्मुक्तं॥ म विष्णोत्तरे सदा नूपुरे वै रात्रौ श्यामय सत्वे
रिद्विनाद॥ उत्थितं देवदेवेशं नगरे पार्थिवस्त्वयमिति॥ अस्य फलमप्युक्तं तत्रोक्तं बोधनी जगद्वा
धारा कार्तिके शुक्लपक्षतः॥ रथस्थो यत्र भगवान् दृष्टो यच्छति वांछितमिति॥ कार्तिकशुक्लद्वाद
श्यां मन्वादि॥ अत्रैव चातुर्मास्यव्रतसमाप्तिरुक्ता॥ भारते चतुर्युगे सर्वे चीर्णव्रतानुमास्य तु
तं न येषां॥ कार्तिके शुक्लपक्षे तु द्वादश्यां तत्समापयेत् इति॥ तत्र मंत्रः॥ इदं व्रतं मया देव कृतं प्री
त्यै तव प्रभो॥ न्यूनं संपूर्णतां यातु त्वत्प्रसादाज्जनार्दन इति॥ अत्रैव च बे एवं देवयादंपं वै सव

ग्रंथेषु ध्वजारोपणमुक्तं॥ द्वादश्यां सुप्तोत्थिते तो मंगलवाद्यैश्च सूक्तपाठैश्च
स्तुतो भिते॥ नृसिंहस्तोत्रपठनैः नयेद्देवालयं ध्वजं॥ देवस्य द्वारदेशे वा सुदृ
न्वितं॥ सुस्थिरं स्थापयेद्विद्वान् ध्वजं तु संभ्रमसंयुतं इति॥ फलमप्युक्तं यावद्दिनानि
वसति ध्वजो विष्णुगृहे द्विजाः तावद्युगसहस्राणि हरौ सांप्रतमश्नुते इति॥ का
र्तिकशुक्लचतुर्दश्यां वैकुंठचतुर्दशी॥ सा चारुणोदयव्यापिनी ग्राह्या॥ यदुक्तं सनत्
कुमारसंहितायां॥ वर्षे हेमवाख्ये मासि पतिकार्तिके॥ शुक्लपक्षे चतुर्दश्यामरुणा
भ्युदयं प्रति॥ महादेवतिथौ ब्राह्मे मुहूर्ते मणिकर्णिकां॥ स्नात्वा विश्वेश्वरो देव्या
विश्वेश्वर प्रपूजयद्दिति दैत्येति सहस्रं योगं विना पि स रात्री तत्तीयानि दिने दृश्ये
तत्र सत्वे पूर्वा॥ एतत्र तेषु सर्वेषु कर्तव्या संमुखी तिथिरिति वचनात्॥ तथा संक्षेप
ज्योतिषसारस्य प्रतिष्ठारम्भं तदाकरोति॥ स्वयमेव स्वमासि निर्वर्त्य पाशुपतव्रतमिति॥ का
शीखंडे॥ कार्तिकस्य चतुर्दश्यां विश्वेशं यो विलोकयेत्॥ स्नात्वा चोत्तरवाहिन्यां त
स्य पुनरागमो विद्यते अत्र तु रात्रिव्याप्ति निर्णायिका॥ कार्तिकस्य सिते पक्षे चतुर्दश्यां
नराधिप॥ उपवासकृते प्रपूज्य हरिं रात्रौ जितेन्द्रियः इति॥ भविष्योक्तेः॥ दिनद्वये तत्सत्वे परा
सामान्यनिर्णयात्॥ दिवारात्रिव्रतं यच्च एकमेव तिथौ गतं॥ तस्यामुपयोगिन्यामाचरे
दिति साधुक्तेश्च॥ अत्रैव कार्तिकव्रतोद्यापनमुक्तं पाद्मे॥ अथोर्जव्रतिनः सम्यगुद्याप
नविधिं शृणु॥ ऊर्जशुक्लचतुर्दश्यां कुर्यादुद्यापनं व्रती॥ तुलस्या उपरिष्टात्तु कुर्यान्मंडप
कं शुभं॥ तुलसीमूलदेशे च सर्वतोभद्रमेव च॥ तस्योपरिष्टात्कलशं पंचरत्नसम
न्वितं॥ पूजयेत्तत्र देवेशं सौवर्णं वरतुलया॥ रात्रौ जागरणं कुर्याद् गीतवाद्यादिमंग

६९

136

द्वे॥ ततस्तु पौर्णमास्यां वै सपत्नीकां द्विजोत्तमान्॥ त्रिंशन्मितान् नचैकं वा स्वशक्त्या
वनिमंत्र्य च॥ ॐ नमो देवाइति द्वाभ्यां जुहुयात्तिलपायसं॥ ततो गां कपिलां दद्यात्पूजयेच्च द्वि
धिवद्गुरुमिति॥ इयं पौर्णमासी मन्वादिः॥ अत्र विशेषमाहात्म्यं॥ कार्त्तिक्यां पुष्करे स्नातः
सर्वपापैः प्रमुच्यते॥ माघ्यां स्नातः प्रयागे तु मुच्यते सर्वकिल्बिषैरिति॥ तथा च विष्णौ पौर्ण
मास्यां तु संध्यायां कर्त्तव्यस्त्रिपुरोत्सवः॥ दद्यादनेन मंत्रेण सुदीपांश्च सुरालये॥ मंत्रः॥ कीटाः
पतंगा मशकाश्च वृक्षा जले स्थले ये विचरंति जीवाः॥ दृष्ट्वा प्रदीपं न हि जन्मभागिनो भवं
ति सत्स्वश्वपचा हि विप्रा इति॥ तथा महाभारते कार्त्तिक्यां पौर्णमास्यां कृत्तिकासंगं कृत्वा नक्तं समाचरेत्॥
शैवं पदमवाप्नोति शिवव्रतमिदं स्मृतमिति॥ तथा कार्त्तिक्यां चंद्रपूर्णिमामन्यचैव सा॥ दी
दीपदानं विष्णुधर्मोत्तरे उक्तं॥ तथा कार्त्तिकी चेत्कार्त्तिक्यां यां कृत्तिकायोगः सा कृत्याख्या लिङ्गे
कीर्तनं सहजन्मभवे द्विप्रोषधनाद्यो वेदपारगः इति॥ इयमेव महापौर्णमास्यवयंती॥ इति श्रीमं सर्वं
तस्मात्करे कार्त्तिकमासप्रकाशः॥ अथ मार्गशीर्षः॥ तत्र विशेषः स्कांदे पुनर्महात्म्ये माघादि
तपुण्यं पुण्यं वैशाखस्य मासि जायते तु यत्॥ तस्मात्सहस्रगुणितं तुलासंस्थे दिवाकरे॥ मार्ग
शीर्षेधिकं तस्मात्सर्वदा मम प्रियः॥ उषः स्नात्वा यथा मर्त्यः स्नानं विधिवदाचरेत्॥ तुष्टोहं त
स्य यच्छामि आत्मानमपि पुत्रकेति॥ अयं मासो मथुरायामिति प्रशस्तः॥ तदुक्तं तत्रैव
पूर्णे वर्षसहस्रे तु तीर्थराजे तु यत्फलं॥ तत्फलं लभते पुत्र सहोमासे मधोः पुरी॥ पूर्णे
वर्षसहस्रे तु वाराणस्यां तु यत्फलं॥ तत्फलं लभते पुत्र मथुरायां सहो दिने इति॥ अथ पत्र
नेतत्रैव॥ मार्गशीर्षसमं प्रेत्य एकभक्तेन यः क्षिपेत्॥ भोजयेच्च द्विजान् भक्त्या स मुच्येद्व्या
धिकिल्बिषैः॥ कृषिभागी बहुधनो बहुधान्यश्च जायत इति॥ अथ दानं विष्णुधर्मोत्तरे॥

लवणं मार्गशीर्षे तु दत्वा सौभाग्यमश्नुत इति। अथ वामनपुराणे। एवं राज्ञोक्तं ततो नागत-
ल्पकेशात्मजा विष्णुं दातव्यं केशवप्रीत्यै मासि मार्गशिरे तथेति। अत्र मासरूपिकसंज्ञे
ति विसुं परत्वान्मुहूर्तत्रयं पुण्यतमं मानत्रदानो। विश्वामित्र आह। अत्र किंचिल्ले माते
दीपदानं महाफलमिति। अत्र किं [illegible]। अत्र सहश्च महस्यश्च हेमंतिको ऋतु इति श्रु
ते हेमंतर्तुत्वात्तद्दानमपि देयं। तदुक्तं। हेमंतमुपक्रम्य विष्णुधर्मोत्तरे बहिर्दीनं नरः श्रेवा
सर्वस्योदयने प्रति। अथ तिथयः। अत्र मार्गकृष्णाष्टम्यां कालाष्टमी व्रतमुक्तं काशीखंडे॥
मार्गशीर्षासिताष्टम्यां कालभैरवसन्निधौ। उपोष्य जागरं कुर्वन् सर्वपापैः प्रमुच्यते॥
इति। अत एव रात्रिव्यापिनी ग्राह्या। दिनद्वये तत्र सत्वे पूर्वा। इदं व्रतेषु सर्वेषु कर्तव्या सम्
स्थितिर्थिरिति वचनात्। अत्रोपवासप्रधाने तदुक्तं शिवरहस्ये। उपोषणं [illegible]
ध्ये दानमिह स्मृतं। तथा जागरणं रात्रौ पूजा यामचतुष्टये इति। पारणं तु परदिने प्रातरेव
कार्यं। यामत्रयोर्ध्वगामिन्यां प्रातरेव हि पारणे इति वचनात्। मार्गशुक्लपंचमी। नागपंचमी
तदुक्तं। कांडशुक्ले मार्गशिरेषु एवं श्रावणे नागपंचमी। स्नानदाने बहुफला नागलोक
प्रदायिनी इति। इयं परा। पंचमी नागपूजायां कार्या षष्ठीसमन्वितेति वचनात्। मार्गशी-
र्षशुक्ले षष्ठी चंपाषष्ठी माहात्म्ये। मार्गभाद्रपदे शुक्ला षष्ठी वैधृति संयुता रविवारेण संयुक्ता
सा चंपा ये नीहरकीर्तिता। इयं योगवशान्निर्णेया। तदभावे तु सामान्यनिर्णयासरा। तथा॥
मार्गशीर्षे मले पक्षे षष्ठ्यां वारेषु मालिनाम्। मलतारागते चंद्रे लिंगस्यार्हिगोचरमिति। सा
क्षिणास्येष्टिः यं प्रसिद्धा। मार्गशुक्लसप्तमी। मित्रसप्तमी। तदुक्तं ब्राह्मे। यदैमासोद्दिक्षिणांते
वं तदेव कृतिमन्युना। अदितेः कश्यपाज्जज्ञे मित्रो नाम दिवाकरः। षष्ठ्यां चरूपनं कार्यं
शीतलस्यापुरस्कृतं। सप्तम्यां वपनं कुर्यात्ततः स्नात्वा यजेद्विभुं। नानाकुसुमसंभारैर्भक्ष्यैः

पिष्टमयैः शुभैः॥ मधुनाज्यप्लुतेन होमजप्यसमाधिभिः॥ ब्राह्मणान्भोजयेत्सम्या
ग्दीनानाथांश्च मानवान्॥ अष्टम्यां च विपञ्चाश्च तथा च नरदनेत्तैकाः॥ स्निग्धैश्चोत्त
श्यं पिष्टमन्नं मधुप्लुतं मितं॥ मार्गशीर्षचतुर्दश्यां विशेषः कार्त्री संजा॥ मार्गशीर्षचतुर्द
श्यां कपर्दीश्वरसन्निधौ॥ स्नात्वान्यत्रापि स्मरणात्रपेक्षात्रे मवाप्नुयात्॥ इमां सांवत्स
रीं यात्रां ये करिष्यंति मानवाः॥ तीर्थप्रतिग्रहात्सा पान्निस्तरिष्यंति तेन नरा इति॥ अत्र चतु
र्दशीपरा शुक्लपक्षस्य वा ग्राह्या॥ तस्मिंश्चते चापि पितृणां च मोचने तीर्थे श्राद्धं मुक्तं त्रिस्थलीसेतु
तत्र पार्वणवत्तिथिनिर्णयः॥ स्नानं तु मार्गे पितृणां च मोचनी तीर्थाल्लोकेष्टे सम्मुद्धरेत् नपि
ज्यते परलोके सर्वपापैर्विमुच्यते॥ मार्गशीर्षपौर्णमास्यां चंद्रोन्मुक्तं॥ विष्णुधर्मोत्तरे॥
मार्गशीर्षे तथा मासि पूर्णिमायां त्रिदशेधितो महाराजलवणेन वाससा तु महीतले॥ अथ
र्धकांस्यपात्रेषु दत्त्वा सोमं समाहितः॥ लवणस्य तु मुख्यस्य संपूर्णं वस्त्रमानकं दत्त्वा सुव
र्णमानं सुतस्मिन्नेव हि जालयः॥ सौभाग्यरूपलावण्ययुक्तो भवति मानव इति॥ मुख्यं ल
वणं सैंधवं॥ अत्र मार्गनुधयुक्तां सांहत्स्यात्रयोदस्ति॥ स्कांदे युक्ता॥ तत्र प्रदोषव्यापिनी ग्रा
ह्येति संप्रदायः॥ इति श्री० जसवंतभास्करे मार्गशीर्षमासप्रकारः॥ अथ पौषः॥ तत्र संर
धनुर्द्वरारम्भण दीक्षायसंगमे स्नानं मुक्तं मयोध्यामाहात्म्ये षष्ठाध्याये॥ स्कांदे स्नातानां
शुचिर्विप्रिस्तोये॥ ॥ संकोचनतात्मनां॥ पुष्टिर्भवति पापं संतं नसात्कतु यानेरपि॥ पौषमा
सि विशेषेण स्नानं बहुफलप्रदं॥ पौषमासे प्रपूर्णेन यः कुर्यात्स्नानमारतः॥ ब्राह्मणः क्ष
त्रियो वापि वैश्यः शूद्रोपि वा भवेत्॥ स याति ब्रह्मणः स्थानं पुनरावृत्तिदुर्लभं॥ पौषे

मासे तु यो दद्यात्तत्र लायदीपमुत्तमं॥ विधिवच्छ्रूयतां विप्र शृणु तत्रापि यत्फलं॥ ना-
नाजन्मार्जितं पापं स्वल्पं वा यदि महद्भवेत्॥ तत्सर्वं नश्यति क्षिप्रं तोयस्येव लवणं
यथेति॥ विष्णौ पौषमासे भारते॥ पौषमासे तु कौंतेय एकभक्तेन यः क्षिपेत्॥ सुभगो
दर्शनीयश्च यशो भोगी च जायते॥ विष्णुधर्मोत्तरे॥ पौषे कनकदानेन परां पुष्टि-
मियेवच॥ पुष्पाणां च सितेपक्षे दानं लक्ष्मीकरं परं॥ फलानां च तथा दानं कृष्णपक्षे म-
हाफलमिति देवीपुराणोक्तं॥ घृतं पौषे महाफलमिति॥ घृतदानमुक्तं॥ अत्र धनसं-
क्रमणस्य षडशीति सुखलाना मुहूर्तत्रयं पुण्यं॥ तत्र दानमाह॥ विश्वामित्रः॥ धनुः-
प्रवेशे वस्त्राणां हयानां च महाफलमिति॥ अथ तिथयः॥ पौषादिमासगतासु चतसृ-
षु॥ कृष्णाष्टमीष्वष्टकाश्राद्धं तत्पूर्वोत्तरतिथिषु च श्राद्धं नित्यं॥ तथा च सत्यव्रतः॥ हेमंत-
शिशिरयोश्चतुर्णामपरपक्षाणामष्टकाः स्मृताः॥ अत्र श्राद्धे कामकालसंज्ञा विशि-
ष्टे देवाः॥ अथ माघ्यां योगविशेषो भारते॥ अमार्कपातश्रवणैर्युक्ता चेत्पुष्यमाघयोः॥
अर्द्धोदयः स विज्ञेयः कोटिसूर्यग्रहैः समः॥ परं तु॥ अत्र पुष्यमाघयोरमयोर-
पादानात्॥ पौषस्य कृष्णादिमासत्वमभिप्रेतं॥ न तत्र विशेषो निर्णयामृते॥ द्विवेच योग-
कालेऽयं न तु रात्रं करणं च नेति॥ स्कांदे॥ चतुष्कोपलं मुख्यमम्भं तत्र कारयेत्॥ चत्वा-
रिंशत्पलं चाथ पंच विंशति रेव वा॥ एवं सुघटितं कार्यं कांस्यभाजनमुत्तमं॥ निधा-
य पापसंतत्र यत्नमष्टदलं लिखेत्॥ पद्मस्य कर्णिकायां तु कर्षमात्रं सुवर्णकं॥ तदर्धा-
र्धं तदर्धं वा तदर्द्धं श्वापि कारयेत्॥ भमौ तु तंडुलैः शुद्धैः कृत्वाष्टदलमुत्तमं॥ अत्र मंत्र-
स्थापयेत्तत्र ब्रह्मा विष्णु शिवात्मकं॥ निष्कांप्य जातं ततः कार्यश्वेतमाल्यैः सुशोभनैः॥

७२

वस्त्रादिभिरलंकृत्य ब्राह्मणाय निवेदयेत्॥ तत्र मंत्रः॥ सुवर्णमन्नपायसान्नं यस्मादे
तत्त्र्यीमयां॥ आप्तेस्त्रीरकं यस्मात्तद्गृहाण द्विजोत्तम॥ समुद्रमेखलां पृथ्वीं सम्यग्द
तु सफलम्फलं॥ तत्फलं लभते मर्त्यः कृत्वेदं दानमुत्तमं मिति॥ तथा च॥ पौषपौर्णिमा
या उत्तरभाविन्यामभायामेतरतु दृष्ट्या॥ अर्द्धोदये तु संप्राप्ते सर्वं गंगाजलं शुभं
शुद्धात्मानो द्विजाः सर्वे भवेयुर्ब्रह्मसंमिताः॥ यत्किंचिद् क्रियते दानं तद्दानं मेरुसन्नि
भमिति॥ हानां तागल्पप्यल्प तो ज्ञेयानि॥ पौषशुक्लाष्टमी बुधयोगान्महाहे त
भविष्योत्तरे॥ पुष्ये मासि यदा देवी शुक्लाष्टम्यां बुधो भवेत्॥ तदा तु सा महापुण्या मह
भद्रेति कीर्त्तिता॥ तस्यां स्नानं जपं होमस्तर्पणं विप्रभोजनं॥ महत्प्रीलयेहो तद्वीत्राग
साहस्रिकं भवेत्॥ भरणीयोगे त्वेतिप्रशस्तेति॥ निर्णयामृतादौ स्थितं॥ पौषशुक्लैका
दश्यां॥ मन्वादिरिति जसवं तं॰ पौषमासप्रकाशः॥ अथ माघः॥ तत्र स्नानमुक्तं प्रभास
खंडे॥ माघे मासि च यः स्नायान्नैरंतर्येण भास्करे॥ पौंडरीकफलं तस्य दिवसे दिवसे भवेदि
ति॥ प्रागप्युक्तं॥ तुलामकरमेषेषु प्रातःस्नायी सदा भवेत् इति॥ ग्रोहेपि॥ एकादश्यां शु
क्लपक्षे पौषमासे समारभेत्॥ द्वादश्यां पौर्णमास्यां वा शुक्लपक्षे समापनमिति॥ तत्राश
क्तस्य तु त्र्यहमेव स्नानमुक्तं॥ पाद्मे॥ अस्मिन्माघे त्वशक्तोपि स्नायादपि दिनत्रयं॥ तथा
महामाघी पुरस्कृत्य संस्नातं दिनत्रयं इति॥ त्रयोदशीन्तु दशीपौर्णमासीस्य प
दिनत्रये स्नानमिसर्था। स्नानकालस्त्वरुणोदयो मुख्यः॥ अरुणोदये तु संप्राप्ते स्ना
नकाले विचक्षणः॥ माघवाम्भसि युगे ध्यायन्त्यः स्नान्ति सुरपूजितं इति॥ अह्लान्॥ स्त्रु
माघमासे रटस्नापः किंचिदभ्युदिते रवौ इति॥ पाद्मे॥ ततोऽरुणकालपर्यंतं उत्तरकाल

मद्रो ६

श्री

(५१)

प्रतिपावनान्नाम्ना एतेन माघमासस्य उपसि स्नात्वा॥ विष्णुलोकं स गच्छति॥ ति॥ विष्णुस्मृति
रपि व्याख्याता॥ दृष्टं च स्नानं प्रयागे तिप्रस्त्ता॥ मदुक्तौ पापौ पश्चिमाभिमुखी गंगा का
लिंद्यां सह संगता॥ हंति कल्पकृतं पापं सा माघे नृपदुर्लभा॥ प्रयागे माघमासे तु त्र्य
हं स्नानस्य यत्फलं॥ अश्वमेधसहस्रेण तत्फलं लभते भुवि इत्यादि॥ तथा काशीखंडे
ऽश्वमेधो जरस्तु प्रयागेपि प्रयास्तमुक्ते काशीखंडोक्तं स्युरेव प्रयागे ये तपसि स्ना
ति मानवाः॥ दशाश्वमेधजनितं फलं तेषां भवेत् ध्रुवमिति॥ अहं ते तु पत्र कुत्रापि वा मा
घे प्रयागस्मरणान्वितः॥ करोति मज्जनं तीर्थे स लभेद्गंगमज्जनमिति॥ अथ स्नातं नि
यमाः॥ तत्र संकल्पमंत्रो विष्णुस्मृतौ॥ तत्रैवोत्थाय नियमं गृह्णीयाद्विधिपूर्वकं॥ माघ
मासमिमं पूर्णं स्नास्येहं देव माधव॥ तीर्थस्यास्य जले नित्यमिति संकल्प्य चेतसि॥ स्ना
नमंत्रः पापाद्दुःखदारिद्र्यनाशाय श्रीविष्णोस्तोषणाय च॥ प्रातःस्नानं करोम्यद्य
माघे पापविनाशनं॥ मकरस्थे रवौ माघे गोविंदाच्युत माधव॥ स्नानेनानेन मे देव य
थोक्तफलदो भव॥ सूर्यार्घ्यदानमंत्रोपि पृथ्वीचंद्रोदये सवित्रे प्रसवित्रे च परं धाम
जले मम॥ त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा॥ ति॥ नारदीये॥ न वह्निं सेवयेत्स्नातो
ह्यस्नातोपि वरानने॥ होमार्थं सेवयेद्वह्निं शीतार्थं न कदाचन॥ तथा॥ अनभ्यंगी वरा
रोहे सर्वं मासेन यहृती॥ तथा स्कांदे॥ पौष्यां तु समतीतायां या या वर्द्धते तिथिः॥ माघ
मासस्य तां विद्धि पूजा विश्वा विधीयते॥ पितृणां देवतानां च मूलकं नैव दापयेत्॥ आद
त्तं मूलकं मुक्त्वा चरेच्चांद्रायणं व्रतं॥ अन्यथा याति नरकं सूत्रविट्शूद्र एव वेति॥ तथा॥
पाद्मे॥ मासमात्रं निराहारस्त्रिकालं स्नानमाचरेत् इत्यादि भरद्वाज्येकभक्तमयाचितम्

त्र इष्टव्यं ॥ अथ दानानि ॥ माघे प्रक्रमणात्प्रत्यहं निशान्तध्याति तिलाः श
र्करयान्विता ॥ त्रिभागस्तु तिलानां हि चतुर्थः शर्करान्विता इति ॥ तथा ॥ भविष्ये ॥
तिलमामलकं चैव तीर्थे देयास्तु नित्यशः ॥ ततः अज्याद्ययेहुन्निं सेवनार्थं द्विज
न्मनामिति ॥ वामनपुराणे ॥ माघमासि तिलाः शुक्लास्तिलधेनुश्च मानवेति ॥ अ
त्र मकरसंक्रमणोपरा ॥ विंशति घटिकाः पुण्यकालः ॥ स्याच्छ्रेष्ठं तं आस्नातत्र विशे
षः ॥ शिवरहस्ये ॥ मस्यां कास तिलैः स्नानं कार्यं चोद्वर्तनं शुभे ॥ तिलतैलेन दीपाश्च
देयाः शिवगृहेषु च ॥ तथाह ॥ विश्वामित्रः ॥ वृषप्रवेशे दानानां दानं मग्रे सत्यथेव
चेति ॥ कालिकापुराणे ॥ हेमन्ते तिलैः प्रकुर्वीत सर्वदेवोत्तरायणे ॥ तान्या विप्राय
दिवेभ्यो हाटकेन समं ददेत् ॥ उत्तरायणमासाद्य नरः कस्मात्तु शोभति ॥ विष्णु
धर्मोत्तरे ॥ उत्तरे दीपते विप्रावृस्कन्दानं महीफलं ॥ तिलपूर्णमनड्वाहं दत्वा रो
गैः प्रमुच्यत इति ॥ अत्र तपश्चर्यां शिशिरादृतु इति श्रुतेः ॥ शिशिरस्तत्वात्तद्दान
मपि देयं ॥ तदाह यमः ॥ शिशिरं भोजयित्वा तु स्वर्णं तस्या ॥ शिशिरे द्विजान् ॥ दीप
ग्निवसमवाप्नोति स्वर्गलोकं च गच्छतीति ॥ अथ तिथयः ॥ अत्र माघकृष्णचतु
र्दश्यां यमतर्पणमाहात्म्यमाप्तं नकांश्च दिते कालमाघकृष्णचतुर्दश्यां स्नातः सं
र्प्य तु यमं सर्वैः पापैः प्रमुच्यत इति ॥ माघशुक्लतृतीयायां ॥ विष्णुधर्मोत्तरे ॥ माघ
शुक्लतृतीयायां गुडस्य लवणस्य च ॥ दानं श्रेयस्करं राजन्स्त्रीणां च पुरुषस्य च
गुडेन तुष्यते देवी लवणेन स्वयं प्रभुरिति ॥ माघशुक्लचतुर्थी ॥ तिलचतुर्थी उक्तं ॥

153

ह्निकाद्रौ स्कंदे माघशुक्लचतुर्थ्यां तु नक्तव्रतपरायणाः ये त्वां ढुंढे र्चयिष्यंति तेऽर्च्याः
सुरासुरैर्हामिति नक्तव्रतत्वादियं प्रदोषव्यापिनी ग्राह्या दिनद्वये तत्र सत्त्वे
सत्त्वे वा परा सामान्यनिर्णयात् युक्तस्य पूर्वेति माधवः विद्धागणेश्वरचतुर्थीवचनात् न.
अत्र विशेषस्तत्रैवोक्तः विधाय वार्षिकीं यात्रां चतुर्थ्यां प्राप्य तापसीं शुक्लां तिलान्न
गुडे वध्वा सर्वाप्यापूर्तुकामान्समन्नतीति माघशुक्लपंचमी श्रीपंचमी यदुक्तं वारा
हे माघशुक्लचतुर्थ्यां तु वरमाराध्य च श्रियः पंचम्यां कुंदकुसुमैः पूजां कुर्यात्स य
क्षपेदिति इयमेव वसंतपंचमीत्युच्यते अत्र केशवसुक्तं पुराणसमुच्चये माघमा
से तु पंचम्यां शुक्लायां पंचमीतिथौ रतिकामौ तु संपूज्य कर्तव्यः सुमहोत्सवः दा
नानि च प्रदेयानि तेन तुष्यति माधव इति इयं पूर्वा ग्राह्या माधवीय निर्णयामृ
तादावप्येवं यत्तु शुक्लपक्षस्य चान्तरेति हेमाद्रिमतं तदयुक्तमिति प्रागेवोक्तं
इति वसंतपंचमी माघशुक्लसप्तमी सारुणोदयव्यापिनी ग्राह्या यदाह विष्णुः सू
र्यग्रहणतुल्या तु शुक्ला माघस्य सप्तमी अरुणोदयवेलायां तस्यां स्नानं महाफलमिति
दिनद्वये अरुणोदये सत्त्वे असत्त्वे वा पूर्वा सामान्यनिर्णयात् अचलासप्तमी दुर्गाति
वरात्रिर्महानरः द्वादशीवत् सप्तम्यां पार्श्वसुखरामाप्नुतात्सरेति दिवोदासीये हतत्र
वचनात् अत्र स्नाने विशेषो भविष्ये कृत्वा षष्ठ्यामेकभक्तं सप्तम्यां निश्चलं जलं रात्र्यं
ते चालयेद्यावत्तं दत्त्वा शिरसि दीपकं तथा जलमुत्क्रम्य न केन चालिते यावत्तावत्स
स्नानं समाचरेत् सौवर्णे राजते ताम्रे भक्त्या वा लाबुमयेऽथवा तैलेन वर्तिदीपित
व्या महारजनरंजिता समाहितमनाः कृत्वा दत्त्वा शिरसि दीपकं भास्करं हृद
ये ध्यात्वा इमं मंत्रमुदीरयेत् तत्र मंत्रः नमस्ते रुद्ररूपाय रसानां पतये नमः ॥

वरुणायनमस्तेस्तु हरिवासननमोस्तुते इति जलेपरिहरेद्दीपं संतर्प्यपितृदेव
ता इति अथस्नानमंत्रः काशीखंडे यद्यज्जन्मकृतंपापं मयासप्तसुजन्मसु तन्मे
रोगंच शोकंच माकरी हंतु सप्तमी एतज्जन्मकृतंपापं यच्चजन्मांतरार्जितं मनो
वाक्कायजंयच्च ज्ञाताज्ञाते चयेपुनः इतिसप्तविधेपापं स्नानान्मेसप्तसप्तिके
सप्तव्याधिसमायुक्तं हरमाकरिसप्तमीति यत्तुनिर्लेपामृताशो यद्यज्जन्मकृतंमि
ति मंत्रोर्घ्यदानउक्तः तत्त्विसं एतन्मंत्रत्रयंजप्त्वापीतापारेऽर्केनरः केशवादि
समाह्लोम वयक्षणात्रिः कलुषोभवेन्न दिसम्निम काशीखंडोक्तिविरोधात् इयं
सप्तमीप्रयागेलिप्रशस्तं अरुणोदयवेलायांशुक्लामाघस्यसप्तमी प्रयोगपदिल
स्पलकोटिसूर्यग्रहैःसममितिवचनात् अत्रविशेषोगौतरं काशीखंडे लोकेस्यस
सप्तम्यांस्नानंगंगासिंधुसंगमे सप्तजन्मकृतैःपापैःमुक्तोभवतितत्क्षणात् इतिगंगे
षष्ठीचसप्तमीयोगेवारश्चेदंशुमालिनः योगोयंपद्मकोनामसहस्रार्कग्रहैःसमइति
तथा रविवारेणयुक्तामासप्तम्यांउत्तरायणे पुण्यनामनक्षत्रे पूजयेच्चदिवाकरमिति
पुंनक्षत्राणिहस्तानुराधापुष्यमृगवसुनामानि अत्रदानविशेषोभविष्योत्तरे।
एवंरथवरंरविवाजियुक्तं हेमंचहेममयातदीधितिनासमेतं दद्याच्चमाघसितस
प्तमीवासरेयः सोसंगचक्रगतिरेवमहींभुनक्ति इति ननुवसंततिलकायाःसप्त
पदत्वादिहतृतीयाचरणेचतुर्थीस्थाने प्रथमादिपादद्वयेजागरणारवप्रयो
काव्य इतिचेत्सत्ये सप्तमीसत्रेमि तिवर्णस्यतीव्रप्रयत्नेन पाठाल्लघुत्वमित्यदोषः॥

प्रतिपादितं चैतन्मत्कृते नाग्ध्येशे रत्नाकर सितेऽष्टतिरथ सप्तमी॥ इयं मन्वादिरपि
अथ माघशुक्लाष्टम्यां भीष्मतर्पणमुक्तं। पाद्मे माघमासि सिताष्टम्यां सतिलं भीष्म
तर्पणं। श्राद्धं च ये नराः कुर्युः ते स्युः संततिभागिन इति॥ एतच्च तर्पणं सर्ववर्णानां नि
त्यं। आह ब्राह्मणाद्याश्च ये वर्णा दद्युर्भीष्माय नो जलं। संवत्सरकृतं तेषां पुण्यं नश्यति न
श्यतीति तत्रैवोक्तः। श्राद्धं तु काम्यं॥ जीवत्पितृकस्यापि। इदं तर्पणमिति आगु
क्तेः॥ अपसव्येनेदं कार्यमिति दिवोदासः भगवद्भक्तिविलासे तु नित्यं तर्पणं ततः प
श्चात्स तिलेन तु सव्येन निवीतिना तर्पणं कुर्यात् गंगेयस्य महात्मन इत्युक्तो तदुभ
यमपि मत्पं मूलं। यतो यज्ञोपवीतिना कार्यमिति। सामान्यत्वात्स्मृत्यनुसारात्तु
पवित्र व कुर्यादित्युक्तं। सव्येनानेन मंत्रेण तर्पणं सार्ववर्णिकमित्याचारर
त्नं दातृत्वं प्रातिस्वकपाव वचनात्॥ तर्पणमंत्रो भारते॥ भीष्मः शान्तनवो वीरः
सत्यवादी जितेंद्रियः। आभिरद्भिरवाप्नोतु पुत्रपौत्रोचितां क्रियां॥ वैयाघ्रपा
द्यगोत्राय सांकृत्यप्रवराय च। अपुत्राय ददाम्येतत्सलिलं भीष्मवर्मणे॥ वसू
नामवताराय शंतनोरात्मजाय च। अर्घ्यं ददामि भीष्माय आबाल्यब्रह्म
चारिणे॥ इति भीष्माष्टमी॥ अथ माघशुक्लनवम्यां विशेषो भविष्योत्तरे मा
घमासे तु या शुक्ला नवमी लोकपूजिता। महानंदेति सा प्रोक्ता सदानंदकरी
नृणां॥ तस्यां स्नानं तथा दानं जपहोमउपोषितं। सर्वं तदक्षयं प्रोक्तं। पर
स्यां क्रियते नरैरिति॥ माघशुक्लैकादश्यां माघस्नानोद्यापनं कुर्यात्तदुक्तं॥

पाद्मे ॥ एकादश्यां विधानेन व्रतस्योद्यापनं तथेति ॥ अत्रैकैकादश्यां उप
वासं रात्रौ पूजनादि कृत्वा परदिने द्वादश्यां तिलैश्चवार्थैरष्टोत्तरशतं सेरमा
श्राहुतीः कृत्वा व्रतं समापयेत् ॥ तत्र मंत्रः ॥ पवित्रे परमपवित्रे चापरं धाम जले
मम ॥ त्वत्तेजसा परिभ्रष्टं पापं यातु सहस्रशो नि ॥ तथा ॥ दिवाकर जगन्नाथ प्र
भाकर नमोस्तु ते ॥ परिपूर्णं कुरुष्वेदं माघस्नानमुपःपते इति ॥ तथा भविष्ये ॥
एवं स्नानावसाने तु भोज्यं देयमवाशितं ॥ भोजयेद्द्विजदांपत्यं भूषयेद्वस्त्र
भूषणैः ॥ कंबलाजिनरत्नानि वासांसि विविधानि च ॥ तोलकानि च देयानि प्रच्छा
दनपटांस्तथा ॥ उपानहौ तथा गुप्तमोचकौ पापमोचकौ ॥ अनेन विधिना देया
न्माधवः प्रियतामिति ॥ विंध्यका यांतु ॥ त्रिरात्रं मोदकादेयाः नूर्के शतिलसपुन
ड्रस्य पुष्कार्माघपूर्णिमायां योगविशेषा पाद्मे ॥ माघासु च यदा जीवे ह्यम हा
मादिकथ्यते ॥ इति ॥ अत्र स्नानादेर्महाफलमुक्तं भाकरे ॥ इति श्रीजसवंतभास्क
रे माघमासप्रकरणम् ॥ अथ फाल्गुनः ॥ तत्र विशेषः स्कांदे ॥ एकभक्तेन कुर्वाणः
फाल्गुने मासि नित्यशः ॥ स्त्रीषु सौभाग्यमाप्नोति स्त्रियाश्च परमप्रियः ॥ इति वा
मनपुराणे ॥ फाल्गुने व्रीहयो गावो वस्त्रं कृष्णाजिनान्वितं गोविंदप्रीणनार्थं
प्रदातव्यं पुरुषर्षभेति ॥ देवीपुराणे ॥ सप्त धान्यानि फाल्गुने इत्युक्तं ॥ अत्र संक्र
मणस्य विष्णुपदत्वान्मुहूर्तत्रयं पुण्यतमं ॥ तत्र दानमाह ॥ विश्वामित्रः ॥ कुंभप्रवे
शे दानं तु गवामंबु तृणस्य च इति ॥ अथ तिथयः ॥ तत्र फाल्गुनकृष्णाष्टम्यां
सीतोत्पत्तिरुक्ता कल्पतरौ ॥ फाल्गुनकृष्णाष्टमी प्रकृष्टा ॥ जाता दाशरथे

पत्नी तस्मिन्नहनि जानकीं उपोषितो रघुपतिः समुद्रस्य तटे तत्र रामपत्नी
वसंपूज्या। सीता जनकनंदिनीति। आह्लेति। फाल्गुण शुक्लाष्टम्यां सीता प्रलो-
केति। निर्णयामृतेऽप्युक्तं। अथ फाल्गुण कृष्णचतुर्दशी सा तु शिवरात्रिः
तथा च हेमाद्रि निबंधे स्मर्यते। माघमासस्य या शेषे प्रथमे फाल्गुणस्य च कृ-
ष्णा चतुर्दशी सा तु शिवरात्रिः प्रकीर्त्तिता। एवं च माघमासस्य कृष्णपक्षे
या तिथिः शैव चतुर्दशी शिवरात्रिस्तु सा ख्याता सर्वपापनिषूदनीति
स्कांदादि वचनानि शुक्लपक्षादि मासाभिप्रायेणेति ज्ञेयानि तत्रैतावल्लिंगावि-
र्भावकाल उक्तो ईशान संहितायां। माघकृष्ण चतुर्दश्यामादिदेवो महा-
निशि। शिवलिंगतयोद्भूतः कोटिसूर्यसमप्रभः। अत्र महानिशीत्यनेन पूर्वा-
र्द्धरात्रोत्तरार्द्धरात्र्योः संधिरूपो लव्धश्वरोच्चारणोपलक्षितः सूक्ष्मः कालो ल-
क्ष्यते। महती चासौ निशा ति। विग्रहवलादर्धरात्रे महानिशेत्यभिधानात्
महानिशा तु विज्ञेया मध्यं मध्यमयामयोरिति स्मरणात्। उदाहरिष्यमाणवा-
क्यस्वरसाच्च। या तु महानिशा द्वे घटिके रात्रेर्मध्यमयामयोरिति देवलोक्ता
महानिशा सा न लिंगाविर्भावकालः। उक्तसंधिरूपसूक्ष्मकालस्य पूजायाम-
नर्हत्वात् तत्समीपवर्त्तिपूर्वोत्तरघटिकाद्वयरूपा या सा तस्याः पूजाविषयताया-
ऽवश्यालात्। यथा महानिशा तु विज्ञेया मध्यमं प्रहरद्वयमिति। रात्रेर्मध्यमप्रह-
रद्वयरूपा स्नानं तत्र न कुर्वीत काम्यनैमित्तिकादृते। इत्यागमवाक्यपर्यालो-
चनया स्नाननिषेधविषयता न तु लिंगाविर्भावकालः। एतेन महानिशा तु विज्ञे-

७५

148

स्म

यान्वतस्रो घटिकाहैयाः इत्यपि व्याख्यातं। अत एवोक्तं तत्रैव लिंगाविर्भावका
ले तु व्यापिनी ग्राह्या चतुर्दशी तत्पूर्वाधोन्विताभूता साग्राह्या मम तिथिः सदेति। अ
नन्तरछन्देन संधिरूपः सन्ध्याकालो निःसंदेहः प्रशस्तस्तथा वचनांतरेऽपि
अर्द्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी। तत्तिथावेव कुर्वीत शिवरात्रिव्रतं व्रती।
अर्द्धरात्रादधश्चोर्ध्वं युक्ता यत्र चतुर्दशी। नैव तत्र व्रतं कुर्यादायुरैश्वर्यहानित
इति अत्राधश्चेति चशब्देन समुच्चयमात्रेण केनसंधिपूर्वा। परकालयोर्विद्धमा
नायाश्चतुर्दश्या व्रतप्रयोजकत्वबोधनाज्जन्माष्टम्यामिव संधिका
लस्य निर्णायकत्वं स्पष्टमुक्तं। नारदसंहितायामपि अर्द्धरात्रयुता यत्र माघ
कृष्णचतुर्दशी। शिवरात्रिव्रतं तत्र सोऽश्वमेधफलं लभेदिति एतेन सर्वापि शि
वरात्रिः प्रदोषव्यापिन्येवेति निर्णयामृतोक्तमनादेयं। दिनद्वये तत्र व्याप्त्यभाव
व्याप्तौ वा प्रदोषव्यापिनी ग्राह्या। प्रदोषव्यापिनी ग्राह्या शिवरात्रिः शिवप्रियैः
रात्रौ जागरणं यस्मात्तस्मात्तस्यामुपोषणमिति। शिवपुराणात्। कामिकेऽपि
आदित्यास्तमये काले अस्ति चेद्या चतुर्दशी। तद्रात्रिः शिवरात्रिः स्यात्साभावेन
उत्तमोत्तमेति। परा पूर्वदिने प्रदोषनिशीथोभयव्यापिनी चतुर्दशी नि। तिथ्यन्तो
व्यापिनी वा परदिने च प्रदोषमात्रव्यापिनी। तदा पूर्वा। अर्द्धरात्रात्पुरस्ताच्चे
ज्जयायोगो यदा भवेत्। पूर्वविद्धैव कर्तव्या शिवरात्रिः शिवप्रियैरिति। पाद्मे
महतामपि पापानां दृष्टा वै निष्कृतिः पुरा। न दृष्टा कुर्वतां पुंसां कुहूयुक्तां तिथिं शि
वामिति स्कांदाच्च। अपनु माघासिते भूततिथिर्दिने हि राजन्नुपैति योगं यदि पंचदश्या।।

जयाप्रयुक्तो न तु जातु कुर्याच्छिवस्य रात्रिं प्रियकृच्छिवस्येति वचनं तद्दिनद्वये
निशीथे चतुर्दशीव्याप्तौ परेद्युर्ग्राह्येत्येवमर्थं। निशीथद्वये चतुर्दश्यपूर्वा साऽस्या
प्राशुभेति। कामिकवचनैकवाक्यत्वात्। उक्तं च माधवाचार्यैः। शिवरात्रिव्रते तत्र
मोसत्ताप्रवृत्तस्य तदिति। एतेन दिनद्वये निशीथव्याप्तौ पूर्वेति प्रतिपादयन्तो हेमाद्रि
मदनरत्नगौडाः निबंधाः प्रत्याख्याताः। यत्तु पूर्वदिने संपूर्णा अर्द्धरात्रेमात्रे
चतुर्दशी परदिने त्वर्द्धरात्रैकदेशव्याप्ता तदा पूर्वैव। व्याप्त्यार्द्धरात्रं यस्यां तु लभ्यते
सा चतुर्दशी। तस्यामेव व्रतं कार्यं मत्प्रसादार्थिभिर्नरैरिति। ईशानसंहितोक्तेः
श्रीभानुवारशिवहरं व्रतमतिप्रशस्तमुक्तं। स्कांदे। माघफाल्गुनचतुर्दश्यां रविवारो
यदा भवेत्। भौमो वाथ भवेद्देवी कर्त्तव्यं व्रतमुत्तमं। शिवयोगस्य योगेन तद्भवेदु
त्तमोत्तममिति। एतच्च निस्संपरात्परतरं नास्ति शिवरात्रिव्रतात्परं। न पूजयति
भक्त्येशं रुद्रं त्रिभुवनेश्वरं। जंतुर्जन्मसहस्रेषु भ्रमते नात्र संशयः। इति स्कांदे। न
सौरो वा वैष्णवो वा अन्यो देवतांतरपूजकः। न पूजाफलमाप्नोति शिवरात्रिबहिर्मु
खः इति पाद्मात्। त्रिविधं च पूजोपवासो जागर्तिं च चतुर्दश्यां। मानुषः पापाद्दूरस्संने
पिबेत्सकदाचन। मम भक्तस्य देवी शिवरात्रिमुपोषकः। गणत्वमक्षयं दिव्यम
मक्षयं शिवशासनं। सर्वान्भुक्त्वा महाभोगान्पुनर्जन्मयोनिं जायत इति। तत्रैवास्ते:
काम्यत्वात्। अत्र सर्वेषां जागरोपवासपूजानामाग्रयादिवस्मिन्योगानामिव प्रत्येकं
कालसंबंधात्फलसंबंधाच्च प्राधान्यं। तत्र पूजायां विशेषस्तिथितत्त्वे। स्कांदे।
तथा च रात्रौ कर्त्तव्यं शिवप्रीणनतत्परैः। प्रहरे प्रहरे स्नानं पूजा चैव विशेषतः।

७६

150

संवत्सरमहीपो दुग्धेन प्रथमं स्नानं दध्ना चैव द्वितीयके तृतीये च तथाज्येन
चतुर्थे मधुना तथा। संकल्पमंत्रः शिवरहस्ये। शिवरात्रिव्रतं ह्येतत्करिष्येहं महाफ
लं। निर्विघ्नमस्तु मे चात्र त्वत्प्रसादाज्जगत्पते। चतुर्दश्यां निराहारो भूत्वा शंभो परे
हनि। भोक्ष्येहं भुक्तिमुक्त्यर्थं शरणं मे भवेश्वरीति। पारणं तु चतुर्दशीतिथि
मध्ये प्रातरेव कार्यं यद्यपि सर्वेषामुपवासानां प्रातरेव हि पारणेति वचनात्
स्य तिथिभांते च पारणमित्यपवादोस्ति। तथाप्युपोषणं चतुर्दश्यां चतुर्दश्यां च पा
रणमिति। स्कांदवचनेन प्रातरेव पारणं प्रतिभासमाने सत्तु स्कांदे यथापूर्वंदव
ताकेपि ष्टकवराववर्थाभावाल्लिखितोपि षणां पूषा अपि ष्टागाद इति वचनेन प्रतिप्र
स्पते यत्तु स्कांदे। कृष्णाष्टमी स्कंदषष्ठी शिवरात्रिचतुर्दशी। एताः पूर्वयुताः कार्या
स्तिथ्यांते पारणं भवेदिति। तच्छिवरात्रिभिन्नविषयं तिथिनामेव कस्मात् सर्वासामुप
वासव्रतादिषु। तिथ्यंते पारणं कुर्याद्विना शिवचतुर्दशीमिति। तत्रैवोक्तं। प्रलाभे
तु। चतुर्दश्या अमायामेव पारणमुक्तं। तिथिलते। शिवायोगेन थाप्रेतासा चित्री
चतुर्दशी। कुहूयुक्तेव कर्तव्या कुक्षामेव हि पारणमिति वचनात्। इति शिवरात्रिनिर्णः।
पा फाल्गुनमासस्यायुगादि। मन्वादिश्च। अथ फाल्गुनशुक्लद्वादशी। गोविंदद्वा
दशी। उक्तं च ब्राह्मे। फाल्गुनामलपक्षे तु पुष्यर्क्षे द्वादशी यदि। गोविंदद्वादशीनाम
महापातकनाशिनी। तस्यामुपोष्य विधिवन्नरः संक्षीणकल्मषः। प्राप्नोत्यनुत्तमां
सिद्धिं पुनरावृत्तिदुर्लभामिति। इयं पुष्ययोगवशान्निर्णेया। दिनद्वये योगे पूर्वा द्वा
दशी चैव कर्तव्या एकादश्यायुता विभो इति स्कांदात्। अथ फाल्गुनपौर्णमास्यां

151

६ ता

स्नानमुक्तं॥ विष्णुधर्मोत्तरे॥ आसीनो दीपने दत्वा फाल्गुन्यां आहरेत्पणः पञ्चरूपं द्विविप्राणां स

पुत्रकं भार्याम् प्रसूयवंती तथा॥ निरःसामो तिधर्मस्तस्य यश्चैव पथो त्तमं॥ तथा नार्यो पि भर्त्ता

रं नात्र कार्या विचारणेति॥ अत्रैव होलोत्सवस्तु उक्तो॥ आह्मोत्तरे होलां गतां दृष्ट्वा गोविं

दं पुरुषोत्तमं॥ फाल्गुन्यां संप्लुते प्रत्यूषे गोविंदस्य पुरं व्रजेत्॥ दृष्ट्वा यम पिमन्त्या हि अत्रैव

विशेषो मम विष्णोत्तरे॥ अघपंदनी शुक्ला फाल्गुनस्य नराधिप॥ अभयं चैव लोकानां दी

यतां परमेश्वर मथाह्वयो विद्वो कार्मा रमंति च हसंति च॥ हारज्जा निबरवंडानि गहिला

सुमनसः कार्या होतव्य विनिर्यातु त्रिपुरा वःसंप्रह विनाः॥ संचयः शुष्ककाष्ठानामुपलो

नां च कारयेत्॥ तत्राग्निं विधिवद्धुत्वा रक्षोघ्नैर्मंत्रविस्तरैः॥ ततः किलकिलाशब्दैस्ताल

शब्दैर्मनोहरैः॥ तेन शब्देन सा पापा होमेन च निराकृता॥ सा दुष्टा राक्षसी तथा सर्व

दुष्टापहो होमः सर्वरोगोपशांतिदः॥ क्रियते स्यां द्विजैः पार्थ तेन सा होलिका स्मृता॥ त

स्मिन् त्रिः परिक्रम्य गायंतु च हसंतु च वै जनाः ततः स्वेच्छया लोका निःशंकाय स्य जन्मनः

ता॥ होलिकायाः प्रदीपने मंत्रो विधानमालायां॥ दीपयाम्यथ ते घोरां चितिं राक्षससत्त

मे॥ हिताय सर्वजगतां प्रीतये पार्वतीपते॥ अस्याः मंत्रस्य अत्र एकपात्मयत्र से कृत

लं होलिकाबालिनो अत्र तस्या पूजयिष्यामि भस्मने भूतिप्रदा भवेति॥ यत्तु भद्रा चापी

होलिकायाः आचारप्राप्तैलिंगा विषयत्वनान्यथा सिद्धानि कृत्वा चिंतितं यथाद

शमेमनोनाधिकरणे पूर्यतिवा एतरवोक्षरमिति कृत्य हनिषेधमसिद्धं कृत्वा य

पि अत्यरे वसः पस्तु रागतप्येवमनो कार्येति विधिः स्व निरासार्थं तास्य कस्य

इत्याशंक्याह निषेधार्थत्वादिकस्याथो इत्यत्र भाष्यासथा वेकेकानां वाम्नातान्य

पिप्रायश्चित्तंसराएषसिद्धान्निष्कृत्वायस्योभयंह्यविरात्रिमार्द्धे देहं पश्चात्त्वमो
हनेनिर्वपेदिति॥प्रायश्चित्तमुभयात्मीवेवेसांगोकाणानामार्थानांमिथोसंबद्धा
नामाख्यानामसंबंधितयोभयत्रविशिष्टहविर्गतिनिमित्तवाभावादेकैकान्तावपि
भवतीति॥ सिद्धांतितंलंगरत्नादौ॥ अथतत्रपूर्णिमाप्रदोषव्यापिनीग्राह्या॥ पू
र्णिमाफाल्गुनीसदेति॥नारदोक्तेः॥अत्रलेवेवर्तेयुगाश्रावणीदुर्गनवमीदूर्वाचैव
हुताशनी॥ पूर्वविद्धैवकर्तव्याइति॥ दिनद्वयेप्रदोषव्यापित्वेपूर्वा॥ दिनएववाभद्रांते
होलाकाकार्या॥राकायामेद्ध्याद्ध्वर्न्वतुदृष्टापदाभवेत्॥होलिकाभद्रावसानेतुनिशी
थांतेपिदीपयेदिति॥पुराणसमुच्चयोक्तेः भविष्योत्तरेपि॥ दिनार्द्धात्सरतोयास्यात्
फाल्गुनीपूर्णिमायदि॥रात्रौभद्रावसानेतुहोलिकांतत्रदीपयेदिति॥एवंतुकुलम
मौदिपरदिनएवोचितानामस्तांपूर्वदिनेभद्रारहितांरात्रिमप्राप्यतेतदापरदिनएव
प्रदोषेहोलिकादिक्वान्हिकमपिकार्यं॥भद्रायांदीपिकानाहोलीराष्ट्रभंगकरीनिषे
इतिपूर्वदिनेपुराणसमुच्चयेनिषेधात्॥दिनद्वयेप्रदोषव्यापित्वेतुप्रतिपदोःवृद्धौ
सत्यांपरदिनएवासार्द्धयामत्रयंवास्या॥द्वितीयदिवसेयदा॥प्रतिपद्वर्द्धमानातुतदा
साहोलिकास्मृतेति॥भविष्योक्तेः॥परातुप्रतिपदोनवृद्धि॥तदातुभद्रामुखंत्यक्त्वा
पूर्वदिनेवन्हेर्बह्निपरिग्रहेइति॥परदिनेभविष्यएवनिषिद्धत्वात्॥प्रदोषव्या
पिनीनस्यात्तदापूर्वदिनेतदाभद्रामुखवर्जयित्वाहोलिकायाःप्रदीपनमिति॥नारदी
केप्याहुभद्रामुखंतुपरिमाणंरत्नमालायां॥ता॥ प्रस्त॥ पंचघटीति॥आचारोपयेवं॥फाल्गु

नस्य मलमासत्वेष्वप्येवं होलिकायाः। अस्य ह मास विशेषाख्या विहितं वर्जयेन्मलेऽइ
तिवचनात्। यदा पूर्वदिने प्रदोषे पूर्णिमा भद्राविष्टिश्च परदिने प्रदोषव्याप्ति मानाभा
मपि तस्यां चंद्रग्रहणं तदा परदिने एव स्नात्वा होलिकायाः स्नात्वा कर्म लिं कुर्वीत यथा
तमन्ते विसर्जयेदिति वचनात्। इति फाल्गुनपौर्णिमानिर्णयः। तत्र तावत्कालउक्तो
क्तो। अहल्लसिद्धान्ते यावान्कालः पर्वणो ते तावान प्रतिपदादिसः रविंदुग्रहणे नेहास
मुत्वो मिश्रणाद्भवं तिले। ग्रहणानेहाग्रहणकालश्चत्रवार विशेषेण योगविशेष
माह व्यासः रविग्रहः सूर्यवारे सोमे सोमग्रहस्तथा चूडामणिरिति ख्यातस्तत्रानं
तफलमेवेति। अथ ग्रहणात्पूर्वकाले भोजने निषेधति। वृद्धगौतमः सूर्यग्रहे तु ना
श्नीयात्पूर्वं यामचतुष्टयं चंद्रग्रहे तु नाश्नीयान्यामत्रयं बालवृद्धातुरैर्विनेति। बालादयस्तु
ग्रहणप्रहरात्पूर्वं प्रहरे न भुंजीरन्। तथा च मत्स्यः अपराह्णे न मध्याह्ने मध्याह्ने न
तु संगवे भुंजीत संगवे चेत्स्यान्नपूर्वं भुंजिमाचरेत्। उक्तो व्यस्तविधुदये विशेषमाह
वृद्धवसिष्ठः ग्रस्तोदये विधोः पूर्वं नाहर्भोजनमाचरेदिति। ग्रस्तास्तयोस्नात्ग्रहः।
ग्रस्तावेवास्तमाने तु रविश्च शामृतोदये पिपरेद्युरुदये स्नात्वा शुद्धाभ्यवहरेन्नरइति
अथ ग्रस्तचंद्रास्ते नित्यस्नानाशौ मुक्तामुक्तरमेव कर्तव्या। माह। मदनरत्ने तु ग्रना
ग्रस्ते चास्तंगते त्विंदौ ज्ञात्वा मुक्तिं च धारणां स्नानहोमादिकं कार्यं भुंजीतं तु इदये
पुनरिति। संवत्सरप्रदीपे तु तंत्र दानु इ विंकमेवसर्वं वृत्वा पठितास्नाताः पाकाद्दिक
मेतीति। तलीयपारमात्रमन्यथा पठितं। तत्र पाठद्वये यथा दिपदसदिवादस्थेयं

व्याख्येयं। स्पर्शमारभ्य मोक्षपर्यंतं ग्रहणकालस्तत्रापि न भोक्तव्यं। पराशरः। चंद्र
सूर्यग्रहे नाद्यादद्यात्स्नात्वा विमुक्तयोः। अमुक्तयोरस्तगयोर्दृष्ट्वा स्नात्वा परेऽहनीति॥
अन्यथा तु प्रायश्चित्तमाह कात्यायनः। चंद्रसूर्यग्रहे भुक्त्वा प्राजापत्येन शुध्यति। त
स्मिन्नेव दिने भुक्त्वा त्रिरात्रेणैव शुध्यतीति। तस्मिन्नेव दिने वेधमध्य एव स्पर्शः॥
वेधग्रहणकालयोः। पक्वमन्नं सायं सर्वेषामेव वर्णानां सूतके राहुदर्शने अपा
वितामलिकस्थादकेचैव न दुष्येद्राहुसूतकेऽपि। अरनालं कांजिकं अथ वेधोत्तर
हेमाद्रौ। त्रयोदश्यादितावसंदिनानां नवकं अकर्वां मंगलेषु च सर्वेषु ग्रहणे चंद्रसूर्य
योरिति। अन्यत्रापि। द्वादश्यादिस्तृतीयान्तो वेधं दुर्ग्रहे स्मृतः। एकादश्यादितः सो
ऽत्र तु मुख्यं तत्प्रकीर्तितमिति। संपूर्णग्रहे चैवं तु तत्। ग्रहस्त्वं उग्रहे तयोरिस्तकेऽत्र यथाग्रह
णं तयोः स्नानमुक्तं। स्पर्शसमये स्नानं ग्रस्ते होमो विधीयते मुच्यमा
ने भवेद्दानं मुक्ते स्नानं विधीयत इति। तत्र कल्पो शिवरहस्ये। सूर्येन्दुग्रहणं यावा
त्कुर्याज्जपादिकं। न स्वपेन्नैव भुंजीत स्नात्वा भुंजीत मुक्तयोरिति। अत्र स्नाने ग्रहण
विशेषेण नदीविशेषो। देवीपुराणे। गोदावरी महापुण्या चंद्रराहुसमन्विते। सूर्ये च
राहुणा ग्रस्ते तमोभूते महामुने। नर्मदातोयसंस्पर्शात्कृतसापं भवेतिहीति। तथा गंगा
कनखले पुण्यं प्रयागं पुष्करं तथा। कुरुक्षेत्रं महापुण्यं राहुग्रस्ते दिवाकरे इति
मासविशेषे पुराणे कस्य तीर्थविशेषस्तत्रैव। कार्त्तिके ग्रहणं श्रेष्ठं गंगायमुनसंगमे॥
मार्गे तु ग्रहणं प्रोक्तं देविकायां महामुने। पौषे तु नर्मदा पुण्या माघे संनिहिता पु

भा॥ फाल्गुने वरुणा पुण्या चैत्रे पुण्या सरस्वती॥ वैशाखे तु महापुण्या चंद्रभागा
सरिद्वरा॥ ज्येष्ठे तु कौशिकी पुण्या आषाढे तापिका नदी॥ श्रावणे सिंधुनामा तु
नथा भाद्रे तु चंद्रिका॥ आश्विने सरयूः श्रेष्ठा तथा पुण्या तु नर्मदे॥ गंगा यमुना
नि॰ मिसंत्रे कलिंगवे पि चार्थे द्वंद्व इति॥ समाहारः विशिष्टलिंगो नदीदेशोऽग्रा
मा इत्यत्र हि॥ विशिष्टलिंगा[illegible]नां समाहार एव॥ नियमो न तु तेषामेव समा
हार इति॥ तत्राप्यत्र॥ तिष्यपुनर्वस्वोरित्यत्र॥ महाभाष्ये परिभाषोच्यते सर्वो
द्वंद्वो विभाषैकवद्भवती॥ तथा॥ भाद्रे तु चंद्रिकेत्यस्य स्थाने प्रोष्ठे श्रेष्ठा
त्वगंउकीति॥ हेमाद्रिश्राद्धकांडे पाठः॥ [illegible] तु आतुरविषये तु व्याघ्रः॥
आदित्यकिरणैः पूतं पुनः पूतं च वह्निना॥ अतो व्याधातुरः स्नायाद्गृह
तोयप्युल्मवा विलोति॥ ग्रहणे॥ श्राद्धमावस्यकालतुसंक्रांतौ नैमित्तिके तु कर्त्तव्यं
ग्रहणे चंद्रसूर्ययोः॥ विधवा नो च मरणे नारकि स्यादतोऽन्यथा॥ काम्यानि चैव
श्राद्धानि श्राद्धे ते ग्रहणादिषु इति॥ नैमित्तिकं श्राद्धमित्यर्थः॥ इदं च श्राद्धमा
मेन हेम्ना वेति॥ हेमाद्रिमाधवौ॥ तन्मासैं हि केयो यदा सूर्यं ग्रसते पर्वसंधिषु
गजच्छायायां तु सा प्रोक्ता तस्यां श्राद्धं प्रकल्पयेत्॥ घृतेन भोजयेद्विप्रान् घृतं भू
मौ समुत्सृजेत्॥ ग्रहस्य पराकेष्वत वायवीयवचनविरोधात्॥ यत्तु शातातपः
आपद्यनग्नोऽतीर्थे च चंद्रसूर्यग्रहे तथा॥ आमश्राद्धं द्विजो दद्याद्धेमश्राद्धं दद्या
स्तरेव हि॥ तिाा प्रपंचबोधायनः॥ हेमश्राद्धं ग्रहे कुर्यात् शूद्रः कुर्यात्सदैव हीति

तहिनाभावेद्रह्यो। कथमन्यथा मृतके सूतके चैव ग्रहणे चन्द्रसूर्ययोः
छायायां कुंजरस्याथ भुक्त्वा तु नरके व्रजेदिति। अत्रापवादो भोक्तुर्द्वितस्य दो
षाभिधाने संगच्छत इति दिक्। अथ ग्रहणोपरमे स्नानमुक्तं महाभारते। अ
यने विषुवे चैव ग्रहणे चन्द्रसूर्ययोः। पात्रभूताय विप्राय भूमिं दद्यात्सदक्षि
णामिति। तथा। भूमिर्गावः सुवर्णं वा धान्यं वा पयस्विनीमिता। तत्सर्वं ग्रहणे दे
यमात्मनः श्रेय इच्छता। अत्र पुत्रवति रिक्तस्योपवास इति संक्रान्तिप्रकर
णा एवोक्तं। अत्राशौचिनोऽपि ग्रहणनिमित्तके स्नानदानाधिकारः। सूत
के मृतके चैव नष्टो वा राहुदर्शने। तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यत इ
ति वृद्धवसिष्ठोक्तेः। व्याघ्रपादोऽप्याह। स्मार्त्ते कर्मपरित्यागो राहोरन्यत्र सूतक
इति। रजस्वलाया विशेष उक्तो मिताक्षरायां। स्नाने नैमित्तिके प्राप्ते नारी
यदि रजस्वला। पात्रान्तरिततोयेन स्नानं कृत्वा व्रतं चरेदिति। अत्र नारीस्त्री
ग्रहणस्य ज्ञानमात्रं स्नानादिनिमित्तं न तु चाक्षुषमेव ज्ञानं। तेनांधानामपि
स्नानाद्याचारः संगच्छते। यथा रजसा दृष्टा नारी त्रिरात्रमशुचिर्भवेदि
त्यत्र ग्रहदर्शनपदेन रजोज्ञानमात्रस्य निमित्ततया विवक्षितत्वादंधस्त्रीणामपि
त्रिरात्रमशुचित्वं। तथा च वृद्धगौतमोऽप्याह। चन्द्रसूर्यग्रहे नाद्यात्तस्मिन्न
हनि पूर्वतः। राहोर्विमुक्तिं विज्ञाय स्नात्वा कुर्वीत भोजनमिति। नन्वेवं कालविपर्य
सेन ज्योतिः। शास्त्रोक्ते ग्रस्यमाने ग्रहणेऽपि स्नानाद्यावश्यकं। एवं सूर्यग्रहे

यद्वा रात्रौ दिवा चंद्रग्रहस्तथा ॥ तत्र स्नानं न कुर्वीत दद्याद्दानं च न क्वचित् ॥ इति
॥ निगमवचनेन ॥ तत्र स्नानादिनिषेधात् ॥ एतेन चाक्षुषमेव ज्ञानं स्नानादि
निमित्तं ॥ न दृष्टं ॥ निर्णयामृतकारादयोप्यस्तां ॥ अथ ग्रहणे दीक्षोक्ता ॥ रुद्रयाम
ले सतीर्थके विधुग्रासे तु तद्दानमनेपर्वणो ॥ मंत्रदीक्षां प्रकुर्वीत मासर्क्षादि
न शोधयेत् ॥ सुलग्नचंद्रतारादिबलमत्र सदैव हि ॥ ० लब्ध्वात्र मंत्रो दीर्घा
युः संपत्संततिवर्द्धनमिति ॥ तथा ॥ त्रिवार्चनचंद्रियां कालेनरोस्तु सूर्यग्रहणका
लेन समो नान्यः कश्चन ॥ न मासतिथिवारादिशोधनं सूर्यपर्वणीति यस्तु
योगिनीतंत्रे चंद्रग्रहणे निषेध उक्तः ॥ चंद्रग्रहे तु या दीक्षा या दीक्षा प्रान्तचारि
णां ॥ वनस्थस्य च या दीक्षा दारिद्र्यस्य सजन्म मिति ॥ सोपि वैष्णवदीक्षामात्रवि
षयः ॥ यदुक्तं तंत्रसारे तत्रैवान कुर्याद्युक्तिकी दीक्षामुपरक्ते विभावसौ न कुर्याद्वै
ष्णवीं तां तु यदि चंद्रमसो ग्रहे इति ॥ अथ मंत्रसिद्धयो ग्रहणे पुरश्चरणं वृद्धकाश्य
विशेष उक्तः ॥ चंद्रसूर्योपरागे च स्नात्वा प्रयतमानसः ॥ स्पर्शादिमोक्षपर्यंतं जपे
न्मंत्रं समाहितः ॥ जपाद्दशांशतो होमः स्तथा होमात्तु तर्पणमिति ॥ तर्पणस्य दशांशे
न मार्जनं कथितं किलेति ॥ तत्रैव देवतारूपं ध्यात्वात्मानं प्रपूज्य च ॥ तन्मंत्रो मंत्रमुच्चा
र्य तदंते देवताभिधां ॥ द्वितीयांतां महस्यश्चाहमभिषिंचाम्यनेन तु ॥ तोयैरंजलीनाथु
हे दभिषिंचेत्स्वमूर्द्धनि ॥ मार्जनस्य दशांशेन ब्राह्मणानपि भोजयेत् ॥ जपस्त[illegible]
होमस्तर्पणं चाभिषेचनं ॥ भूदेवपूजनं पंचप्रकारोक्ता पुरस्क्रिया ॥ तथा होमा

२०

158

ग्नको जपं कुर्याद्धोमं स्याच्चतुर्गुणः।। एवं कृते तु मंत्रस्य जायते सिद्धिरुत्तमेति
इति ग्रहणे पुरश्चरणविधिः।। अथ ग्रहणशान्तिः तिग्मांशोः सोमस्य राहोः समासाद्य
भवेद्ग्रहणसंभवा। स्नानं तस्य प्रवक्ष्यामि मंत्रौषधिसमन्वितं।। चंद्रोपरागं संप्रा
प्य कृत्वा ब्राह्मणवाचनं।। संपूज्य चतुरो विप्रान् शुक्लमाल्यानुलेपनैः।। पूर्वमेवो
परागस्य समानीयौषधादिकं। स्थापयेच्चतुरः कुंभानव्रणांस्तत्पल्लवान् तेषु
कुंभेषु सप्तमृत्तिकां पंचगव्यं पंचरत्नं पंचपल्लवं सर्वौषधीतीर्थजलाद्यैः पूरितेषु
देवानामावाहयेत्तान् तत्र मंत्राः सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः। आया
तु यजमानस्य दुरितक्षयकारकाः।। योसौ वज्रधरो देवः आदित्यानां प्रभुर्म
तः सहस्रनयनं शक्रो ग्रहपीडां व्यपोहतु मुखः सर्वदेवानां सप्तार्चिरमित
द्युतिः चंद्रोपरागसंभूतामग्निः पीडां व्यपोहतु यः कर्मसाक्षी लोकानां धर्मो म
हिषवाहनः यमश्चंद्रोपरागोत्थां ग्रहपीडां व्यपोहतु रक्षोगणाधिपः साक्षान्नीलां
जनसमप्रभः खड्गहस्तोतिभीमश्च ग्रहपीडां व्यपोहतु नागपाशधरो देवः सदा
मकरवाहनः स जलाधिपतिर्देवो ग्रहपीडां व्यपोहतु प्राणरूपो हि लोकानां सदा
कृष्णमृगप्रियः वायुश्चंद्रोपरागोत्थां ग्रहपीडां व्यपोहतु योसौ निधिपतिर्देवः ख
ड्गशूलगदाधरः चंद्रोपरागकलुषं धनदोत्र व्यपोहतु योसौ बिंदुधरो देवः पि
नाकी वृषवाहनः चंद्रोपरागपापानि स नाशयतु शंकरः त्रैलोक्ये यानि

159

स्थावराणि चराणि च कृत्स्नं विश्वकर्त्रे शम्भवे हन्तु मम पातकमिति॥ अत्र व्याहृ
तिभिः रक्ष्योत्तरसहस्रसंख्याकमिति॥ तिलहोममपि केचित्कुर्वन्ति॥ ततः एत
न्नेवेत्तथा मन्त्रान्स्वर्णपट्टे विलिख्य शीलायां ताम्रपत्रे अथवा लिख्य नववस्त्रेण स
ष्टे वचा मस्तके पूजमानस्य निरध्यस्ते द्विजोत्तमाः कलशानुदक्षसंपुटान्
नानारूपसमन्वितान्गृहीत्वा वाचयेद्द्वयं चंद्रोपरागे परिस्थितौ पूर्ववत्तु मंत्रैर्म
यजमानं द्विजोत्तमास्त्व भिषेकं ततः कुर्यान्मंत्रैर्वारुणसूक्तकैः॥ आचार्यं वरय
स्वर्णास्वर्णपट्टं निवेदयेत्॥ आचार्यो दक्षिणां दद्याद्यदिच्छेदात्मनो हितं सर्व
गृहे स्यैनाम युक्तानंत्रीश्वकीर्तयेत्॥ अनेन विधिना यस्तु ग्रहणस्नानमा
चरेत्॥ न तस्य ग्रहजो दोषः कदाचिदपि जायते॥ इति ग्रहणस्नानं॥ कालवि
वेके तु नागदानमुक्तं॥ सुवर्णनिर्मितं नागं सतिलं कांस्यभाजनं॥ सदक्षिणं सर्वे
वं ब्राह्मणाय निवेदयेत्॥ सौवर्णं राजतं वापि ब्राह्मणाय स्वशक्तितः॥ उपरागभ
वक्लेशच्छिदे विप्राय कल्पयेत्॥ तत्र मंत्रः॥ तमोमय महाभीम सोमसूर्यविमर्दन
हेमताराप्रदानेन मम शान्तिप्रदो भव॥ विधुंतुद नमस्तुभ्यं सिंहिकानंदनाच्युत॥
दानेनानेन नागस्य रक्ष मां वेधजाद्भयात्॥ इति दुर्हदानमिसर्लो॥ आसंमिकेनी
बुंदेलखंडनृपमंडलमौलिमालाच किरीटतटरत्नमरीचिदीपैर्नीराजिता
नुदिनमुंसुरपादयुग्मः क्षोणीतले विजयते यशवंतदेवः॥ नरवर अरु वसंतसिं
हस्य बुंदेलचूडामणेः॥ पौर्यनीराणवंवाक्रुमासाध्य वंचयुतिर्गगनगकरवं
लक्ष्मालस्वरूपा बुवः॥ परिमाराति सामात सौमेतिनीनेत्रनीरायमगः॥ रिपुत्रा

५२

160

धरकीर्त्तिपूर्त्तिस्फुरत्कौमुदिं संचरंती॥ वयं स्वर्णसन्मुद्रिसौदामिनी
मंडना॥ किलयति च सपत्नभूपप्रतापालिरावाचलज्वालपादस्युमानेन ज
गच्छितलं धारया॥३॥ कप्येव केश्वरपुरीकृतवासाग्निहोत्रीकुलनीरधि
चंद्रात्॥ पुण्यपूर्णपुरुषोत्तमभट्टादुद्भूवसुकृतिहरिभट्टा॥ श्रीरेवाकम्
निनयावचयेन प्रेक्षितो विधिरिवेह बुधाग्र्यो॥ लोकगीतविमलायातकी
र्त्तिः सोपि सज्जनमणिर्जयति स्म॥४॥ तस्मादुद्भूतकीर्त्तिः कृतसुकृतभरान्नि
त्रं तंत्रस्वतंत्रः साधूनामग्रगण्यो गरदलनविधौ भानवानां नृपः काशी
क्षेत्राधिवासी हतकठिनतराराति षड्वर्गदंभा॥ श्रीमानापाजिभट्टः सुरयजन
रतः शुद्धधाराविरासीत्॥५॥ तत्सूनुना भास्करशर्मणा स्मिन्नादेशतः श्री
यशवंतभूपतेः॥ विनिर्मितं श्रीजसवंतभास्करे समाप्तिमायात् बहुवर्ष
कसौख्यदं॥ इति श्रीमत्सामंतचक्रचूडामणिहविरचितनीराजनानीराजित
काञ्चीश्वरपंचमगहिरवारविविधबिरदावलीविराजमानमहाराजाधिरा
ज श्रीमहेंद्रमणिनृपतिनंदन श्रीमत्कुमारयशवंतसिंहप्रेरित श्रीमत्काश्यपा
न्वयसंभवाग्निहोत्रिकुलतिलकायमान श्रीमदापाजिभट्टसूनुभास्करवि
रचिते यशवंतभास्करे संवत्सरप्रकाशः॥ शाके १६से ९८ दुर्मुखनामसंव
त्सरे पौ भाद्र शुक्ल पंचमी सौम्यदिन प्रथमयामे एलापुरक्षेत्रे श्रीघृष्णेश्वर

सन्निधौ हस्ताक्षर धौंउ मरहसें उ गेग्रंथ लेखण समाप्तः॥ शुभं भवतु॥
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया यदि शुद्धमशुद्धं वा मम दोषो न विद्यते॥

[OrderDescription]
,CREATED=16.09.20 11:11
,TRANSFERRED=2020/09/16 at 11:33:53
,PAGES=162
,TYPE=STD
,NAME=S0003618
,Book Name=M-901-SANVAR KRIT PRAKASH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,